FOREWORD

In Sanskrit more than in any other language women poets have at all times been held in high honour. Apart from quotations in well-known anthologies many notable works by women poets of earlier times have come down to us. Among them may be mentioned the well-known political drama *Kaumudi Mahotsava*, Queen Ganga Devi's *Kavya* entitled *Madhura Vijaya* and the *Champu Varadambika Parinaya*. Pandita Ksama Row, who is undoubtedly our most eminent Sanskrit poetess, is therefore the inheritor of a great tradition which she has upheld and enriched with great distinction. Her earlier publications, especially *Katha Panchakam* and *Mīra Lahrī*, have earned for her an honoured place not only among poets writing in Sanskrit, but in the modern Indian literary world. The *Purva Satyagraha Gita* brought her deserved fame as an epic poet, for in that volume she had, in the manner of Valmiki and Vyas, dealt with the story of Gandhiji's life up to the Gandhi-Irwin Pact. The present volume is the second part of that epic, bringing the story of the great struggle to the 75th birth-day of Gandhiji.

The narrative is composed in the *ārsha* metre of Anushtup, in which all the great epics of Sanskrit are written. I am particularly happy that this is so, for the artificial style of the later Mahākāvyas, while it might have lent itself to a greater exhibition of poetic skill and given scope for futile display of rhetoric, would have

been unsuited to the serenity and dignity of Gandhiji's life. Anushtup is in fact the recognized metre for epics, and in its simplicity and dignity it is extremely appropriate to the theme of Satyagraha Gita.

The present volume is divided into 47 cantos of appropriate length. It includes not only political, social and economic aspects of the struggle, but also records faithfully details of enterviews which Gandhiji had with prominent persons, his important utterances and speeches and various anecdotes. Inseparable from the history of the Indian struggle for freedom, it is also a biography of the Father of the Nation.

Recording the manifold achievements of the Congress Ministry of Bombay, headed by Sri B. G. Kher during the pre-war period of two and a half years, the poetess says (24-4-5):

> **विद्याभ्यासपुरोवृद्ध्यै नियमा बहवः कृताः ।**
> **अभिनन्द्यमिदं सर्वं शोच्यमेकं तु वर्तते ॥**
> **स्वयं सर्वस्वतन्त्रोऽपि देववाणीप्रियोऽपि सन् ।**
> **पुनरुज्जीवनायास्या न यत्नमकरोदसौ ॥**

It may seem strange that such a poem should be written today in Sanskrit which is held by some to be a dead language. It is necessary to emphasize that it is only out of ignorance that people call Sanskrit a dead language. It is the one language that unites India culturally, which is the repository of our living

traditions, which unites our regional languages in a community of thought and form. Can it not be legitimately claimed that the National Government of India should recognize this fact and give to Sanskrit the importance it deserves in our education? Satyagraha Gita has shown that Sanskrit, in spite of the neglect of the last hundred years, still holds an important place in the cultural life of India.

The subject of the Satyagraha Gita is one of supreme significance; the poet who handles it has a command of dignified and mellifluous diction in Sanskrit; the narration is simple and effective. I have no doubt that the book will take its due place by the side of the great classics and will be read with veneration by generations to come.

K. M. PANIKKAR

INTRODUCTION

It is a proud privilege for me to associate myself with this important poetic composition of Pandita Ksama Row, the *Uttara-Satyagraha-Gita*, by writing an Introduction to it. Her name has already become well known to all Sanskrit scholars through her many previous poems. She inherited her scholarship in Sanskrit from her father, Mr S. P. Pandit, whose life she has written in the form of a beautiful poem called *Sankara-jivanakhyana*. Her fascinating poem on Mirabai, called *Miralahari*, has secured for her a place among the best poets in Sanskrit, both ancient and modern.

She wrote a poem in eighteen Cantos, called *Satyagrahagita*, in which she has described the Satyagraha movement from its beginning for the first few years. The present work, as the name indicates, is a continuation of it, from the time when Lord Irwin came to India as Viceroy and started negotiations with Mahatma Gandhi regarding his participation at the Round Table Conference and the signing of the Pact about manufacture of Salt and the non-violent Satyagraha movement. It closes with the now famous meeting between Mahatma Gandhi and Mr Jinnah at Bombay.

The poem describes one of the most stirring events in the modern history of India, which can compare with the theme in the *Ramayana* and the *Mahabharata*. A time will come when present events would become

ancient history, and at that time even this "modern" chronicle of such an important event, made by a contemporary poet, will rank along with the *Ramayana* and the *Mahabharata*, which are contemporary records of the great events.

In the poem, containing forty seven Cantos, one can see the great poetic talent of the author, shining in the midst of a sincerity of motive and nobility of purpose. A high theme has found a worthy exponent.

I must say a word about the language in which the poem is written. Sanskrit is supposed to be a "dead language", and one may wonder why this poem is written in a language which only a few can understand and fewer still can appreciate. But Sanskrit is dead only to those whose heart has no life. To those who know Sanskrit, it is as alive as any other language and more alive than many "living languages". The only other language known in the whole of India is English, and at this time in the history of India, English may be the most inappropriate language to record such sacred events. Further, there may be more persons who know Sanskrit in India than English, although those who know it may not be so prominent at present in public notice; but they are the people who will lead the nation in future.

Further, the mass of the people of India can be reached at present only in the various regional languages and not in English. If the theme is to be presented in

the regional languages, those who can do it with effect all know Sanskrit, in every linguistic region of India; the same cannot be said of English. Thus, I consider it extremely proper that such an important book should have been written in the true national language of India, Sanskrit.

Of the poem all that I can say, after reading it very carefully, is that

It is "Truth" presented with poetic "Beauty" for the "Good" of All.

C. KUNHAN RAJA

PREFACE

I have been often asked why I do not write in a 'living' language and my reply has been that any language in which one can write on a modern subject is a living language and Sanskrit, therfore, is as much alive as any other language spoken in India. In my humble opinion Sanskrit lends itself beautifully to depict the spiritual grandeur of Bapu's creed of Truth and Ahimsa. Sanskrit has lived for thousands of years in spite of numerous foreign invasions and will live as long as India lives.

I was urged to write Uttarasatyagraha Gita by Bhikshu Nirmalananda of the Gandhi Mission in Tiruvennainallur in South India. He informed me early in May 1944 that his Mission had sent out circulars all over India inviting Sanskritists to write an epic of Satyagraha as preached and practised by Bapu. The manuscript had to be delivered by the end of September. Would I compete for it? He asked. "How did you know about an obscure person like me?" I inquired, when the Bhikshu admitted frankly that he had only heard of me

recently through the Rt. Hon. Srinivas Sastri. The latter had spoken to him about my Satyagraha Gita written some years previously. The time allotted for the competition was far too short but the Bhikshu succeeded in persuading me to undertake the work. But where was I to collect the material—the history of fourteen years? My first book was upto the end of 1930. However, I wrote the first few chapters from memory, hoping to get some books for reference later. Finally, with the greatest difficulty I got old files of *Harijan* from my friend, Shri Sadashiv Barve who also lent me a copy of Dr Pattabhi Sitaramayya's book *Sixty Years of Congress*. These were all of immense use to me and I managed to finish this book of forty-seven chapters within five months. I cannot be too gratetul to my Guru, Pandit Nagappa Sastri who revised the manuscript and by the end of September I sent it to the Secretary of the Gandhi Mission in Tiruvennainallur without the slightest hope of its being even commended. And what was my great surprise when the following month I received a wire from Bhikshu Nirmalananda, informing me that the judges

of the competition had rewarded me the first prize—would I go to Madras in December to receive the same? I could hardly believe my eyes when I read the telegram and feared that they had shown me partiality on account of my sex.

At the meeting held in my honour in December Dr Raghavan of the Sanskrit Academy in Madras read out numerous passages from my Satyagraha Gita and from this book for which I received heartiest congratulations from all lovers of Sanskrit.

I had great hopes of placing this tribute at the sacred feet of the hero of my book but alas! it was not to be and my wish has to remain unfulfilled.

KSAMA ROW

—विषयानुक्रमणिका—

इत्युत्तरसत्याग्रहगीताया विषयानुक्रमणिका ॥

उर्वरितविशुद्धिपत्रम् ।

अ.	श्लो.	विशुद्धं
१३	६५	सांघिकं
१४	१७	कश्चिदयं
,,	,,	विरोधनात्
४४	३७	कुतोऽपि
२०	७८	फलति
४५	५	आग्नेय

CONTENTS

प्रथमोऽध्यायः ।

अथाल्पदिवसान्नीत्वा मोहमय्यामसौ मुनिः ।
साबर्मतीसरित्तीरे ययौ सत्याग्रहाश्रमम् ॥ १ ॥

या वत्सरं समारभ्य तनुशुष्का नदी स्थिता ।
पीना घनरसेनानीं चलति स्म मुदेव वा ॥ २ ॥

ये पूर्वमाश्रमोपान्ते तं विनाऽऽसन्निरारवाः ।
पक्षिणस्ते प्रमोदेन मुक्तकण्ठं जगुः पुनः ॥ ३ ॥

अल्पकालमुषित्वात्र प्रतस्थे सिमलाचलम् ।
सम्राट्प्रतिनिधेः पार्श्वं संधित्सुर्देशवत्सलः ॥ ४ ॥

कुमार्या अमृताख्यायास्तत्र सद्वंशजन्मनः ।
सदने सौधसंकाशे निवासमकरोन्मुनिः ॥ ५ ॥

न्यस्तभोगा नृपोत्थापि त्यक्तरागा तरुण्यपि ।
दृष्टयोगा परं साभूच्चिरं सत्याग्रहव्रते ॥ ६ ॥

अमृता साऽमृतासारैर्वचनैर्विनता मुनिम् ।
सिषेवे लोकसंसेव्यं कृष्णा कृष्णमिवागतम् ॥ ७ ॥

सेव्यमानस्तुषाराद्रेरथ वातैः सुगन्धिभिः ।
राजप्रतिनिधेः सौधं प्रती प्रायान्मुनिस्त्वितः ॥ ८ ॥

आहुर्देवमुनिं लोका नारदं कलहप्रियम् ।
सुरासुरपरीमर्दस्तस्य नेत्रमहोत्सवः ॥ ९ ॥
स याति स्म सुरेशानं संगराय प्रचोदकः ।
मन्दारमालिकाधारी हेमसूत्राधराम्बरः ॥ १० ॥
यस्तु भौममुनिर्गान्धिः स नित्यं शान्तिवत्सलः ।
प्रजाशासकसंघर्षस्तस्य मर्मनिकृन्तनः ॥ ११ ॥
सोऽयं धाम नरेन्द्रीयं धृतह्रस्वाधराम्बरः ।
खद्दरीयोत्तरासङ्गः प्रपेदे कौतुकेक्षितः ॥ १२ ॥
कृशीयानपि तेजस्वी दीनोऽपि प्राभवान्वितः ।
एकदन्तोऽप्यवक्रास्यः श्रुतौ साक्षाद्विनायकः ॥ १३ ॥
द्वारपाला महाद्वारे प्रांशुपुष्टकलेवराः ।
ऋजुकाया महोरस्का धीरविप्रेक्षिताः स्थिराः ॥ १४ ॥
हेमतन्तुमयोष्णीषाः शोणकञ्चुकधारिणः ।
लम्बकूर्चाः शिखावन्तो रूप्यदण्डकरा मुनिम् ॥ १५ ॥
सिक्खवीरास्तमालोक्य प्रविशन्तं स्मिताननम् ।
ज्वलन्तमिव तेजोभिस्तस्थुर्विनतमौलयः ॥ १६ ॥
श्रीमान् प्रतिनिधी राज्ञः प्रभुरार्विणसंज्ञकः ।
सच्चकार महात्मानं मुकुन्दरिव पाण्डवः ॥ १७ ॥

१ दुर्योधनः ।

अथैनमब्रवीत्साम्ना शास्ता नीतिविशारदः ।
भविता लण्डनपुरे चक्रगोष्ठीमहासभा ॥ १८ ॥
भवता तत्र गन्तव्यं देशप्रियचिकीर्षुणा ।
भारतस्य हि कल्याणं मिथस्तत्र विमृश्यते ॥ १९ ॥
आंग्लवस्तुबहिष्कारो भवता यः प्रवर्तितः ।
सद्यस्तस्य विरामोऽस्तु न विरोधः शुभावहः ॥ २० ॥
श्रुत्वेदं वचनं गान्धिः प्रत्यवादीत्सगौरवम् ।
गमिष्यामि स्वदेशस्य हितं चेद्भविता सखे ॥ २१ ॥
लवणस्य करस्तावद्दीनान् दुःखाकरोति यः ।
तमपास्य हितं तेषां प्रकल्पयितुमर्हसि ॥ २२ ॥
विधिना लवणं सृष्टं पोषणाय हि देहिनाम् ।
प्रसह्य हरणे तस्य नाधिकारः प्रशासितुः ॥ २३ ॥
ग्राह्यश्चेल्लवणस्यापि करः क्षितिभृतो बलात् ।
ननु वायुजलाग्नीनामपि देयो भवेन्न किम् ॥ २४ ॥
उभयोः सख्यबन्धोऽस्तु भारतांग्लभुवोः स्थिरः ।
भवन्तं प्रार्थये भूयः सद्यो निष्कास्यतां करः ॥ २५ ॥
बन्दीकृता विमोच्यन्तां तत्तत्कारालयाज्जनाः ।
क्लिश्यमानाश्चिराद्यत्र म्रियन्ते देहपञ्जरे ॥ २६ ॥
ओमित्यस्य गिरा सद्यश्चिन्ताया मुमुदे मुनिः ।
जनताशुल्कभाराश्च चिराय क्लेशदायिनः ॥ २७ ॥

कुरुपाण्डवसंग्रामे चिरन्तनमुनिर्हरिः ।
संधित्सुर्धार्तराष्ट्रस्य प्रासादमुपजग्मिवान् ॥ २८ ॥
अनिच्छन् कौरवः संधिं हितोक्तिं तस्य नाशृणोत् ।
स्वपुरीं च वृथायासः प्रत्यगात्पुरुषोत्तमः ॥ २९ ॥
प्रजाशासकसंमर्दे त्वयमद्यतनो मुनिः ।
कृतकार्यैकदेशः सन्निरगान्नरपुङ्गवः ॥ ३० ॥
न जहर्ष तु संपूर्णस्वराज्यैकपरायणः ।
आसमग्रफलावाप्तेर्न तुष्यन्ति मनीषिणः ॥ ३१ ॥
निश्चितोऽर्थस्तयोर्मध्ये लेखेनापि स्थिरीकृतः ।
गान्ध्यर्विणीयसंध्याख्यो नामशेषो बत स्थितः ॥ ३२ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां संधानयत्नवर्णनो नाम प्रथमोऽध्यायः ।

द्वितीयोऽध्यायः ।

अथ काले समायाते पिकगीतिमनोहरे ।
कराचीनगरेऽब्दान्तेऽमिलद्राष्ट्रमहासभा ॥ १ ॥
महात्मा गान्धिरेवैकश्चक्रसंसदि निर्णये ।
प्रमाणं विदधे सर्वैः समकण्ठं सभाजनैः ॥ २ ॥
पूर्णस्वराज्यमेवैकं पुरस्कृत्य प्रवर्तताम् ।
स वादप्रतिवादेषु तथा सदसि भाविनि ॥ ३ ॥

यथा सैन्ये च कोशे च विदेशार्थकृतिष्वपि ।
प्रजा एव स्वतन्त्राः स्युरित्यादेशो व्यधीयत ॥ ४ ॥
राष्ट्रप्रतिनिधेरस्य नाधिकारो मनागपि ।
न्यूनातिरिक्तकरणे भवेदित्यपि निश्चितम् ॥ ५ ॥
गतेषु द्वित्रमासेषु समयोऽपि समासदत् ।
चक्रगोष्ठीप्रयाणाय प्रतिपन्नाय गान्धिना ॥ ६ ॥
अथ निर्गमनात्पूर्वं तस्याह्लादमहाङ्गणे ।
पञ्चत्रिंशत्सहस्राणि प्रजानामुपतस्थिरे ॥ ७ ॥
हृदि केचिद्विकीर्षन्तस्तद्वाङ्मौक्तिकमालिकाः ।
अपरे तद्वचोरत्नैः कर्णाभरणमीप्सवः ॥ ८ ॥
भृशोत्कण्ठा यदा लोका निरुच्छ्वासा इव स्थिताः ।
उक्तिमुक्तास्तदा गान्धेरुत्पेतुर्वदनान्तरात् ॥ ९ ॥
हन्त भोः किं बहूक्तेन प्रतिजाने दृढं हि वः ।
सर्वात्मना यतिष्येऽहं देशकल्याणसिद्धये ॥ १० ॥
साधयिष्यामि देशस्य क्लेशमुक्तिमहिंसया ।
अहिंसैव हि साधूनाममोघं दिव्यसाधनम् ॥ ११ ॥
वञ्चयेय स्वदेशं चेच्छिलाघातैर्हतैव माम् ।
न काप्यत्र घृणा कार्या वरं वैरी न वञ्चकः ॥ १२ ॥
तत्र संसदि वक्ष्येऽहं याथार्थ्येनास्मदीप्सितम् ।
अस्मत्क्लेशतमोहन्त्री केवलं सत्यदीपिका ॥ १३ ॥

सत्याग्रहपथे श्रद्धां धैर्यमाश्रित्य रक्षत ।
न बलात्तु प्रतीकारं कर्तुमर्हति जातुचित् ॥ १४ ॥
जन्मभूमेः कृते सोढं शुभोदर्कं भविष्यति ।
मातुरर्थे सुपुत्रस्य कः क्लेशो दुःसहो भवेत् ॥ १५ ॥
इति वाक्यामृतैर्वर्षन् नेत्राम्बुझरशीतलैः ।
नरेन्दुर्वर्धयामास जनस्तोममहार्णवम् ॥ १६ ॥
सुमनाः समनोहारान् सुमनोभिः समर्पितान् ।
पस्पर्श पाणिपद्मेन तन्मनांसि च सूक्तिभिः ॥ १७ ॥
परेद्युः परमप्रीतः प्रतस्थे नौकया मुनिः ।
वर्षासु क्षुभिताम्बोधिं ह्लेपयन् शान्तिसम्पदा ॥ १८ ॥
जयघोषं जनस्तोमश्चकारोच्चैः पुनः पुनः ।
यावदक्षिपथे नौका बिल्वमात्रा व्यलीयत ॥ १९ ॥
सेव्यमानः सरोजिन्या मीरया तनुजेन च ।
ध्यानैश्च सूत्रनिर्माणैर्निनाय दिवसान्मुनिः ॥ २० ॥
उदस्यमाना कल्लोलैस्तरी लास्यमिवातनोत् ।
क्रमेण वारिधौ शान्ते श्रान्तेव व्यरमत्ततः ॥ २१ ॥
आदनाख्यपुरे पूर्वं पोर्तसैदपुरे ततः ।
नौकावतरविश्रामो जनैरेकार्णवोऽभवत् ॥ २२ ॥
तैरानीतबृहत्पात्रैः फलपुष्पान्नसंभृतैः ।
पुपूरे सा तरी चेतः पान्थानां कौतुकेन च ॥ २३ ॥

केचिदांग्लाः सहाध्वन्याः सत्याग्रहविडंबिनः ।
महिमानं मुनेः प्रेक्ष्य व्यवजह्रुः सगौरवम् ॥ २४ ॥
गान्धिपार्श्वाभिरुद्धा ये बालका मातृभिः पुरा ।
तेऽधुना स्वयमाक्रम्य मोदकांस्तं ययाचिरे ॥ २५ ॥
वनिता वैरिणंमन्याः पुरा यास्तं शशङ्किरे ।
हन्त नः कियदज्ञानमासीदिति विजिह्रियुः ॥ २६ ॥
तरुण्यस्तन्तुचक्रस्याकर्णयन्त्यः सुगुञ्जनम् ।
विहाय क्रीडनं सर्वे मुनिमेवानुचक्रिरे ॥ २७ ॥
अथ त्रयोदशाहेन तरणिः प्रातरासदत् ।
ह्वेनिसाख्यपुरीं रम्यां शुभां श्रीनगरोपमाम् ॥ २८ ॥
निशम्य गान्धिमेष्यन्तं प्रतीक्ष्य पुरवासिनः ।
प्रतीक्षन्ते स्म सर्वेषां सन्तः कौतुकहेतवः ॥ २९ ॥
अथारुणोदये नौका यदाभूत्कृतलङ्गना ।
तदैव स्वागतोद्घोषैः पुपूरे सर्वतो नभः ॥ ३० ॥
आंग्लवाणीविदः केचिदभाषन्त सहामुना ।
अन्ये च दर्शनप्रीता लपन्ति स्म परस्परम् ॥ ३१ ॥
शान्तमूर्तिरयं साक्षात्सेन्टपीटर एव किम् ।
किं वा देवकुमारोऽयं क्रिस्तः क्लेशहरो भुवः ॥ ३२ ॥
इति श्यामाङ्गगौराङ्गभेदमत्सरवर्जिताः ।
न हि सन्तः प्रतार्यन्ते बाह्योपाधिविलोकनैः ॥ ३३ ॥

तस्य हस्ताक्षरं बालाः स्पर्धया संजिघृक्षवः ।
पुस्तिकापाणयो गान्धिं स्मितास्यं पर्यवेष्टयन् ॥ ३४ ॥
अवतीर्याथ नौकायाः स्वादिमात्रैकधारिणम् ।
धूमयानस्थलं यान्तं सानुगं ददृशुर्जनाः ॥ ३५ ॥
पुनर्दर्शनमस्माकं भो देहि देहीति देशजाः ।
लण्डनं प्रति यास्यन्तं महात्मानमुदैरयन् ॥ ३६ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां समुद्रयानवर्णनो नाम द्वितीयोऽध्यायः ।

तृतीयोऽध्यायः ।

राजधानीमनुप्राप्तमीक्षितुं कौतुकान्विताः ।
पौरास्तमन्वयुः केचिद्भृशं तद्वेषविस्मिताः ॥ १ ॥
चक्रे चित्रकरैर्लक्ष्यं यत्र यत्र स लक्षितः ।
ज्योतिर्विद्भिरिव ज्योतिर्दूरदर्शकयन्त्रतः ॥ २ ॥
केचित्तं तापसं प्राहुरितरे नग्नभिक्षुकम् ।
प्राज्ञमन्ये गुणज्ञाश्च पिशुनास्त्वैन्द्रजालिकम् ॥ ३ ॥
अथैनं बहुधात्मानं वृत्तपत्रेषु वर्णितम् ।
पठन् विनोदमापेदे स्तुतिनिन्दापराङ्मुखः ॥ ४ ॥
बाह्याङ्गरमणीयत्वं प्रमाणं ये तु मन्वते ।
महत्त्वं ते कथं विद्युर्मनीषाया महात्मनः ॥ ५ ॥

अथ चाश्वियुजे मासे शरच्चन्द्रमनोहरे ।
चक्रगोष्ठीसभा भूयो द्वितीया समवर्तत ॥ ६ ॥
तत्रासन् पूर्ववत् केचिद्राष्ट्रसंघविरोधिनः ।
शफिहग्जिन्नमुख्याश्च सप्रूजयकरादयः ॥ ७ ॥
क्रैस्तान्त्यजादिनेतारः पालाम्बेडकरादयः ।
आंग्लवाणिजवित्ताढ्या भारताधिनिवासिनः ॥ ८ ॥
बभूवुरपरे केचित्स्वदेशस्याभिमानिनः ।
मालवीयमुखाः प्राज्ञा वाग्मिनी च सरोजिनी ॥ ९ ॥
वटोदरबिकानीरकश्मीराल्वारभूभृतः ।
हैदराबादमैसूरग्वालीयेरेशमन्त्रिणः ॥ १० ॥
उपतस्थुः सभामेनां सम्राडाराधनोत्सुकाः ।
परायत्तप्रतिष्ठानां परसेवा परा गतिः ॥ ११ ॥
जातिभेदानुरोधेन निर्णयं प्रचिकीर्षवः ।
सन्तीह संघनेतारः केचिदित्यविदन्मुनिः ॥ १२ ॥
हैन्दवेतरवर्णानामस्तु कामं पृथग्गतिः ।
अन्त्यजानां तु पार्थक्यमनर्थाय भविष्यति ॥ १३ ॥
हिन्दूनां हि समाजात्ते विप्रकृष्टा मुहुर्मुहुः ।
भूत्वा हीनतराः शश्वत्सीदन्तीति व्यशङ्कत ॥ १४ ॥
निवारयितुकामोऽयमीदृक् क्लेशपरम्पराम् ।
उपांशु मन्त्रयाञ्चक्रे तद्वर्णप्रमुखैर्मिथः ॥ १५ ॥

अन्त्यजोद्धारिधौरेयः परमैतैर्न्यरुध्यत ।
क्व माता क्व पिता बन्धुः क्व देशः स्वार्थकामिनाम् ॥ १६ ॥
निरस्यैते यदि स्वार्थमग्रहीष्यन्मुनेर्मतम् ।
देशदास्यतमोभेत्ताऽभास्यत्स्वातन्त्र्यभास्वरः ॥ १७ ॥
आश्रितस्य स्वराज्यस्य सत्तां पूर्वविनिश्चिताम् ।
आश्रयन्त दृढं केचित्सप्रूजयकरादयः ॥ १८ ॥
सम्राडधिष्ठिते तस्मिन्महात्मा सदसि स्थितः ।
प्रह्वः प्रगल्भया वाचा स्वमतं समघोषयत् ॥ १९ ॥
आदेशाद्राष्ट्रसंघस्य स्थितोऽस्मि भवतां पुरः ।
पूर्णस्वराज्यसंप्राप्त्यै योग्यतां नः प्रशंसितुम् ॥ २० ॥
सैन्यकोशविदेशीयव्यवहारस्वतन्त्रताम् ।
अन्तरा किं स्वराज्येन सरसेव जलं विना ॥ २१ ॥
राज्यं यदास्मदायत्तीक्रियते तत्प्रशासकैः ।
तदाधिकारः संत्याज्यो भवद्भिः सैन्यशासने ॥ २२ ॥
सोऽधिकारः समग्रोऽपि निवेश्योऽस्मासु केवलम् ।
परं जाने तदेतन्नः साहसिक्यं भविष्यति ॥ २३ ॥
यदांग्लसैन्यनेतारो नास्मदाज्ञां वितन्वते ।
न च सिक्खभटा वीराः क्षत्रियाश्चापि सैनिकाः ॥ २४ ॥
तथापि दृढमाशासे भवत्साहाय्यभागिमान् ।
क्रमाद्वशंवदान् कर्तुं भारतीयाधिकारिणः ॥ २५ ॥

परिवर्तनकाले हि भवद्भिः संनिधाय ते ।
सैनिकाः सैन्यपालाश्च बोध्याः कर्तव्यतां प्रति ॥ २६ ॥
यथा व्यक्तं विजानीयुरस्मादाज्ञानुवर्तनात् ।
सेव्यते जन्मभूरेव नष्टलब्धा प्रसूरिव ॥ २७ ॥
नावलेपबलोद्रेकात्स्वराज्यं कामयामहे ।
न वा दर्शयितुं लोके योगविच्छेदमावयोः ॥ २८ ॥
भवद्भिस्तावदिच्छामो भवितुं सहयोगिनः ।
यावदन्यतरो हातुं कामयेद्योगमावयोः ॥ २९ ॥
समत्वमिष्यतेऽस्माभिर्भेदलेशविवर्जितम् ।
सौहार्दं बकहंसानामपि योगेन जायते ॥ ३० ॥
पूर्वमांग्लप्रजामध्ये गणनामहमात्मनः ।
बहुमन्ये स्म पश्चात्तु विनष्टा सा रुचिः स्वयम् ॥ ३१ ॥
वरं द्रोहीत्यपि ख्यातिर्न तु दासप्रजागतिः ।
को वाऽधमोऽपि स्वामित्वं निजगेहे न काङ्क्षति ॥ ३२ ॥
प्रजाधिपत्यमण्डल्यां न तु साम्राज्यमण्डले ।
पौरत्वं सुचिरात्कालादभिगन्तुमभीप्सितम् ॥ ३३ ॥
योगः प्रजाधिपत्यानामन्योन्यस्य शुभावहः ।
भगवत्कृपया भूयादविच्छेद्यः स सर्वदा ॥ ३४ ॥
एकस्तु घटनां भेत्तुमावयोर्यदि कामयेत् ।
स्वतन्त्रोऽस्तु तथा कर्तुमिति राष्ट्रसभामतिः ॥ ३५ ॥

घटना न हठात्कार्या तादृश्याशु हि नश्वरी ।
पटुनापि न संयोगः सुकरो जतुकाष्ठयोः ॥ ३६ ॥

समाप्तिं गमिते वादे गान्धिना वाक्पटीयसा ।
अमात्यमण्डलाधीशः प्रत्यभाषत निर्णयम् ॥ ३७ ॥

सभायामग्रिमायां यच्चक्रगोष्ठ्यां विनिश्चितम् ।
सौलम्बनस्वराज्यत्वं राष्ट्रसोदर्यकूटता ॥ ३८ ॥

जातिभेदानुरोधेन सदस्यवरणे स्वता ।
त्रितयं नाचिरादेतत् प्रचारपथमेष्यति ॥ ३९ ॥

इत्यतर्कितमाकर्ण्य वचनं मुख्यमन्त्रिणः ।
धन्योक्तिसमुदाचारं कृत्वा गान्धिस्तमब्रवीत् ॥ ४० ॥

दूये वक्तुमिदं श्रीमन्नावयोर्यदितः परम् ।
निश्चितं भिद्यते पन्थाः शैलेन सरितो यथा ॥ ४१ ॥

इत्थं समाप्तिमापेदे चक्रगोष्ठीमहासभा ।
महात्मनो वचः सर्वमरण्यरुदितायितम् ॥ ४२ ॥

अथानेकसमाजानामाह्वानं प्राप्य सादरम् ।
निजगाद यथातत्त्वं भारतस्य परिस्थितिम् ॥ ४३ ॥

श्रुत्वा न्यायपराः केचित्प्रतीतास्तद्गिराऽभवन् ।
अपरे स्वजनानेव मेनिरे दोषभागिनः ॥ ४४ ॥

---

1. Dominion Status. 2. Federation.

विफलीभूतकार्योऽपि निराशो नाभवन्मुनिः ।
न धीराः प्रतिपन्नार्थाद् विरमन्त्याफलोदयम् ॥ ४५ ॥

यथा गान्धिः प्रतिष्ठासुः स्वदेशं प्रति सानुगः ।
स्विस्सदेशमगान्मार्गे हिमालयसहोदरम् ॥ ४६ ॥

तत्रासीद्रोमरोलाख्यो विद्वान्मित्रं महात्मनः ।
येन पाश्चात्यदेशेषु स्वप्रबन्धैः प्रकाशितम् ॥ ४७ ॥

सत्याग्रहतपःसारं तज्जीवनकथामृतम् ।
महतां हि चरित्राणि हरन्ति सुमनोमनः ॥ ४८ ॥

निसर्गरमणीयेऽस्मिन् देवदारुप्रमोदिते ।
हिमशैलोच्चयाकीर्णे देशे मन्दानिलाश्रिते ॥ ४९ ॥

अहानि कानिचिद्गान्धिर्यापयामास मन्दिरे ।
सख्युः प्रीतिकथालापैर्देशवार्तानिबन्धनैः ॥ ५० ॥

पत्रद्वारा निशम्यासौ बान्धवाः कार्यभङ्गतः ।
नैराश्येन तमोग्रस्ता इति मित्रगृहं जहौ ॥ ५१ ॥

प्राचीमभिययौ तेषां हरिष्यन्मानसीं व्यथाम् ।
तमिस्रान्ते तमो हर्तुमुदयन्निव भास्करः ॥ ५२ ॥

इति सौ. क्षमायाः कृतिपूतसत्याग्रहगीतायां चक्रगोष्ठिविजृम्भणो नाम तृतीयोऽध्यायः ।

चतुर्थोऽध्यायः ।

अथ वंगप्रयागेषु भूकरो न समर्पितः ।
इति हेतोर्महान् क्षोभः सर्वत्र समजायत ॥ १ ॥
अत्याहितकृतः केचिद्भयंकरवधान् व्यधुः ।
गौरांगध्वंसनोद्युक्तास्त्राससंमूढचेतसः ॥ २ ॥
निहतास्त्रिशिरःपल्लिडाकामिद्नापुरादिषु ।
प्राड्विवाकाः कियन्तोऽपि मृतप्रायाः क्षताः परे ॥ ३ ॥
न्यायाधीशस्त्रिपेराया युवतीभ्यां प्रमारितः ।
हन्त भो राक्षसीक्रौर्यं दृश्यते मानुषीष्वपि ॥ ४ ॥
राष्ट्रसंघजनाः केचित्परोत्तेजनशङ्किताः ।
निरागसोऽप्यदण्डयन्त देशान्निर्वासिताः परे ॥ ५ ॥
एतेषु घोरकृत्येषु ये चात्यन्तपराङ्मुखाः ।
नायकास्तेऽपि संदृप्तैरुपालभ्यन्त शासकैः ॥ ६ ॥
श्रुत्वा वृत्तमिदं गान्धिः समर्थयितुमिष्टवान् ।
आर्जवं राष्ट्रसंघस्य राजप्रतिनिधेः पुरः ॥ ७ ॥
जगाम सिमलाशैलं निदेशश्चागतो यथा ।
राष्ट्रसंघस्य संबन्धं विना चेन्मामुपैष्यसि ॥ ८ ॥
अत्याहितेषु संबन्धान् नो चेद्द्रक्ष्यसि मत्पुरः ।
स्वागतं ते करिष्यामि गेहमागम्यतां मुदा ॥ ९ ॥

मान्त्रिरुवाच ।

अदोषतां स्वबन्धूनां नाङ्गीकर्तुमिहोत्सहे ।
यदि तत्रभवान्युक्तमुत्तरं न प्रदास्यति ॥ १० ॥
विचारं चाभिशस्तानां न्यायतो न करोति चेत् ।
शासनानां पुनर्भङ्गो भविता नात्र संशयः ॥ ११ ॥

प्रतिनिधिः प्राह ।

सुप्रतिष्ठितराज्येऽस्मिन्न सहन्ते प्रशासकाः ।
तर्जनामीदृशीं संघैः क्रियमाणामधर्मतः ॥ १२ ॥
अथ व्यर्थेऽग्रिमोपाये चरमं शरणं वदन् ।
उज्जुघोष महात्मासौ शासनोल्लङ्घनक्रमम् ॥ १३ ॥
तावदुद्घोषमात्रेण स निगृह्याधिकारिभिः ।
वासितो राजबन्दीव न कारायां निवेशितः ॥ १४ ॥
अन्ये ततश्च नेतारः पटेलप्रमुखादयः ।
शतशो बन्धने क्षिप्ता गर्ते हिंस्रमृगा इव ॥ १५ ॥
उत्पादयितुमिच्छद्भिर्लोकानां हृदये भयम् ।
क्रूराण्यभूतपूर्वाणि शासनानि चकल्पिरे ॥ १६ ॥
अथ नव्याद्भुताकारः शासनानां समुच्चयः ।
वर्षास्विव शिलींध्राणां सहसैव समुत्थितः ॥ १७ ॥
तथाहि पुरुषो वा स्त्री सत्याग्रहविशङ्कितः ।
निरागा अपि रुध्येत राजकीयाधिकारिणा ॥ १८ ॥

विचारणा विनाप्यस्य वसतौ यत्नादिकम् ।
हृत्वा तदधिकार्येनं क्षिपेत्कारालये ततः ॥ १९ ॥
यः कोऽपि प्रतीबध्नीयाद्यदि क्षेत्रकरार्पणम् ।
दण्डयेदधिकारी तं क्षिपेद्वा बन्धनालये ॥ २० ॥
राजशासनभंगाय समाजो यः समुद्यमम् ।
कुर्यादक्रमकूटोऽयमुद्घोष्यो दण्ड्य एव च ॥ २१ ॥
जनो विदेशवस्तूनां रुन्धानः क्रयविक्रयौ ।
अवष्टभ्य ग्रहीतव्यः क्षेप्तव्यश्चापि बंधने ॥ २२ ॥
आंग्लवस्त्रबहिष्कारमुच्चैर्यः कोऽपि घोषयेत् ।
स भवेत्तेन दण्डार्हो यथावदधिकारिभिः ॥ २३ ॥
आशु प्ररूढमूलोऽयं दुःशासनविषद्रुमः ।
अनर्थफलसाहस्रं भारतान्तरवाकिरत् ॥ २४ ॥
नूत्नः प्रतिनिधी राज्ञो विलिंग्डनसमाह्वयः ।
सार्धमासान्तरे संघं निर्मूलयितुमैहत ॥ २५ ॥
सत्याग्रहरणस्यायं स्वरूपं न तु बुद्धवान् ।
चिरेण खलु बध्नाति फलं सत्याग्रहद्रुमः ॥ २६ ॥
सत्याग्रहरणे पूर्वं स्वातन्त्र्याय जनुर्भुवः ।
पञ्चत्रिंशत्सहस्राणि प्रजानां बन्धनं ययुः ॥ २७ ॥
प्रजानवतिसाहस्रमिदानीं दशमासतः ।
विवेश बन्धनं पूर्णस्वराज्यप्राप्तिकामुकः ॥ २८ ॥

तत्र ते रक्षिणां वर्गैं रहस्यं ज्ञातुमिच्छुभिः ।
आबालवनितावृद्धं चित्रहिंसास्पदीकृताः ॥ २९ ॥
यातनां दुस्सहामाहुर्जनितां यमकिङ्करैः ।
नूनमेते न जानन्ति राजकिङ्करकल्पिताम् ॥ ३० ॥
बन्दीजनः पुरा रक्षैस्तर्ज्यते स्म मुहुर्मुहुः ।
यथाशोकवने सीता बहुधा रक्षसां गणैः ॥ ३१ ॥
क्व सन्ति संघपत्राणि कुत्र वो राष्ट्रसेवकाः ।
इति पृच्छाशतैरन्ये ताड्यन्ते स्म च लोष्टकैः ॥ ३२ ॥
कस्यचित्तेऽधिवक्तुः स्म विकर्षन्ति शिरोरुहान् ।
एकैकशो रहस्यानि तन्मुखाद् ज्ञातुमिच्छवः ॥ ३३ ॥
स तु सत्यव्रती धीरो ररक्ष मुखमुद्रणाम् ।
कुमुदोन्मीलने नालं रविश्चण्डकरैरपि ॥ ३४ ॥
क्रूरशासनवृन्देऽस्मिन् कल्पितेऽपि प्रशासकैः ।
राष्ट्रसंघोद्यमो नित्यं क्रमते स्म यथातथम् ॥ ३५ ॥
नगरारक्षकाणां च प्रजानां च पुरा यथा ।
सत्याग्रहरणे क्षोभस्तथेदानीं न लक्षितम् ॥ ३६ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां भूकरविधारणो
नाम चतुर्थोऽध्यायः ।

२ सत्या०

पञ्चमोऽध्यायः ।

राष्ट्रसंघोऽद्य शान्तार्चिरिति मेने कश्चिज्जनः ।
नाविकोऽपि न जानाति ज्वलनं लीनमम्बुधौ ॥ १ ॥
वार्षिकेऽथ निषिद्धेऽपि राष्ट्रसंघस्य मेलने ।
कतिचिन्मिलिता एव मुहूर्त हस्तिनापुरे ॥ २ ॥
संक्षेपतः सभाकार्यं साङ्गं निर्वर्त्य सा सभा ।
उच्चैरुद्घोषयामास निर्णयानां चतुष्टयम् ॥ ३ ॥
पूर्णस्वराज्यलाभो नः परमा गतिरीप्सिता ।
अभिनन्द्याः समेऽस्माकं धीराः शासनभञ्जकाः ॥ ४ ॥
निधाय पूर्णविश्वासमाज्ञा कार्या महात्मनः ।
अहिंसाव्रतपाला ये प्रकोपे सुमहत्यपि ॥ ५ ॥
ते सर्वे धन्यवादार्हाः प्रान्तीयास्तु विशेषतः ।
इति निर्णयनिर्घोषः श्रुतोऽभूदधिकारिभिः ॥ ६ ॥
मालवीयः सभाध्यक्षः श्रीमान्मदनमोहनः ।
निर्गतो नगरान्मार्गे रुद्धः पश्चात्तु मोचितः ॥ ७ ॥
निगृहीतेषु सर्वेषु राष्ट्रसंघस्य नेतृषु ।
अयमेको महाभागः स्थितोऽभूद्बन्धनाद्बहिः ॥ ८ ॥
दुर्बलोऽपि स वार्धक्यादश्रान्तो राष्ट्रकर्मणि ।
नित्यं प्रोत्साहयामास देशभक्त्या स्वबांधवान् ॥ ९ ॥
अमोघसत्त्वसम्पन्नो निर्भयः स्थिरनिश्चयः ।
प्राकाशयद्दुराचारान् वृत्तपत्रेऽधिकारिणाम् ॥ १० ॥

बहवः कर्मशीलास्तं युवानः संशयालवः ।
उपेत्य बोधितास्तेन प्रयान्ति स्म विसंशयाः ॥ ११ ॥

इति सौ. क्षमायाः कृतिभूत्तरसत्याग्रहगीतायां दिल्लीक्षणिकसभानिर्णयघोषणो नाम पञ्चमोऽध्यायः ।

षष्ठोऽध्यायः ।

विदधे बंधनात्पूर्वं वल्लभार्यैः सुयोजना ।
संघाधिपत्ययोग्यानां नामावलिविलेखनाम् ॥ १ ॥
हृते हृते सभाध्यक्षे पदेऽतिष्ठत्परः परः ।
केचित्सप्ताहपर्यन्तमपरे द्वित्रवासरान् ॥ २ ॥
इतरे घटिकाषट्कमध्यक्षीभूय निर्गताः ।
कारालयमलञ्चक्रुर्नरेन्द्रातिथ्यमानिताः ॥ ३ ॥
तथाप्यन्येऽवशिष्टा ये निराशा नाभवन् जनाः ।
अधिकं धैर्यमाश्रित्य चक्रुस्तीव्रतरोद्यमम् ॥ ४ ॥
आंग्लदेशसमृद्धिः स्यात्तद्देशोत्पन्नविक्रयात् ।
भारतस्य च दारिद्र्यं खादीविक्रयवर्जनात् ॥ ५ ॥
स्वयमेव स्वदेशस्य मा भूत क्षतिहेतवः ।
विरम्यतामतः सद्यः स्पर्शनादन्यवस्तुनः ॥ ६ ॥
इति प्रार्थयमानास्ते वणिजान् देशसेवकाः ।
यष्टिप्रहारदानेन कारातिथ्यमवापिताः ॥ ७ ॥

वंगप्रयागदेशेषु स्वयंसेवकबोधितः ।
कृषीवलगणः सर्वो व्यरमत्करदानतः ॥ ८ ॥
धिकृत्य बहुदेशेषु प्रजा लवणशासनम् ।
स्वयं लवणनिर्माणं चक्रुस्तस्य च विक्रयम् ॥ ९ ॥
इदं जैत्रदिनं गान्धेरिदं नेरुदिनं शुभम् ।
इति राष्ट्रपताकास्ते समुन्नाम्य ववल्गिरे ॥ १० ॥
यदा मुद्रणयन्त्राणि प्रतिबद्धानि शासकैः ।
साधनैर्हस्तलेखाद्यैस्तदोदन्तः प्रचालितः ॥ ११ ॥
इत्थं प्रात्यहिकं वृत्तं विविदुः सर्वतो जनाः ।
बन्दीकृतजनक्लेशानितरेषां च पीडनम् ॥ १२ ॥
अवरुद्धजनैः काराः पूरयन्ति स्म शासकाः ।
यथा गड्डुरिकावृंदैर्वध्यशालाः पलाशकाः ॥ १३ ॥
प्रग्रहेषु च भूयिष्ठा हीनवर्गाधिवासिताः ।
आरक्षकैरपीड्यन्त चोरवध्यसमं बत ॥ १४ ॥
बन्दीनां मध्यमे वर्गे संख्या स्तोकतराऽभवत् ।
कारासु प्रथमो वर्गः शून्य एव सदा स्थितः ॥ १५ ॥
प्रचचालोद्यमोऽद्यापि पूर्वसत्याग्रहोपमः ।
परंतु तीव्रसंवेगं भेजे स्थिरतरीकृतः ॥ १६ ॥
शासकैर्निग्रहक्रौर्यमपि गाढतरीकृतम् ।
प्रत्यहं च प्रजापीडा समभूदधिकाधिका ॥ १७ ॥

नायकेष्ववरुद्धेषु संघोऽभूद्धनवर्जितः ।
अज्ञातनामदातृभ्यः प्रापैव तु पुनर्धनम् ॥ १८ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां सत्याग्रहनिरोधनो नाम षष्ठोऽध्यायः ।

सप्तमोऽध्यायः ।

बन्धनानन्तरं गान्धेरांग्लदेशात्समाययौ ।
लोधियन्नाम नीतिज्ञः पौषमासे समण्डलः ॥ १ ॥
विनिर्णेतुं स पौराणां सदस्यवरणार्हताम् ।
जात्या विभिन्नवर्णानामधिगम्य पदानि च ॥ २ ॥
राजाज्ञया नियुक्तोऽभूत्किल देशहिताय नः ।
गान्धेः सर्वमनादृत्य प्रागुक्तं चक्रसंसदि ॥ ३ ॥
अन्त्यजानामनर्थाय हिन्दुवर्गात्पृथक्कृतिः ।
इति क्लिश्यन्पुनर्गान्धिः प्रतिरोद्धुमियेष ताम् ॥ ४ ॥
श्वेतपत्रमिदं राष्ट्रप्रतिकूलार्थदूषितम् ।
कृष्णयज्जनचेतांसि व्याहतार्थं हि वर्तते ॥ ५ ॥
लिलेख निश्चितं पत्रमन्त्यजानां सुहृन्मणिः ।
सामुयल्होरसंज्ञाय सर्वभारतमन्त्रिणे ॥ ६ ॥
अथ प्रेषितवान्मन्त्री मुंजडीभूतमुत्तरम् ।
मनाक् प्रतीक्ष्यतां यावल्लोधियन्कूटनिर्णयः ॥ ७ ॥

एष वस्तदनुप्रश्नो विचारपथमेष्यति ।
अन्तिमो निर्णयस्तावत्प्रधानामात्यमाश्रितः ॥ ८ ॥
तदासीत्तत्पदे श्रीमान्माक्डोनल्डसमाह्वयः ।
स च प्रोद्घोषयामास भारते निर्णयं यथा ॥ ९ ॥
अन्त्यजानां भवेद्भिन्नं वरणं हिन्दुवर्गतः ।
वरणेऽप्यधिकास्तेषामधिकाराः प्रकल्पिताः ॥ १० ॥
इति श्रुत्वा महात्मासौ निश्चितः प्रायमासितुम् ।
न्यवेदयदमात्याय निरुन्धानोऽस्य निर्णयम् ॥ ११ ॥
तस्योपवासवृत्तान्तः प्रसृतः सर्वभारते ।
मनांसि ज्वलयन्नृणां दावाग्निरिव शाखिनः ॥ १२ ॥
आश्चर्यर्णवे जने मग्ने महात्मानं दिदृक्षवः ।
मालवीयादयः प्राज्ञाः समेयुः पुण्यपत्तनम् ॥ १३ ॥
याच्यमानोऽप्यसौ नैतान्वीक्षितुं प्रत्यपद्यत ।
न्यषेधीच्च महात्मैषामपि काराल‍यागमम् ॥ १४ ॥
आहिमाचलमासेतोरुपवासविवर्जनम् ।
पररसहस्रसन्देशैरयाचन्त प्रजा मुनिम् ॥ १५ ॥
तस्य जीवितरक्षायै यतमाने सुहृज्जने ।
सावहेलमवैक्षन्त केचिदीर्ष्यालवः खलाः ॥ १६ ॥
कथं नीचा विजानीयुर्धर्म्यैकृत्यं महीयसाम् ।
न वेत्ति कौटिको धर्म्या परिरक्षा गवामिति ॥ १७ ॥

वातग्रस्तोऽस्त्ययं गान्धिरित्याहुर्लघुचेतसः ।
कूटवृत्तिर्बलात्कारी सोऽयमित्यपरेऽब्रुवन् ॥ १८ ॥
गान्धिः प्रोवाच तान् लोकान् वृथाक्षेपविधायकान् ।
न कूटं न बलात्कारः फलाप्त्यै सेव्यते मया ॥ १९ ॥
स्नेहस्यैव पराकाष्ठा नियोजयति मां व्रते ।
सत्ययज्ञं करिष्यामि स्वदेशस्य शिवङ्करम् ॥ २० ॥
तस्मिन्प्रेमपवित्राग्नौ होष्यामि मदुपोषणम् ।
सत्ययज्ञफलं लोकाः प्राप्नुवन्तु मम श्रमैः ॥ २१ ॥
जीवितादधिकं स्याच्चेद् ध्रुवं दास्ये तदाप्यहम् ।
अस्पृश्यताभिशापस्य प्रमार्जनचिकीर्षया ॥ २२ ॥
न मे प्राणाधिकं किञ्चित्ततो दास्यामि तन्मुदा ।
स्वराज्यादपि मे प्रेयो ह्यन्त्यजानां विमोचनम् ॥ २३ ॥
कलङ्कमुक्तिसंदेशः प्रतिगेहं विगाहताम् ।
अन्त्यजानां महोल्लासं हृदयेषु समर्पयन् ॥ २४ ॥
ध्यानयोगबलादेका सूक्ष्मवाणी हृदन्तरे ।
श्रूयते स्पष्टनिर्भासा सा हि मे मार्गदर्शिनी ॥ २५ ॥
तत्प्रचोदनयैवेदमुपवासव्रतं श्रितम् ।
इत्याक्षेपसमाधानमकरोत्पुरुषव्रती ॥ २६ ॥
इत्येकान्तस्थिरे गान्धौ हिन्दवस्तं रिरक्षवः ।
निश्चिक्युर्विफलीकर्तुं निर्णयं मुख्यमंत्रिणः ॥ २७ ॥

कर्तव्यं तत्र संमत्या संवादेन परस्परम् ।
इति तत्प्रमुखो राजनामा मार्गमदर्शयत् ॥ २८ ॥
पण्डितैर्मालवीयाद्यैः परमानिष्टशङ्किभिः ।
राष्ट्रसंघाद्बहिर्भूताः समाहूयन्त नायकाः ॥ २९ ॥
सभायाममिलन् सर्वे मोहमय्यामतित्वराः ।
अम्बेडकरराजेन्द्रप्रमुखाश्चोपतस्थिरे ॥ ३० ॥
आन्द्रुलान्सबरीभ्यां च पोलाकेन च लण्डने ।
उपवासकथा गान्धेः प्रकाश्यत सहेतुका ॥ ३१ ॥
अमी सहृदया आंग्लाः प्रोचिरे दूरदर्शिनः ।
वित्त प्राणात्ययो गान्धेर्महोत्पातसमो भवेत् ॥ ३२ ॥
अत्रान्तरे पुरोगामी राजाख्यः कश्चिदन्त्यजः ।
प्रार्थयिष्यन्महात्मानं तत्वरे पुण्यपत्तनम् ॥ ३३ ॥
तन्त्रीसंदेशतः कैश्चिदांग्लदेशसुहृद्वरैः ।
उपवासपरित्यागं महात्मा प्रार्थितोऽभवत् ॥ ३४ ॥
अलिखत्सादरं गान्धिः पुनर्मञ्त्रिवरीयसे ।
प्रतिपन्ना प्रतिज्ञेयमन्त्यजानां हितेच्छया ॥ ३५ ॥
बहूनां दूयते चेतो यद्यपि प्रायनिश्चयात् ।
तथापि धर्मनिष्ठस्य गतिरन्या न विद्यते ॥ ३६ ॥
निश्चयान्न चलिष्यामि मोचितोऽपि प्रशासकैः ।
उपायः प्रतिरोद्धुं वो नास्ति हन्त परो भुवि ॥ ३७ ॥

या भवन्निर्णयस्तेषामनर्थायेति मे मतिः ।
सा कदाचिदविज्ञानात्प्रमादजनिता भवेत् ॥ ३८ ॥
तादृशप्रत्यवायस्य प्रायश्चित्तं भवेन्मृतिः ।
असंख्यनरनारीणां चिन्तामुक्तिश्च मत्कृते ॥ ३९ ॥
यदि न्याय्या मतिर्मे स्याद्यथा मे प्रत्ययो दृढः ।
तदाहं सुचिराभ्यासात्सत्ययज्ञफलं लभे ॥ ४० ॥
भगवत्प्रेरणामूलं व्रतमेतदुपाश्रितम् ।
भगवत्प्रेरणायां हि श्रद्धा भक्तिश्च मे परा ॥ ४१ ॥
जीवेयमपि सेवार्थं यदि भागवती कृपा ।
तं विना शरणं नान्यस्तदिच्छां को निवारयेत् ॥ ४२ ॥
न कोऽप्यस्पृश्यताख्यात्या लाञ्छनीयः स्वदेशजः ।
चातुर्वर्ण्यव्यवस्थायामपि नेदं हि दृश्यते ॥ ४३ ॥
इत्युक्तोऽपि न चामात्यश्चचाल क्रूरनिर्णयात् ।
अमृतासारसिक्तापि किं शिला मृदुलायते ॥ ४४ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां श्वेतपत्रपरिवर्तनयत्नो नाम सप्तमोऽध्यायः ।

अष्टमोऽध्यायः ।

आदौ श्रीमालवीयाद्यैः कृता मुम्बापुरे सभा ।
आम्बेडकरराजेन्द्रप्रमुखाश्चात्र संगताः ॥ १ ॥

निर्णीतं तत्र तैः सर्वैः सन्निधौ यन्महात्मनः ।
ऐकमत्येन कर्तव्यः संधिरस्पृश्यताहरः ॥ २ ॥
काले तदनुरोधेन नीतिज्ञाः पुण्यपत्तने ।
परितोषाय सर्वेषां संधिकामाः समागताः ॥ ३ ॥
निरणायि पुरो गान्धेरेककण्ठस्वरेण तैः ।
यदेतद्दिनमारभ्य हिन्दुभिर्जन्मकारणात् ॥ ४ ॥
अन्त्यजास्पृश्यसंज्ञाभ्यामद्य यावद्विमानिताः ।
इतःपरं हि ते मान्याः सर्वे हरिजनाख्यया ॥ ५ ॥
न कोऽप्यस्पृश्यताख्यात्या लाञ्छनीयः स्वदेशजः ।
चातुर्वर्ण्यव्यवस्थायामपि नेदं हि दृश्यते ॥ ६ ॥
इतः परं च येऽस्माभिरस्पृश्याख्याकलङ्किताः ।
हिन्दुभिर्निर्विशेषा स्यात्तेषामप्यधिकारिता ॥ ७ ॥
सार्वलौकिककूपाध्वपाठशालोपयोजने ।
तथा सार्वजनीनान्यसंस्थानामपि सेवने ॥ ८ ॥
स्वदेशप्रमुखैः सर्वैः स्वधर्म इति सादरम् ।
इतरेऽपि कलङ्काश्चेदपोह्यास्तेऽपि सत्वरम् ॥ ९ ॥
मन्दिराद्यो बहिष्कारः समाजेनान्त्यजोपरि ।
चिरादारोपितो रूढ्या स निष्कास्य इतःपरम् ॥ १० ॥
अधिकारपदार्हाः स्युरन्त्यजा अपि हिन्दुवत् ।
नियोज्याश्च पदे श्रेष्ठे वरणीया यदि स्वयम् ॥ ११ ॥

साम्राज्यशासनाङ्गत्वं संधाननियमा इमे ।
प्राप्तकालं प्रपत्स्यन्ते तदभावे तु निश्चितम् ॥ १२ ॥
इदमस्पृश्यताङ्कस्य मूलोत्पाटनसिद्धये ।
स्वराज्यशासनव्यूहे भवेत्प्रथमशासनम् ॥ १३ ॥
शिक्षणायान्त्यजानां च प्रतिवर्षं प्रशासकैः ।
यथा धनं सुरक्ष्येत प्रार्थनीयास्तथा हि ते ॥ १४ ॥
इत्थं धर्मोत्तरः संधिः समाप्तः पुण्यपत्तने ।
जज्ञे हिन्दुसमाजस्य मनःसंशुद्धिकारकः ॥ १५ ॥
अथार्कास्तमये गान्धिः स्निग्धलोकैः समन्वितः ।
प्रदोषप्रार्थनां चक्रे भगवद्गीतिपावनीम् ॥ १६ ॥
ततोऽन्त्यजसमुद्धर्ता परं सन्तुष्टचेतसा ।
सेव्यमानः सरोजिन्या जहौ प्रायोपवेशनम् ॥ १७ ॥
आसेतोरातुषाराद्रिं रेजे तत्कीर्तिमण्डलम् ।
तत्तीव्रतपसः पुण्यं भेजे च क्षितिमण्डलम् ॥ १८ ॥
आबालप्रमदावृद्धं त्यक्तसर्वोद्यमा जनाः ।
अन्त्यजोद्धारसेवायां बभूवुः परमादृताः ॥ १९ ॥
इत्थमन्त्यजसेवायाः प्रसारं वीक्ष्य शासकाः ।
लोकान्न्यषेधयन् गान्धेर्दर्शनादीर्ष्यया हृताः ॥ २० ॥
कस्तुराम्बां च तत्पत्नीं तत्पार्श्वादपनिन्यिरे ।
यथोपवासतः पूर्वं गान्धिर्बन्दीकृतः स्थितः ॥ २१ ॥

विना सहचरान् हन्त जनान्हरिजनप्रियान् ।
कथं भोः परिसेवेय दीनानेतान् यथाविधि ॥ २२ ॥
वितनोति च साहाय्यं कार्ये मत्सहधर्मिणी ।
अतः शरण्यहीनोऽस्मि भग्ननौका यथाम्भसि ॥ २३ ॥
शासकानिति विस्पष्टं विरुन्धाने महात्मनि ।
तत्पार्श्वे स्थापिता भूयः कस्तुराम्बा तपस्विनी ॥ २४ ॥
जना हरिजनानां च परिसेवापरायणाः ।
पश्यन्तु तं यथाकालमित्यादिष्टं च शासकैः ॥ २५ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायामस्पृश्यताभञ्जनो नामाष्टमोऽध्यायः ।

नवमोऽध्यायः ।

षण्मासानन्तरं हन्त कल्कत्तानगरेऽभवत् ।
वार्षिकं राष्ट्रसंघस्य निषिद्धमपि मेलनम् ॥ १ ॥
अध्यक्षपदमारोढुं श्रीमान्मदनमोहनः ।
अभियास्यन् पुरीं मार्गे जगृहे राजपूरुषैः ॥ २ ॥
अस्याभिग्रहणं साधोः प्रजोत्साहमवर्धयत् ।
नानादिग्देशसंप्राप्ताः सभास्थानेऽमिलञ्जनाः ॥ ३ ॥
अथ सभ्यैर्वृतोऽध्यक्षः श्रीमानाणेमहाशयः ।
पदं तदुरीकृत्य प्रवृत्तः कार्यचालने ॥ ४ ॥

अवष्टभ्य गृहीतोऽभूदन्ये च प्रमुखास्तथा ।
श्रीगुप्तस्यांग्लभार्या च श्रीनेरोः सहधर्मिणी ॥ ५ ॥
सभाप्रतिनिधीनां च संदोहः पुररक्षिभिः ।
प्रताडितोऽपि विष्टभ्य स्थितोऽभूद्भयवर्जितः ॥ ६ ॥
तज्जनार्णवकल्लोले रक्षिनक्रैर्विलोडिते ।
उद्घोषि स्वरेणोच्चैः सभानिर्णयसप्तकम् ॥ ७ ॥
पूर्णस्वराज्यतोऽस्माभिर्न्यूनं नाङ्गीकरिष्यते ।
प्रजाधिकाररक्षायै दुर्णयानां विमर्दनम् ॥ ८ ॥
युक्तमेव न दोषाय मानिनामीप्सितासये ।
तीव्रसंवेगमास्थाय चालनीयः समुद्यमः ॥ ९ ॥
परदेशीयवस्त्राणि बहिष्कार्याणि सर्वतः ।
भारतीयैश्च निःशेषैर्निषेव्यं खद्दराम्बरम् ॥ १० ॥
क्रूरशासनयोगेन नियन्त्रयति यः प्रजाः ।
स शासको न चास्माकमवधेयो भविष्यति ॥ ११ ॥
नव्यशासननिर्लेखः प्रधानसचिवेन यः ।
श्वेतपत्राभिधानेन भारतार्थे प्रकाशितः ॥ १२ ॥
तेन प्रतारितो मा भूज्जनो देशहिते रतः ।
यदयं स्वप्रभुत्वस्य स्थिरीकाराय कल्पितः ॥ १३ ॥
नचिरान्मालवीयार्या भूयिष्ठाश्च सभासदः ।
बभूवुर्बन्धनान्मुक्ता राष्ट्रसंघसमापने ॥ १४ ॥

प्राज्ञो निर्मुक्तमात्रोऽयं श्रीमान्मदनमोहनः ।
सत्यवागिति विख्यातः कलकत्तापुरं ययौ ॥ १५ ॥
तत्र प्रख्यापयामास निदर्शनपुरस्सरम् ।
रक्षिणां पाशवीं वृत्तिं सभास्तारविमर्दिनीम् ॥ १६ ॥
राष्ट्रसंघसभाभंगव्यापाराय निरङ्कुशाः ।
तीव्रदण्डप्रहारैस्ते यथा चक्रुर्विहिंसनम् ॥ १७ ॥
धीरमाह्वयते स्मासौ राजकीयमहत्तरान् ।
रक्षिणां वृत्तमुद्दिश्य विचारः क्रियतामिति ॥ १८ ॥
परन्तु शासकास्तेषां विदित्वाप्यपराधिताम् ।
अनेडमूकतां प्राप्य प्रभुदर्पमरक्षिषुः ॥ १९ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां मालवीयप्रधर्षणो
नाम नवमोऽध्यायः ।

दशमोऽध्यायः ।

उपवासं पुनर्गान्धिरग्रहीदात्मशुद्धये ।
कर्तुं हरिजनश्रेयस्कारिणां च सहायताम् ॥ १ ॥
सोऽब्रवीदुपवत्स्यामि दिनानामेकविंशतिम् ।
प्रार्थ्ये शुद्धिं परात्मानं शक्तिं च सहकारिणीम् ॥ २ ॥
सर्वतः सुहृदो भक्त्या प्रार्थयन्तु महेश्वरम् ।
यथा सत्यपरीक्षां तामुत्तरेयं सुरक्षितः ॥ ३ ॥

स पक्षो विजयीभूयाद्यदर्थं मदुपोषणम् ।
मृतिर्मेऽस्तु धृतिर्वाऽस्तु यथेच्छा परमात्मनः ॥ ४ ॥
सनातनमतालम्बाः प्रार्थयन्तु जगत्प्रभुम् ।
परिणाममनादृत्य व्रतस्याङ्गीकृतस्य मे ॥ ५ ॥

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
यथा स्वधर्मकृत्यानां महिम्ना स्यादपावृतम् ॥ ६ ॥
महात्मा बन्धनान्मुक्तो वृत्तपत्रेष्वलेखयत् ।
वोढव्यः कार्यभारो मे मुक्त्या गुरुतरीकृतः ॥ ७ ॥
विमोचनमिदं मन्ये न मे सौख्यप्रदायकम् ।
दुःसहः सत्यजिज्ञासोर्भारो मानसिकश्रमात् ॥ ८ ॥
जायेत यदि विक्षोभो विवादो वा जनेष्वितः ।
उपोषणस्य हेतुर्मे भविष्यति निरर्थकः ॥ ९ ॥
किंतु शासनविध्वंसे मतं मे नान्यथाकृतम् ।
धीरास्ते धन्यवादार्हाः सर्वे शासनभञ्जकाः ॥ १० ॥
गूढता राष्ट्रकार्येषु श्रीयते यदि सर्वशः ।
भविता निश्चितं सा हि कार्यसिद्धिविनाशिनीम् ॥ ११ ॥
अनुशास्मि ततो नेतॄन् यदि शासनभञ्जकः ।
न स्यादेकोऽपि नो ह्यनिस्त्यज्यतां गुप्तकारिता ॥ १२ ॥
युष्माभिः कार्यसिद्धिश्चेत् निश्चितं प्राप्तुमिष्यते ।
सद्गुणो न पुनः संख्या पुरुषाणामपेक्ष्यते ॥ १३ ॥

प्रार्थये च सभाध्यक्षं श्रीमदाणेमहाशयम् ।
न कार्या शासनोच्छित्तिरासमाप्तिव्रतस्य मे ॥ १४ ॥
प्रार्थये शासकांश्चापि राष्ट्रे शान्तिर्यदीष्यते ।
यदि तैः शासनं नूत्नमयोग्यमिति मन्यते ॥ १५ ॥
तदा शासनसंदोहो निष्कास्यस्तादृशोऽखिलः ।
बन्धनाच्च विमोक्तव्याः सर्वे शासनभञ्जकाः ॥ १६ ॥
दिष्ट्या सत्यपरीक्षां चेदुत्तरेयमिमामहम् ।
नायकानुपदेक्ष्यामि वीक्ष्य तात्कालिकीं स्थितिम् ॥ १७ ॥
नातिसाहसिकं चेन्मां गणयिष्यन्ति शासकाः ।
मन्त्रयिष्ये च तैर्भूयो मान्यसंधानसिद्धये ॥ १८ ॥
संघशासकयोर्मध्ये न चेत्संधिः कृतो भवेत् ।
पुनः शासनभंगाय प्रवर्तन्ते प्रजा ध्रुवम् ॥ १९ ॥
पुनर्नियन्त्रणाः क्रूरा रचयन्त्यधिकारिणः ।
पीडयन्तु जनान् भूयो मेषवत्सान् यथा वृकाः ॥ २० ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां त्रिसप्ताहिकोपोषणो नाम दशमोऽध्यायः ।

एकादशोऽध्यायः ।

गान्धिरुवाच ।

शासकाः शान्तिकामाश्चेदार्जवेन च संयुताः ।
राष्ट्रसंघस्य योगेन सुव्यवस्था न दुष्करा ॥ १ ॥

किंतु प्रजासहस्रेषु कारानिरयवर्तिषु ।
प्रजाशासकयोर्मध्ये संधिवार्ता कथं भवेत् ॥ २ ॥
यावन्नेरुगफार्खानश्रीमद्वल्लभनायकाः ।
भूगर्भे वासितास्तावन्न शक्या कापि योजना ॥ ३ ॥
एतेषु बन्धनस्थेषु स्थिता ये बन्धनाद्बहिः ।
सर्वथा न विरंस्यन्ति शासनातिक्रमादमी ॥ ४ ॥
लेखका वृत्तपत्राणां प्रेक्षकाश्च ममापरे ।
नोपरुन्धन्तु मां तावत्प्रार्थये साग्रहं पुनः ॥ ५ ॥
राष्ट्रवादो न मे शक्यः कर्तुमद्योपवासिनः ।
अद्यापि बन्धनस्थं मां मन्यतामखिलो जनः ॥ ६ ॥
शासकेभ्यः प्रतिज्ञातुं शान्तिमिच्छाम्युपोषणे ।
यथा मुक्तेर्न शङ्केरन्मया दुरुपयोजनम् ॥ ७ ॥
उपांशु वा प्रकाशं वा न किञ्चित्क्रियतां जनैः ।
यावद्व्रतसमाप्तिं मे शासकानां विरोधनम् ॥ ८ ॥
कृतेऽप्येवं तमोग्रस्ता वर्तते चेत्परिस्थितिः ।
याचिष्ये शासकान्भूयः कारायां मन्निवासनम् ॥ ९ ॥
गान्धेर्मतमिदं बुद्ध्वा श्रीमानाणेमहोदयः ।
शासनोल्लंघनाल्लोकान्मासद्वयमवारयत् ॥ १० ॥
तथापि शासकैर्बन्धान्[१] बान्धवा न विमोचिताः ।
मुक्ताः क्षोभं पुनः कुर्युरिति शङ्काहतैः किल ॥ ११ ॥

१ सत्या०

अथ शर्मण्यदेशान्तर्मण्डलाद् व्हियनापुरात् ।
कालेऽस्मिन्नेव संप्राप्तं पत्रं गर्हणगर्भितम् ॥ १२ ॥
सुभाषविठ्ठलार्याभ्यां लेखे गान्धिरनिंद्यत ।
निवृत्तिः शासनोच्छेदात्पराभवनिदर्शिका ॥ १३ ॥
अतोऽयं राष्ट्रसंघश्चेदखिलः परिवर्त्यते ।
तदा पूर्णस्वराज्यं नः सन्निकृष्टं भवेदिति ॥ १४ ॥
इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां सामूहिकसत्याग्रह-
प्रतिषेधको नामैकादशोऽध्यायः ।

द्वादशोऽध्यायः ।

प्रयागनगरी कारानिलयादथ शासकैः ।
नेरुर्विमोचितः श्रीमन्मातुरस्वास्थ्यकारणात् ॥ १ ॥
मातुरन्तिक एवासौ न्यवसन्मातृवत्सलः ।
तदन्तकालपर्यन्तं शुश्रूषां रचयन् सुधीः ॥ २ ॥
ततश्च त्वरितः श्रीमानगमत्पुण्यपत्तनम् ।
तत्र पर्णकुटीवासे गान्धिसंदर्शनोत्सुकः ॥ ३ ॥
अस्य प्रत्यागमादांग्लभूमेः सुचिरमेतयोः ।
पृथक्कारालयावासान्नासीदन्योन्यदर्शनम् ॥ ४ ॥
मिलितावथ संलापं सुचिरात् वितेनतुः ।
अधिकृत्य स्वराज्यस्य भाविकार्यक्रमोदयम् ॥ ५ ॥

विरम्य कतिचिन्मासान् सत्याग्रहरणोद्यमात् ।
गान्धिर्हरिजनोद्योगे व्यवसायपरोऽभवत् ॥ ६ ॥
समर्प्य सर्वथात्मानं तदभ्युदयकर्मणे ।
निरगादाश्विने मासे देशपर्यटनाय सः ॥ ७ ॥
दशमासानसौ भ्राम्यन् भारते प्रतिमण्डलम् ।
पर्यचाययदात्मानं प्रश्नैरस्पृश्यतापरैः ॥ ८ ॥
अस्पृश्यताकलङ्कं चेत्प्रमार्क्ष्यामि तदा हि मे ।
जीवनस्येह सार्थक्यं जीवन्नपि मृतोऽन्यथा ॥ ९ ॥
इति ध्यायन्महात्मासौ सभां चक्रे प्रतिस्थलम् ।
यत्र मानवकल्लोलैः शोभते स्म जनार्णवः ॥ १० ॥
लोकाः समर्पयामासुस्तथा पादाब्जयोर्धनम् ।
यथाष्टलक्षरूप्याणां संग्रहो नचिरादभूत् ॥ ११ ॥
यद्यपि भ्रमणं गान्धेः सर्वतो विजयोम्भितम् ।
अतिवृत्तद्वयेनेदं कलङ्कितमिवाभवत् ॥ १२ ॥
तथा हि श्रीयुतं गान्धिं निवृत्तमभिनन्दितुम् ।
पौरस्वाम्यसभा पुण्यपत्तनस्य समाह्वयत् ॥ १३ ॥
महात्मा तत्र संप्राप्तः सहचारिसमन्वितः ।
सभायां स्वीकरोति स्म मानपत्रं समर्पितम् ॥ १४ ॥
तावच्च कश्चिदज्ञातस्तमग्नाभिशरव्ययन् ।
आग्नेयगुलिकामेकामक्षिपत्पुरुषाधमः ॥ १५ ॥

सान्यतः स्फुटिता दैवात्क्षताः केचित्परे जनाः ।
दिष्ट्यासौ रक्षितो गान्धिर्घातुकस्तु पलायितः ॥ १६ ॥
अन्यदा पश्यतो गान्धेरज्मीरपुरसंसदि ।
कश्चिदस्पृश्यतोच्छेदद्वेषिणश्छिन्नवान् शिरः ॥१७ ॥
अतितिक्षोर्द्विजस्यास्य कर्मणा दुःखितो व्रती ।
उपावात्सीत् स सप्ताहं प्रायश्चित्तचिकीर्षया ॥ १८ ॥
यदा यदा हि कुर्वन्ति लोकाः कृत्यमधर्मतः ।
तदा तदोपवासेन प्रायश्चित्तं करोति सः ॥ १९ ॥
सहसा क्षितिकम्पोऽभूद्विदर्भेषु भयंकरः ।
येन विस्तीर्णसंस्थानां समृद्धिर्विलयं गता ॥ २० ॥
परस्सहस्रहर्म्याणि क्षणादुद्धूलनं ययुः ।
कुलानां नियुतं हन्त निर्धनं समजायत ॥ २१ ॥
निमेषान्तरमात्रेण शिशवश्चूर्णिताः स्थिताः ।
जग्मुः प्रजासहस्राणि सहसा यमसादनम् ॥ २२ ॥
शोचनीयमिदं वृत्तं श्रुत्वा मर्मनिकृन्तनम् ।
द्रवीभूय मुनिस्तूष्णीं ममार्ज निजलोचने ॥ २३ ॥
बोधयन् जीविकामार्गं दीनानाथजनाय सः ।
मासमत्रानयद् गान्धिः परिश्राम्यन् दिवानिशम् ॥ २४ ॥
दण्डभृत्पादचारेण ग्रामाद्ग्रामं परिभ्रमन् ।
दशां कष्टतमां जज्ञौ विपदापन्नदेहिनाम् ॥ २५ ॥
आहूयच्च ततः शीघ्रं परसेवापटीयसः ।

साहाय्यकप्रदानाय तरुणान् दीनवत्सलः ॥ २६ ॥
यो दैवदुर्विपाकेन प्रध्वंसः समजायत ।
प्रायस्तद्वर्णने शक्तिर्न स्यादादिकवेरपि ॥ २७ ॥
विंशतिर्हि सहस्राणां विनेशुर्मानवाः क्षणात् ।
सिकताराशिभिश्छन्नाः सकलाः सस्यसंपदः ॥ २८ ॥
तडागानां सहस्राणि दशलक्षोत्तरा गृहाः ।
क्षेत्राणां दशलक्षाश्च विकृतध्वस्ततां ययुः ॥ २९ ॥
विपत्सागरमग्नानां समुद्धाराय जीविनाम् ।
सर्वदिग्भ्यः समापेतुः प्रभूता धनवृष्टयः ॥ ३० ॥
आदीनधनिकं लोकाश्चतुर्दिक्समवस्थिताः ।
धनं समर्पयामासुः स्वशक्त्या देशबांधवाः ॥ ३१ ॥
पंचमासान्तरे रूप्यलक्षाणां सप्तविंशतिः ।
संगृहीताभवद्येन शासकाश्चापि विस्मिताः ॥ ३२ ॥
एकविंशतिसाहस्रे स्थितेऽपि सहकारिणाम् ।
श्रीमान्नेरुरुपायातः स्वयमार्तान् सिषेविषुः ॥ ३३ ॥
नचिराद्देशभक्तोऽयं वितेने भाषणद्वयम् ।
कलकत्तापुरे निन्दन्नुग्रतामधिकारिणाम् ॥ ३४ ॥
प्रयागं प्राप्तमात्रोऽसौ न्यायस्थानमनीयत ।
घोषितो यत्र दण्डार्हश्चिक्षिपे बन्धनालये ॥ ३५ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां भूकम्पविप्लवो नाम द्वादशोऽध्यायः ।

त्रयोदशोऽध्यायः ।

मासषट्कात्पुरा केचित्पुण्यपुर्याममेलिषुः ।
राष्ट्रसंघस्य नेतारः श्रीमदाणेसमन्विताः ॥ १ ॥
दृष्ट्वा शासनविच्छेदे मतभेदं परस्परम् ।
स्वयमेकाकिना भङ्गं प्रतिजज्ञे मुनिस्तदा ॥ २ ॥
ततस्तं बन्धने क्षिप्त्वा मुक्तं बद्धं पुनः पुनः ।
कुर्वन्तः शासकाश्चक्रुः क्रीडामाखुबिडालिकाम् ॥ ३ ॥
स्वराज्यसंघ इत्यासीत्सभा पूर्वं विनिर्मिता ।
श्रीदेसाईभिषग्वर्यरायान्सारिमुखैर्जनैः ॥ ४ ॥
अकुर्वन् शासनोच्छेदं राष्ट्रसंघमहाजनः ।
चिरायावस्थितस्तूष्णीं देशविप्लवकारणात् ॥ ५ ॥
अन्सार्यध्यक्षतायां तदेका संमेलिता सभा ।
सुप्तस्वराज्यसंघस्य प्रबुद्ध्यै हस्तिनापुरे ॥ ६ ॥
कृता तत्र व्यवस्थैषा व्यक्तिशः शासनच्छिदाम् ।
ये न कुर्युर्विधेयस्तैः सदस्यवरणे श्रमः ॥ ७ ॥
भाव्यं च नवनिर्माणक्रियासु सहकारिभिः ।
प्रवेशश्चाधिगन्तव्यः सदसि न्यायकारके ॥ ८ ॥
प्रविष्टैस्तत्र कर्तव्यः प्रयत्नः सर्वथा दृढः ।
दुष्टशासनवृन्दस्य सर्वस्यापि विलोपने ॥ ९ ॥
कार्यं च श्वेतपत्रोपन्यासानां परिमर्दनम् ।
बहुनर्थविषद्रुः स्यादन्यथा दुर्णयाङ्कुरः ॥ १० ॥

अन्यच्च गान्धिना प्रोक्तं साधनीयं निरुत्तरम् ।
इति प्रोच्चैः समुद्घुष्टः संघाध्यक्षेण निर्णयः ॥ ११ ॥
श्रीमदन्सारिदेसाईरायप्रभृतयस्ततः ।
सभया प्रेरिताः पार्श्वमुपजग्मुर्महात्मनः ॥ १२ ॥
सहर्षनामनि ग्रामे विदर्भेषु तथा मुनिः ।
चकार विजने वासं मौनव्रतदिनं नयन् ॥ १३ ॥
अजानन्नेव यद्वृत्तं स्वराज्यसदसि द्रुतम् ।
अलिखद्वृत्तपत्रेषु स्वेच्छयाभीष्टमात्मनः ॥ १४ ॥
तथाहि विदितं सर्वैर्वर्तते यन्मतं मम ।
न्यायकल्पकसंस्थाया अधिकृत्य प्रयोजनम् ॥ १५ ॥
राष्ट्रसंघसदस्यानां न्यायभंगमकुर्वताम् ।
सदस्यवरणे यत्नः स्वाधिकारो न केवलम् ॥ १६ ॥
स्वधर्मश्चेति मन्तव्यः श्रद्धानैः प्रयोजने ।
कर्तव्या च प्रयत्नेन देशसेवा यथाबलम् ॥ १७ ॥
यथोक्तं हि मया पूर्वं सत्याग्रहसुदीपिकाम् ।
एकोऽपि ज्वालयेद्धीरः सत्यस्नेहमयो नरः ॥ १८ ॥
ममैव शासनोच्छेदभारो वोढव्य इत्यहम् ।
अन्तरात्मप्रसादेन स्थितोऽस्मि कृतनिश्चयः ॥ १९ ॥
सत्याग्रहस्य संदेशः सर्वलोकहृदन्तरे ।
नाद्यापि हन्त संप्राप्तः प्रवेशमिति मे मतिः ॥ २० ॥

आध्यात्मिको हि संदेशः स्वयमाशु प्रसर्पति ।
लोकयत्नस्तु मन्दः स्यादिति दृष्टं मयाटता ॥ २१ ॥
सोत्साहमिलितान् लोकानसंख्यान्देशसेवकाः ।
बभूवुर्विस्मिताः प्रेक्ष्य प्रयाणेषु स्थले स्थले ॥ २२ ॥
शक्तिराध्यात्मिकी सत्याग्रहस्यानुपमा स्थिरा ।
तुषारं द्रावयत्यर्को हिमाद्रेश्च निजोष्मणा ॥ २३ ॥
तत्सारमनभिज्ञेभ्यो नेत्रा तदभिजानता ।
ऐहिकप्रियसिद्ध्यर्थं लोकेभ्य उपयुज्यते ॥ २४ ॥
शस्त्रस्यास्य विजानीयात्प्रभावं पारमार्थिकम् ।
शल्यशास्त्रं यथा वेत्ति शस्त्रवैद्यो विचक्षणः ॥ २५ ॥
उपयोक्तुं न शक्यं तत्सर्वैः कैश्चित्तु पार्यते ।
निर्देष्टुमवतिष्ठेत पृष्ठतः कुशलो यदि ॥ २६ ॥
सोऽहं सत्याग्रहास्त्रस्य प्रयोगेऽस्मि विचक्षणः ।
भाव्यं तु सावधानेन शस्त्रवैद्यान्मयाधिकम् ॥ २७ ॥
स हि संपूर्णशिक्षावानहं त्वद्यापि शोधकः ।
सत्याग्रहः प्रकृत्यैव युगपत्सर्वदर्शनम् ॥ २८ ॥
प्रतिबध्नात्यतः शिष्यः प्रसर्पति पदात्पदम् ।
दृष्टिपूतपदन्यासी नाग्रतः स विलोकते ॥ २९ ॥
स्वराज्यप्राप्तये भंगः शासनानां न युज्यते ।
कर्तुमद्येति मन्वन्ते मदीयाश्रमवासिनः ॥ ३० ॥

अनुशास्मि ततः सर्वान् राष्ट्रसंघसभासदः ।
न्यायभंगात्स्वराज्यार्थे सद्य एव विरम्यताम् ॥ ३१ ॥
मय्येव भारमुत्सृज्य स्थीयतां मयि जीवति ।
प्रवर्तध्वं मयादिष्टा मत्तोऽभिज्ञतरेण वा ॥ ३२ ॥
अहं सत्याग्रहस्यास्मि प्रारब्धा च प्रवंर्तकः ।
अतश्च ये मया पूर्वं न्यायभंगाय चोदिताः ॥ ३३ ॥
प्रत्यक्षं वा परोक्षं वा तैरिदानीं विरम्यताम् ।
शासनोच्छेदतः क्षिप्रमिति मेऽभ्यर्थनाधुना ॥ ३४ ॥
मार्गः स्वातन्त्र्यलाभाय नास्ति श्रेयानितः परम् ।
सत्याग्रहपथादन्यो भारतस्येति निश्चयः ॥ ३५ ॥
धिग्बलं भौतिकं पुंसां सत्याग्रहबलं बलम् ।
हिंसाविग्रहयोः स्थाने प्रतिष्ठामयमर्हति ॥ ३६ ॥
प्रजानां भयमुत्पाद्य निर्वीर्यकरणादमूः ।
निर्मूलयितुमिच्छन्तः सन्ति ये क्रूरशासकाः ॥ ३७ ॥
तेषामपि मनोऽश्मानं विद्राव्य परिवाहयेत् ।
इयं सत्याग्रहज्वाला विधिना चेत्प्रवर्तिता ॥ ३८ ॥
स्वोद्यमेषु जयः प्राप्तः कामं शासनभञ्जकैः ।
हृदयं शासकानां तु न स्पृष्टमिति मे मतिः ॥ ३९ ॥
काले सज्जस्थितैर्भाव्यं कर्तुं शासनभञ्जनम् ।
शिक्षितस्वार्थसंत्यागस्वेच्छादारिद्र्यजीवनैः ॥ ४० ॥

व्यापृतैर्भवितव्यं च राष्ट्राभ्युदयकर्मसु ।
खादिकर्तनजात्यैक्यकरणादिषु तत्परैः ॥ ४१ ॥
यदा तेषां मनः स्पृष्टं तदा सत्याग्रहः फलेत् ।
एक एवास्य याथार्थ्यमन्वेषयितुमर्हति ॥ ४२ ॥
सत्याग्रहः पुरास्माभिः कदापि न परीक्षितः ।
अत एव करिष्यामि प्रयत्नं तत्परीक्षणे ॥ ४३ ॥
स्वरूपं श्रूयतामस्य पुनरेव ब्रवीमि वः ।
न हि सत्याग्रहो नाम शासनातिक्रमः परम् ॥ ४४ ॥
अपि तु क्षान्तियुक्तेन सदा सत्यगवेषणम् ।
अहिंसयैव तच्छक्तिमुपयुञ्जीत साधकः ॥ ४५ ॥
विरतः शासनोच्छेदात्किमुद्योगो भवेज्जनः ।
इति जिज्ञासमानान्वः कथयामि निशम्यताम् ॥ ४६ ॥
अस्पृश्यता पुनर्वच्मि निष्कास्या सर्वयत्नतः ।
भैषज्यमादकादीनि वारणीयानि शुद्धये ॥ ४७ ॥
उक्तसेवाक्रमोऽयं वः सहजां वितरिष्यति ।
जीविकामपि दीनाय भोगमिष्टान्नवर्जिताम् ॥ ४८ ॥
येषां तु सा न पर्याप्ता गवेष्याणि परत्र तैः ।
राष्ट्रियोद्यमशालासु कर्माण्यधिकलब्धये ॥ ४९ ॥
ये जनाः स्वानुमत्यैव विधेयाः सन्ति शासने ।
भंगस्तैरेव कर्तव्यो नेतुराज्ञानुवर्तिभिः ॥ ५० ॥
मया प्रोक्तमिदं सर्वं लोकाभ्युदयकाम्यया ।

न पुना राष्ट्रसंघस्य स्वातन्त्र्यापजिहीर्षया ॥ ५१ ॥
ये तु सत्याग्रहोद्युक्ता भवेयुः संशयालवः ।
तत्कृते ह्युपदेशोऽयं कृतः सन्मार्गदर्शकः ॥ ५२ ॥
अन्तरात्मानुसंधानैर्भगवद्भक्तिसेवनैः ।
इत्येवमलिखद्गान्धिर्ध्यायं ध्यायं दिवानिशम् ॥ ५३ ॥
अटन्हरिजनार्थाय प्रतीतोऽभूदसौ यथा ।
स्वयमेकेन वोढव्या सत्याग्रहधुरा मया ॥ ५४ ॥
सांघिकः शासनोच्छेदं महात्मा प्रतिषिद्धवान् ।
चिकीर्षुः स्वयमेकाकी वारयामास चेतरान् ॥ ५५ ॥
अथ संघसदां मध्ये गौरवेण महात्मनः ।
मतभेदः परित्यक्तस्तथा च न्यायकृत्सभाम् ॥ ५६ ॥
अप्रविष्टैः प्रविष्टैश्च बहिरन्तश्च संगरात् ।
पटवः सर्वलोकाः स्युरित्यन्सारिरघोषयत् ॥ ५७ ॥
श्रुतिवाक्यमिवाशेषैः सदस्यैरनुवर्तितम् ।
कार्यक्षेत्रेषु सर्वेषु वचनं दूरदर्शिनः ॥ ५८ ॥
व्यवसायो दृढस्तेषामचिरेणोदपादयत् ।
स्वराज्यस्याङ्कुरीभूतं राष्ट्रियं मन्त्रिमण्डलम् ॥ ५९ ॥
स च सूक्ष्माङ्कुरो यावद्भवति स्म शिशुद्रुमः ।
तावद्घोरमहायुद्धझंझावातेन भञ्जितः ॥ ६० ॥

इति सौ. क्षमायाः कृतिभूत्तरसत्याग्रहगीतायां न्यायविधायकसभाप्रवेशनो नाम त्रयोदशोऽध्यायः ।

चतुर्दशोऽध्यायः ।

अथ वैशाखमास्येकः समाजः समजायत ।
धनक्षेत्रादिसर्वस्वसमभागित्ववादिनाम् ॥ १ ॥
समभूत्पाटलीपुत्रे तत्पूर्वाधिनिवेशनम् ।
यत्र नारायणाचार्यः श्रीमानासीत् सभापतिः ॥ २ ॥
समाजस्य ततः शाखा बह्व्योऽनेकत्र निर्मिताः ।
दमनाय धनाढ्यानां शुभाय श्रमजीविनाम् ॥ ३ ॥
अङ्गभूतः समाजोऽयं राष्ट्रसंघस्य संमतः ।
आचकर्ष निजक्रोडे तस्य सामाजिकान् बहून् ॥ ४ ॥
आत्यन्तिकी व्यवस्थास्मिन्राष्ट्रसंघाधिवेशने ।
सर्वकार्यगतेः किञ्चिद्विपर्ययमजीजनत् ॥ ५ ॥
शासनोच्छेदनज्वाला सद्यो निर्वापिता ह्यभूत् ।
न्यायसंसत्प्रवेशस्य संभ्रमज्वलनोऽज्वलत् ॥ ६ ॥
वित्तं हरिजनस्यार्थे संग्रहीतुं समुत्सुकः ।
देशपर्यटनं कर्तुं महात्मा मतिमातनोत् ॥ ७ ॥
समाप्ते च सभाकार्ये प्रययौ पाटलीपुरात् ।
तपस्वी पादचार्येव देशानुत्कलसंज्ञितान् ॥ ८ ॥
धनसंचययन्त्रं मां मा जनो मन्यतामिति ।
यन्त्रयानं निराकृत्य क्राम्यति स्म बहुश्रमः ॥ ९ ॥
प्रयागोत्कलदेशेषु भ्रमन्हरिजनश्रियै ।
प्रीतिमुत्पादयामास लोके तद्धितकारिणीम् ॥ १० ॥

यत्र यत्र गतः सोऽयं तत्र तत्र समाश्रितः ।
जनतां बोधयामास धर्मसूक्ष्माणि युक्तिभिः ॥ ११ ॥
तस्य कर्णसुखां वाणीमुपपत्तिसमुज्ज्वलाम् ।
श्रुत्वा सदोषमात्मानं मेने हरिजने जनः ॥ १२ ॥
अथोदीच्यप्रदेशेषु भ्रमणे कृतनिश्चयम् ।
प्रयाणाद्वारयामासुः शासकाः परिशङ्किताः ॥ १३ ॥
अत्रान्तरे जनश्चक्रे विकल्पान् बहुधा यथा ।
किमयं प्रतिषिद्धोऽपि व्रजेदेवोत्तरां दिशाम् ॥ १४ ॥
नोचेद्वैयक्तिकोच्छेदे शासनस्य स्वतन्त्रताम् ।
नात्मनः केवलं रक्षेदितरान् विनिवारयन् ॥ १५ ॥
न्यायकल्पकसंस्थायां प्रवेशमनुशिष्य नः ।
किं वा काराप्रवेशाय मार्गमन्विष्यति स्वयम् ॥ १६ ॥
प्रजाः कश्चिदयं नेता शासकप्रतिरोधनाम् ।
क्षोभमुत्पाद्य दुःखाब्धौ न भूयो मज्जयिष्यति ॥ १७ ॥
इति चिन्ताकुले लोके महात्मा निरमापयत् ।
संघान् हरिजनार्थाय नगरे नगरे बहून् ॥ १८ ॥
ततः प्रस्थानमकरोद्वरदानगरं प्रति ।
ग्रामीणजनतामध्ये निवासमभिलाषुकः ॥ १९ ॥
तावच्च प्रसृता वार्ता लोकविक्षोभकारिणी ।
यदसौ नचिरादेव राष्ट्रसंघं विमुञ्चति ॥ २० ॥

बहवो बहुधा लोका वितर्कयितुमुद्यताः ।
सहसा निर्गमस्यास्य परिणामान् भविष्यतः ॥ २१ ॥
नूतनाः सभया तस्य स्वीकृता यदि निर्णयाः ।
महात्मा न सभां जह्यादिति केचन मेनिरे ॥ २२ ॥
सदस्यवरणारम्भे सन्निकृष्टमुपस्थिते ।
न हि त्यागः शुभायेति प्राहुरन्ये विशङ्किताः ॥ २३ ॥
त्यजेत्सामाजिकत्वं चेद्वार्षिकाधिनिवेशनम् ।
किमर्थमुपतिष्ठासुर्भवतीत्यपरेऽब्रुवन् ॥ २४ ॥
विजानन्तोऽखिला लोकास्तस्याहार्यं विनिश्चयम् ।
लेखेन वक्ष्यमाणेन तस्य चुक्षुभिरे भृशम् ॥ २५ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां शासनभंगवारणो नाम चतुर्दशोऽध्यायः ।

पञ्चदशोऽध्यायः ।

संयमी दिव्यया वाण्या प्रेरितः स हृदन्तरे ।
प्राकाश्यमानयल्लेखमिमं निर्णयगर्भितम् ॥ १ ॥
सङ्घान्मम निवृत्तेर्या वार्ता सा न मृषात्मिका ।
अत्र कारणबाहुल्यं विद्यते तन्निशम्यताम् ॥ २ ॥
न त्याज्यः संघसंबन्धः प्रागाब्दिकसभागमात् ।
इति मित्रैः समादिष्टः परित्यागं विलंबये ॥ ३ ॥

स्थीयतामश्रमेणेति प्राहुर्गोविंदवल्लभाः ।
निर्गम्यतामिति प्रोचुः श्रीमत्सर्दारवल्लभाः ॥ ४ ॥
प्रत्येमि च परे सभ्या निर्विण्णाः कर्मभिर्मम ।
विघ्नकृन्न सहायोऽस्मि संघाभ्युदयकर्मणि ॥ ५ ॥
अपि च प्राभवं संघे वर्तते मे निरङ्कुशम् ।
अस्य मे प्रत्ययस्याद्य सत्यभावः परीक्ष्यते ॥ ६ ॥
मम सामाजिकानां च बहूनां मतभिन्नता ।
वर्धमानान्वहं दृष्टा तथापि मयि गौरवात् ॥ ७ ॥
प्रतीपगमनौत्सुक्यं रुद्ध्वा ते जोषमासते ।
इति सम्यक् परिज्ञाय स्थितोऽस्मि कृतनिश्चयः ॥ ८ ॥
न कोऽपि नायकः पूर्वमासीद्विश्वासभाजनम् ।
यथाहं हन्त भेदेऽपि स्थिरभक्तानुयायिनाम् ॥ ९ ॥
तन्तुचक्रं पुरो न्यस्तं मया कार्यगतिक्रमे ।
परं तत्पृष्ठतश्चक्रे प्राज्ञोऽप्यश्रद्धया जनः ॥ १० ॥
तथापि प्रत्ययोऽयं मे द्रढीयान् वर्तते यथा ।
क्लिश्यन् मानवकोट्यर्थे स्वराज्यं यदि लिप्स्यते ॥ ११ ॥
तन्तुचक्रक्रिया खादीनिर्मितिश्च परा गतिः ।
शिंक्षितानां तथा दीनक्षुधार्तानां विशेषतः ॥ १२ ॥
अमी किल निरुद्योगा हस्तस्यानुपयोगतः ।
जीवन्ति कृपणं नित्यं पशुवद्भारहारिणः ॥ १३ ॥

तन्तुचक्रमिदं पुंसां मानस्य विजयध्वजः ।
कृषेः सहचरं मित्रं प्रकृतेरर्धजीवितम् ॥ १४ ॥
शेषार्धजीवमात्रेण जीवन्तोऽद्य वयं स्थिताः ।
अतः शनैर्विनंक्ष्यामश्छिन्नपक्षा इवाण्डजाः ॥ १५ ॥
केचित्तथापि विद्यन्ते सदस्याः श्रद्धयान्विताः ।
चक्रस्याद्भुतसामर्थ्ये विश्रुते निखिलावनौ ॥ १६ ॥
खादिवस्त्रनिरासश्चेत् क्रियते संघकार्यतः ।
छिन्नो भवति संबंधः संघस्य जनकोटिभिः ॥ १७ ॥
प्रातिनिध्यसदस्यत्वं संघाङ्गमिति मे मतिः ।
विरोद्धुं मां तु नेच्छन्ति बहवो मयि सादराः ॥ १८ ॥
ममापि संमतो मेलः समभागित्ववादिनाम् ।
परार्थतत्परा यत्र मान्याश्च सहकारिणः ॥ १९ ॥
अस्ति मे मूलतो भेदः सारार्थान् प्रति तैः सह ।
यदि लब्धप्रतिष्ठास्ते तदा संघे न मे स्थितिः ॥ २० ॥
अस्पृश्यतार्थमुद्दिश्य विभिन्नो हि मम क्रमः ।
नद्योः प्रतीपगामिन्योः संयोगो नहि संभवी ॥ २१ ॥
सोऽयमस्पृश्यताप्रश्नो नीतिधर्मावलम्बनः ।
तदर्थमर्पयिष्येऽहं जीवितं मे दृढव्रतः ॥ २२ ॥
मन्यन्ते हि मयादिष्टं शासनोच्छेदवारणम् ।
गरीयः स्खलितं बुद्धेर्भूयांसः सहकारिणाम् ॥ २३ ॥

वैमत्यविषयश्चान्यः कथ्यते श्रूयतामयम् ।
अहिंसा जीवितं सत्याग्रहकल्पमहीरुहः ॥ २४ ॥
परन्तु लौकिकीं नीतिं भूयिष्ठाः कलयन्ति ताम् ।
मम तावदिदं मूलं धर्मस्यैवेति निश्चयः ॥ २५ ॥
न दोषोऽयं सदस्यानां यदेते न हि बिभ्रते ।
धर्मश्रद्धामहिंसायामहमेवात्र दोषभाक् ॥ २६ ॥
नानुशिष्टा मया ह्येते यथावदनुयायिनः ।
अत एव न संजाता मद्वत्तद्धर्मजीविताः ॥ २७ ॥
अहिंसाया अमोघत्वे यदि स्युः संशयालवः ।
सुतरां शासनोच्छित्तेः साफल्ये ते विशङ्किनः ॥ २८ ॥
मन्मते यदमी श्रद्धां विना यच्छन्ति संमतिम् ।
तस्य स्मरणमप्यन्तः शूलवद्विध्यतीव माम् ॥ २९ ॥
अथ चेत्परमं ध्येयमुभये प्राप्तुमुत्सुकाः ।
भवितव्यं निरातङ्कमनोभिरुभयैरपि ॥ ३० ॥
भवितव्यमतोऽस्माभिर्निःशङ्कैर्निर्णयक्षणैः ।
तथा च व्यवहर्तव्यं यथा स्यादात्मसंमतिः ॥ ३१ ॥
त्रासकाः शासकाश्चामी उभयेऽपि तदा ध्रुवम् ।
प्रतीताः स्युरहिंसायाः प्रभावेऽभीष्टसाधके ॥ ३२ ॥
अहिंसां तत्त्वतः सभ्या यदि निर्व्याजबुद्धयः ।
आचरिष्यंस्तदा नूनमवेदिष्यन् प्रशासकाः ॥ ३३ ॥

एतदर्थपरीक्षायै जीवितं मे समर्पये ।
तस्मादसंगमिच्छामि स्वातन्त्र्यमपि सर्वतः ॥ ३४ ॥
सत्यं सत्याग्रहस्यात्मा स धर्मः सार्वलौकिकः ।
तत्कला शासनोच्छेदः सत्यं मे परदेवता ॥ ३५ ॥
समुपास्या हि सा सर्वैरहिंसैकपथाश्रयैः ।
राष्ट्रस्य जगतोऽपि स्यान्मुक्तिस्तस्याः प्रसादतः ॥ ३६ ॥
न सत्याद्विचलिष्यामि स्वसमीहितसिद्धये ।
न चातकस्तृषार्तोऽपि प्रतियाति मरीचिकाम् ॥ ३७ ॥
शतार्धवत्सरेभ्यः प्राक् सत्योपास्तिमहाव्रतम् ।
अङ्गीकृत्य प्रविष्टोऽहं राष्ट्रकार्यरणाङ्गणम् ॥ ३८ ॥
सुशिक्षितसदस्यानां न चेत्प्रत्यायने क्षमः ।
न चैषां हृदयं हर्तुं कथंचिद्यदि शक्नुयाम् ॥ ३९ ॥
तदा मयैककेनैव भ्रमितव्यमिति स्फुटम् ।
आशासे यत्र पश्यन्ति बोधिता अपि बान्धवाः ॥ ४० ॥
कालेन तद्विजानीयुर्भगवत्कृपया स्वयम् ।
आसूर्योदयमात्रं हि निशायास्तिमिरस्थितिः ॥ ४१ ॥
अथवा भगवानेव मन्मुखेन प्रकाशयेत् ।
वचनं कर्म वा योग्यं कार्येऽस्मिन् सुमहत्तमे ॥ ४२ ॥
संमतिर्या बलाद्दत्ता वृत्तिश्चाशुद्धिपूर्विका ।
न ते परं न पर्याप्तं अपि श्रेयोविघातिके ॥ ४३ ॥

अन्तराऽस्पृश्यताध्वंसं मुस्लिमैरैक्यसाधनम् ।
तथा च तन्तुनिर्माणं नापरोऽस्ति ममोद्यमः ॥ ४४ ॥
अधिग्रामटिकां क्वापि वसन् लोकवशंवदः ।
देशसेवां करिष्यामि बहिः संघादपि स्थितः ॥ ४५ ॥
अवोचं हि यथा शोच्या कूटवृत्तिः प्रदृश्यते ।
राष्ट्रसंघसदां वर्गे वर्धमाना दिने दिने ॥ ४६ ॥
संघसंस्था तथाप्येषा तिष्ठत्येव महोर्जिता ।
परमादर्शभूता च देशस्येत्यभिनंद्यते ॥ ४७ ॥
आजन्मनः सभा ह्येषा तीर्त्वानेकविपद्गणम् ।
कृतोदारप्रजासेवा स्वार्थत्यागेन राजते ॥ ४८ ॥
एतस्या अद्य विद्यन्ते सदस्याः श्लाघ्यवृत्तयः ।
वनिताः पुरुषाश्चापि देशसेवापरायणाः ॥ ४९ ॥
ईदृक्संघपरित्यागोऽभविष्यत्क्लेशदो मम ।
नाज्ञास्यं यदि निर्गम्य सेवेय सुतरामिति ॥ ५० ॥
सदस्यानां मनोभावं तत्त्वतः संपरीक्षितुम् ।
तदीयन्निर्णयश्रेण्यां चिकीर्षे परिवर्तनम् ॥ ५१ ॥
न्यायतः क्षोभवर्जं चेत्यपहाय पदद्वयम् ।
सत्येनाहिंसया चेति स्थापनीया तयोः स्थले ॥ ५२ ॥
स्वातन्त्र्यसाधनं नान्यदहिंसा सत्यतोऽस्ति नः ।
इति सभ्याः प्रतीताश्चेद्ग्राह्यमुक्तपदद्वयम् ॥ ५३ ॥

पादरूप्यकशुल्कस्य स्थाने सूत्रं स्वनिर्मितम् ।
दातव्यमिति निर्लेख्यं द्वितीयं परिवर्तनम् ॥ ५४ ॥
पशुवृत्तेर्यथा खड्गश्चिह्नं रभसदण्डयोः ।
तन्तुचक्रं तथा साधोरहिंसालोकसेवयोः ॥ ५५ ॥
राष्ट्रध्वजो यदास्माभिः स्वीकृतश्चक्रचित्रितः ।
प्रतिगेहं सदा चक्रं गुञ्जत्विति मतं स्थितम् ॥ ५६ ॥
सभ्याश्चक्रस्य संदेशे यदि विश्वासवर्जिताः ।
निष्कास्यतां ध्वजाच्चित्रं खादीवस्त्रं च निर्णयात् ॥ ५७ ॥
गृहीत्वापि व्रतं केचित्खादिवस्त्रधृतेः सदा ।
अन्यदेव परोक्षं तु कुर्वन्तोऽपि न जिह्रति ॥ ५८ ॥
न धारयति यः सभ्यो नित्यशः खद्दराम्बरम् ।
अनर्हो भविता संघे स्वमतं वक्तुमप्यसौ ॥ ५९ ॥
बहवः प्रियवक्तारो विरलास्तु हितैषिणः ।
स्वैरवृत्तिहता संस्था प्रसूते न शुभं फलम् ॥ ६० ॥
न जातु नायकः कोऽपि चरितार्थो भविष्यति ।
यद्यलं नानुवर्तन्ते तदाज्ञामनुयायिनः ॥ ६१ ॥
इदमक्षरशः सत्यं सति मादृशि नायके ।
साधनं यस्य नास्त्यन्यदहिंसासत्ययोर्विना ॥ ६२ ॥
अर्थे मया प्रतिज्ञाते नावकाशो हि विद्यते ।
न्यूनातिरिक्तयोस्तस्मात्समाधेयं न किंचन ॥ ६३ ॥

वीतरागमतः सभ्या विमृशन्तु विवेकतः ।
अनपेक्ष्य ममाकूतमाचरन्तु स्वयं धिया ॥ ६४ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां गान्धिनिर्गमनो नाम पञ्चदशोऽध्यायः ।

षोडशोऽध्यायः ।

प्रागेव निर्गमाद्गान्धे राष्ट्रसंघेन निर्गमे ।
अखण्डभारतग्रामशिल्पसंघस्तथा पुनः ॥ १ ॥
सर्वभारतराष्ट्रीयसूत्रनिर्माणमण्डली ।
द्वयमेतदभूद्गान्धेर्निर्देशे स्थापितं पृथक् ॥ २ ॥
ग्रामशिल्पमहाश्रेणी देशग्रामाभिपोषिका ।
खादीशिल्पक्रिया यत्र सर्वशिल्पाग्रतःसरी ॥ ३ ॥
कला च शिल्पमित्येतद् द्वितयं देशसंस्कृतेः ।
विजयस्य पताकेव परमार्थनिदर्शनम् ॥ ४ ॥
विद्याविज्ञानयोः सिद्धिर्विभवः सार्वलौकिकः ।
कलाशिल्पक्रियासिद्धिः सर्वराष्ट्रस्य जीवितम् ॥ ५ ॥
नष्टयोश्च तयोर्नश्येद् राष्ट्रस्यापि विशिष्टता ।
निर्माणशक्तिहीनस्य जीवितं वन्ध्यजीवितम् ॥ ६ ॥
मत्वैवं कर्तुकामोऽभूदसौ कार्यचतुष्टयम् ।
ग्रामशिल्पसमुद्धारं देशसंस्कृतिवर्धनम् ॥ ७ ॥

राष्ट्रीयार्थिकसम्पत्त्यै संविधानप्रकल्पनम् ।
भारतीयसुशिक्षायै विधानपरिवर्तनम् ॥ ८ ॥
तस्यासीत्परमं ध्येयं पर्याप्तपरिसाधनम् ।
क्षुधार्तदीनकोटीनां वसनग्रसनार्थयोः ॥ ९ ॥
न निर्मित्सुरलङ्कृत्यै स सौधानि नभःस्पृशः ।
न च वाणिज्यलाभाय जलधेः सेतुबन्धनम् ॥ १० ॥
एवं सुनिश्चितं संघात्स्व्यापितेऽपि विनिर्गमे ।
तस्य मित्रार्युदासीना बह्वो न विशश्वसुः ॥ ११ ॥
न विदुर्यदसौ ब्रूते सत्यसंकल्पितं सदा ।
करोति च यदेवोक्तं यतते चाफलोदयम् ॥ १२ ॥
दृढसंकल्पता चास्य व्यक्तिमात्राद्नेकशः ।
मोहमय्यां यथापूर्वं यथा लवपुरेऽपि च ॥ १३ ॥
अथ संघपरित्यागवृत्तान्तस्तु महात्मनः ।
सदस्यानाकुलीचक्रे ते च शुश्रूषवः स्थिताः ॥ १४ ॥
स चाह श्रूयतामार्यास्त्यज्यतामात्मकश्मलम् ।
सत्यवत्पावनीं मत्वा खद्दराम्बरनिर्मितिम् ॥ १५ ॥
नयध्वं सत्पथे लोकान् स्वार्थत्यागपुरस्सरम् ।
परसेवां महद्ध्येयं निदर्श्य निजकर्मभिः ॥ १६ ॥
परिहर्तुमवस्कन्दं समभागित्ववादिनाम् ।
जहौ संघं महात्मेति प्रोचुरज्ञाः कचिज्जनाः ॥ १७ ॥

न विदुर्देशसेवार्थं यथायं बद्धकंकणः ।
स्थितश्चतुर्दशाब्दानि कष्टजीविहितङ्करः ॥ १८ ॥
विश्वसन्त्येव यत्सर्वे समभागित्ववादिनः ।
खादीग्रामोद्यमाहिंसासत्येष्वेभ्यः कुतो भयम् ॥ १९ ॥
नहि कोऽप्यधिको गान्धेः समभागित्ववादिनाम् ।
य आस्ते त्यक्तसर्वस्वः स्वजनेऽप्यनपेक्षया ॥ २० ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां ध्येयप्रपञ्चनो नाम षोडशोऽध्यायः ।

सप्तदशोऽध्यायः ।

महात्मा वसतिं चक्रे कस्यचित्सुहृदो गृहे ।
वरदानगरे पुण्ये ग्रामान्वेषणतत्परः ॥ १ ॥
आसीत्सुहृन्मणिः सोऽयं जम्नालालाख्यया श्रुतः ।
धनाढ्यश्च वदान्यश्च देशसेवापरायणः ॥ २ ॥
अथ नागपुरे हिंदीसाहित्यस्य सभाऽमिलत् ।
विद्वद्भिर्लेखकैर्जुष्टा दूरदेशात्समागतैः ॥ ३ ॥
अत्राध्यक्षपदं गान्धिरलंकुर्वन्नभाषत ।
सांभिनंदं वचः स्वल्पमपि श्रोत्रमनोहरम् ॥ ४ ॥
आगतोऽस्मि महाभागाः किञ्चित्कालमिह स्थितः ।
विज्ञापयितुमत्रत्यान् भवतो मन्मनोगतम् ॥ ५ ॥

न विद्यते हि मे चित्तमत्र वा वरदापुरे ।
ग्रामेषु तत्स्थितं नित्यं तथा ग्रामनिवासिषु ॥ ६ ॥
सुहृद्भिः प्रतिषिद्धोऽपि विहाय वरदापुरम् ।
अदूरवर्तिने ग्रामे निवत्स्याम्यचिरादहम् ॥ ७ ॥
ग्रामे हि निवसन् नित्यं भविष्यामि न दुर्लभः ।
उपदेशमभीप्सूनां ग्रामसेवैकसंगिनाम् ॥ ८ ॥
स्वानुगेभ्यो मया ग्रामनिवासो निरदिश्यत ।
ग्रामीणजनमध्येऽहं वस्तुमिच्छामि तत्स्वयम् ॥ ९ ॥
अत्रैव श्रीमती मीरा दीनलोकं सिषेविषुः ।
जग्राह वसतिं क्षेत्रे वरदाप्रतिवासिभिः ॥ १० ॥
कार्यभारं तु दौर्बल्याद्वोढुं न प्रबभूव सा ।
मानयाम्यत्र वासेन तां देवीं सहकारिणीम् ॥ ११ ॥
देयाद्देहमनःशक्तिं परमात्मा दयानिधिः ।
यद्वितीर्णं न मीरायै तत्तु दिष्ट्या ददातु मे ॥ १२ ॥
सप्रश्रयमपेक्षेऽहं ग्रामकार्यस्य सिद्धये ।
संमतिं भवतां पूर्णामात्मबुद्धिपुरस्सरीम् ॥ १३ ॥
न हठाद् ग्राहयिष्यामि स्वमतं विमतं जनम् ।
हिंसनं हि तदप्येतद्वर्जितं बाल्यतो मया ॥ १४ ॥
युष्मान् सेवितुमेवाहं निवत्स्याम्यत्र नान्यथा ।
बहुधा तु मदुद्देश्ये विकल्पन्ते विशङ्किनः ॥ १५ ॥

निदानं तद्विशङ्काया भवतीदं निशम्यताम् ।
मया ह्यस्पृश्यताध्वंसः कृतो मे जीवितव्रतम् ॥ १६ ॥
निरस्यास्पृश्यताबुद्धिं द्विजे शूद्रे तथान्त्यजे ।
क्षत्रिये चर्मकारे च स्थितोऽस्मि समदर्शनः ॥ १७ ॥
अधर्म्याः किल ते भेदाः सर्वे जन्मोद्भवा नृणाम् ।
नीचोच्चजातिभेदान्नो जीवितं मलिनीकृतम् ॥ १८ ॥
स्वादर्शानुनयैरेव मतस्य परिवर्तनम् ।
जनानां प्रयतिष्येऽहं न हठात्कारयुक्तिभिः ॥ १९ ॥
ग्रामरथ्याः प्रमार्क्ष्यामि करिष्ये रुग्णपोषणम् ।
शिल्पमुज्जीवयिष्यामि ग्रामे नष्टचरं चिरात् ॥ २० ॥
इत्थं नानाप्रकारेण भवतां परिसेवनम् ।
करिष्येऽहं मुदा नित्यं निवसन् ग्रामिकान्तरे ॥ २१ ॥
मोदिष्येऽत्रभवन्तोऽपि यदि मे सहकारिणः ।
नो चेत्परं निवत्स्यामि संतुष्टः सकलैः सह ॥ २२ ॥
भगवत्कृपयात्राहं प्रेषितोऽस्मि यथाक्रमम् ।
भारतादाफ्रिकादेशं सबर्मत्यास्तटं ततः ॥ २३ ॥
वरदानगरं तस्मात्सेगावं च ततः पुनः ।
गतिर्हि देहिनां नित्यमीश्वरेच्छावलम्बिनी ॥ २४ ॥
इत्युक्तेऽथ समुत्थाय ग्रामीणः कश्चिदब्रवीत् ।
इदं ते स्वागतं भद्र करिष्यामः सहोद्यमम् ॥ २५ ॥

अभिज्ञः प्रवयाः कश्चिद्ग्रामीणप्रमुखोऽब्रवीत् ।
धन्यमद्य त्वया स्थानं पूतं पादाब्जरेणुभिः ॥ २६ ॥
करिष्ये तव सेगावे महात्मन् स्वागतं मुदा ।
मतमस्पृश्यतायां तु नान्यथाकर्तुमुत्सहे ॥ २७ ॥
न पास्यामि जलं कूपादन्त्यजस्पर्शदूषितम् ।
न वा तस्यानुमोदिष्ये प्रवेशं देवमन्दिरे ॥ २८ ॥
मूलमस्य विचारद्रोर्निरूढं मम जन्मतः ।
तदिदानीं समुच्छेत्तुं वार्धके नास्ति मे बलम् ॥ २९ ॥
वल्लभार्यादिभिर्ग्रामा गुर्जरप्रान्तवर्तिनः ।
सूच्यन्ते स्म निवासाय केचिदन्ये महात्मनः ॥ ३० ॥
प्रत्युवाच महात्मैतान्वरदानगरान्तिके ।
यत्कार्यमस्ति तत्कर्तुं दूरस्थेन न शक्यते ॥ ३१ ॥
निवस्तुमहमिच्छामि विनोबार्यस्य संनिधौ ।
तितिक्षोः सर्वकष्टानि श्राम्यतोऽत्र दिवानिशम् ॥ ३२ ॥
सर्वकष्टसहाः सर्वे ग्रामकार्ये व्यवस्यत ।
इति पूर्वं मयादिष्टाः सर्वेऽपि ग्रामसेवकाः ॥ ३३ ॥
परेभ्य उपदिष्टं यत्तदाचार्यं मया स्वतः ।
ततः परिश्रमिष्यामि विनोबार्यादयो यथा ॥ ३४ ॥
लब्धुं बलवदाशासे ग्रामिकाणां सहायताम् ।
लब्धे च सहकारित्वे वर्धते स्वयमुद्यमः ॥ ३५ ॥

इत्युक्ते गान्धिना कश्चित्सुहृद्ग्रामस्थ कश्मलम् ।
कष्टजीवनमप्यस्मै ग्रामे सर्वमवर्णयत् ॥ ३६ ॥
तच्छ्रुत्वा प्रतिजज्ञेऽसौ न कष्टाद्भयमस्ति मे ।
कष्टभीरुर्मृतप्रायो ग्रामवासो मम ध्रुवः ॥ ३७ ॥
अथ संमन्त्र्य मित्रैश्च सेगावावासनिश्चयम् ।
प्राकाश्यमनयद्गान्धिर्हिन्दीसाहित्यसंसदि ॥ ३८ ॥
निवसन्नेकदा पुर्यां मग्नवाडीस्थलं ययौ ।
सिन्धिनामान्तरग्रामे वरदानगरान्तिके ॥ ३९ ॥
घोषेऽस्मिन् श्रीमती मीरा वसति स्म पुरा किल ।
सहमाना महत्कष्टं ग्रामसेवा कृतोद्यमा ॥ ४० ॥
एकदा पर्यटन्ती सा सेगावग्राममाययौ ।
येन पुष्यति सोऽद्यापि प्रसिद्धिमविनश्वरी ॥ ४१ ॥
सेयं ग्रामटिकाऽशेत त्रिकोश्यां वरदापुरात् ।
मलिना चार्धनग्ना च निकटेऽपि पुरश्रियः ॥ ४२ ॥
यत्र पाठालयेऽभ्यासादपि बाला निरक्षराः ।
क्रीडन्तः पांसुपुञ्जेषु स्थिता धूसरविग्रहाः ॥ ४३ ॥
आसतं स्वांगणे प्रौढा निरुत्साहा निरुद्यमाः ।
यापयन्तो वृथा कालं प्रजल्पन्तः परस्परम् ॥ ४४ ॥
गदमालिन्यभाजश्च ग्रामीणा न्यवसन्निह ।
वीथिकास्वेव कुर्वाणा मलमूत्रविसर्जनम् ॥ ४५ ॥

अस्त्यत्र विपुलं कार्यं ग्रामसेवाधिषङ्गिणाम् ।
इति मेने महात्मासौ समालोक्य परिस्थितिम् ॥ ४६ ॥

अयमश्रुतपूर्वोऽपि ग्रामः संसर्गतो मुनेः ।
देशचित्रे स्थलं लेभे कीर्तिमप्यनणीयसीम् ॥ ४७ ॥

न्यासलब्धो ह्ययं ग्रामः श्रीबजाजस्य पूर्वजैः ।
स्वाम्यमस्य च कालेन श्रीमान्पूर्णमवाप सः ॥ ४८ ॥

अर्पये तात ते ग्राममेनमित्यब्रवीन्मुनिम् ।
जम्नालालबजाजार्यो बद्धश्रद्धो महात्मनि ॥ ४९ ॥

मीरा विग्रहसंशोभी प्रकोष्ठत्रितयात्मकः ।
वेणुपङ्कादिभिः शालो नचिरात्तत्र निर्मितः ॥ ५० ॥

अवाप शेवगावोऽयं पुनर्जन्मैव वस्तुतः ।
सेवाग्राम इति ख्यातिमन्वर्थं प्राप्य कालतः ॥ ५१ ॥

गान्धिना प्रोक्तमात्रोऽसौ हिन्दीसाहित्यसंसदि ।
निशायामेव विख्यातो बभूवाखिलभूतले ॥ ५२ ॥

प्रचेलुः सहसोर्ध्वाधस्तद्ग्रामयशसां रुचः ।
उत्सवेष्वग्निबाणानां नभसि द्युतयो यथा ॥ ५३ ॥

अनेके नगरग्रामा दाण्डिबार्दोलिपूर्वकाः ।
सबर्मतिजुहूपञ्चगणीप्रभृतयश्चिरात् ॥ ५४ ॥

अज्ञातनामधेया ये बहिरासन् जगद्दृशः ।
तेऽधुना वृत्तपत्रेषु ख्याताः संसर्गतो मुनेः ॥ ५५ ॥

स्मरारेः संगमाग्नन्दी नमस्योऽभूज्जनेऽखिले ।
आरोहति शिरो राज्ञः संगात्सुमनसां कृमिः ॥ ५६ ॥
सद्गुणानां निधेः संगादहिंसासत्यसेविनाम् ।
ग्रामाः प्रथमगण्याः स्युर्यदि तत्र किमद्भुतम् ॥ ५७ ॥
अथैकस्मिन् दिने चैत्रे पद्भ्यामेवारुणोदये ।
सेवाग्रामं प्रति प्राज्ञः प्रातिष्ठत मुदा स्वयम् ॥ ५८ ॥
पद्भ्यां क्रोशद्वयं गत्वा गोरथेन ततः परम् ।
प्रतिपेदे प्रहर्षेण सेवाग्रामं शनैः शनैः ॥ ५९ ॥
वरदानगरात्केचिद्वव्रजुः सहकारिणः ।
वहन्तः स्तोकवस्तूनि हस्ते सार्धं महात्मनः ॥ ६० ॥
सहकारिषु सुप्तेषु मगवाडीं विहाय सः ।
निःशब्दनिभृतं यात्रामकरोदनतिश्रमः ॥ ६१ ॥
दर्शनं पुरवासिभ्यो विहरन्वीथिकासु यः ।
दत्ते प्रतिदिनं प्रातः स इदानीं कुतो गतः ॥ ६२ ॥
इति पौरानुगाः केचिदपश्यन्तो यथापुरम् ।
अन्वशोचन्नपक्रान्तं निशम्य नगराद्बहिः ॥ ६३ ॥
आगतो ह्यशुभः कालः पुराभिष्कासनाय नः ।
तमेनमनुगच्छामो युधिष्ठिरमिव प्रजाः ॥ ६४ ॥
इति नानाप्रकारेण विचिन्त्य व्यथितान्तराः ।
वियोगापरिहार्यत्वं विज्ञायावस्थिताः पुरे ॥ ६५ ॥

सिंधिग्रामे महात्मैनं दृष्टवान् श्रीगजाननम् ।
अवगण्य महत्कष्टं प्रयस्यन्तं तितिक्षया ॥ ६६ ॥
निवासोऽत्र मया कार्यो ग्रामकष्टोपलब्धये ।
इति ध्यायन्नहोरात्रं सेवाग्रामं समासदत् ॥ ६७ ॥
प्रतीक्षते स्म सोत्कण्ठं कुटीरं तदुपागमम् ।
तत्पादाब्जरजोपूतो मदात्मापि भवत्विति ॥ ६८ ॥
बृहत्पादपशाखाभिर्वारिता सूर्यतापतः ।
सरसी शीतलीचक्रे कुटीं तां स्फटिकोदका ॥ ६९ ॥
प्रपन्नमात्र एषोऽत्र महात्मा ग्रामवासिनः ।
समाहूय सुसंक्षिप्तमकार्षीद्भाषणं प्रियम् ॥ ७० ॥
उपागच्छन्महात्मानं कौतुकाद्ग्रामबालकाः ।
मलिना जीर्णवस्त्राश्च यूकाकीर्णशिरोरुहाः ॥ ७१ ॥
आबालतरुणीवृद्धं शृण्वन्तश्चक्रगुञ्जनम् ।
लोकास्तत्पार्श्वमासीना ददृशुस्तन्तुकर्तनम् ॥ ७२ ॥
परेद्युरथ कल्याणे प्रभाते शयनोत्थितः ।
पठित्वा भगवद्गीतामारेभे ग्रामसेवनम् ॥ ७३ ॥
तस्मिन्नसंस्कृतग्रामे विषमोद्धातिभूतले ।
भूसमीकरणार्थाय खननं समपेक्ष्यत ॥ ७४ ॥
खनित्रं स्वयमादाय चिरमश्राम्यदग्रणीः ।
श्रीमान्माधवदेसाईप्रमुखैः स समन्वितः ॥ ७५ ॥

न दृष्टश्रुतपूर्वं तैः शौचस्थानं निवासिभिः ।
यत्र क्वापि पथः कोणे कुर्वन्ति स्म विसर्जनम् ॥ ७६ ॥
ग्रामस्यारोग्यरक्षा स्यात्कश्मलोत्सारणादिति ।
बोधयन्ग्रामिकान् गान्धिर्निर्ममे शौचकूपिकाः ॥ ७७ ॥
वर्षाकालात्ययेऽध्वानः पर्यस्ताः परिचक्रिरे ।
मृदा संपूरिता गर्ताः सानुगेन महात्मना ॥ ७८ ॥
महात्मा शोधनीं धृत्वा शोधयद्वीथिकाः स्वयम् ।
यावत्पूर्णविशुद्धिं ता अपूर्वां प्रतिपेदिरे ॥ ७९ ॥
पश्यन्तः सानुगं गान्धिं संमार्जन्तं दिने दिने ।
ग्रामीणा विस्मयं प्राप्य ह्रेपिता अभवन् भृशम् ॥ ८० ॥
खलपूयन्नपि श्रीमान् बहिश्चक्रे न माधवः ।
जुगुप्सयेह ग्रामीणैरिति प्रीतोऽभवन्मुनिः ॥ ८१ ॥
अस्पृश्यताऽव्यपोहाय ग्रामारोग्यावनाय च ।
बद्धदीक्षस्य तस्याभून्माधवस्य कृतिः कृतिः ॥ ८२ ॥
गृहिण्यो नचिरादत्र मालीमस्यं स्वयं जहुः ।
प्रममार्जुः प्रयत्नेन निजगेहाङ्गणानि च ॥ ८३ ॥
आबालस्थविरं लोकाः शौचकूपान् सिषेविरे ।
अतो ग्रामस्य चारोग्यमभिवृद्धिमुपाययौ ॥ ८४ ॥
पाठशालां ततो गान्धिरुद्घाट्य ग्रामबालकान् ।
स्वास्थ्यरक्षासदाचारवृत्तादिकमपाठयत् ॥ ८५ ॥

तथा च स्थापयामास वनिताभ्यो निकेतनम् ।
यत्र श्रीभगवद्गीतां श्रावयामास योषितः ॥ ८६ ॥
रात्रिशालास्तथा पुंसां शिक्षणाय प्रकल्पिताः ।
यत्र ते जगतो वृत्तं विविदुः कर्मकारिणः ॥ ८७ ॥
अथ गाढश्रमाद्गान्धेर्यत्नाच्च सहकारिणाम् ।
अन्यदेवाभवद्रूपं सेवाग्रामस्य सर्वतः ॥ ८८ ॥
न चिरेण कुटीरेषु तन्तुचक्रस्य गुञ्जनम् ।
श्रूयते स्म प्रभावेणात्यद्भुतेन महात्मनः ॥ ८९ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां ग्रामवासोद्घोषणो नाम सप्तदशोऽध्यायः ।

अष्टादशोऽध्यायः ।

ज्येष्ठमासे महात्मासौ बेंगलूरपुरे ययौ ।
हिन्दीप्रचारसंस्थायाः समाह्वानं सुमानयन् ॥ १ ॥
अलङ्कृत्य सभाध्यक्षपदं तत्र सगौरवम् ।
अदर्शयद्यथा हिन्दी राष्ट्रभाषात्वमर्हति ॥ २ ॥
अथ संमिलितांश्छात्रानभिनन्द्याब्रवीन्मुनिः ।
मम प्रमोदते चेतः पश्यतो वः समीयुषः ॥ ३ ॥
अधिका दृश्यते संख्या योषितां पुमपेक्षया ।
तदेताः पूर्वमर्हन्ति धन्यवादान् सुलक्षणाः ॥ ४ ॥

हिन्दीप्रचारसंसिद्धेरत्रैषास्ति निदर्शनम् ।
भारतस्य समुद्धारः स्त्रीजनैरेव शिक्षितैः ॥ ५ ॥
वीराणां वीरपत्नीनां देवानां देवयोषिताम् ।
सहनामग्रहो नित्यं स्त्रीपूर्वः परिदृश्यते ॥ ६ ॥
सीतारामौ तथा राधाकृष्णौ गौरीमहेश्वरौ ।
लक्ष्मीनारायणौ चेति न पुनस्तद्विपर्ययात् ॥ ७ ॥
अस्ति चाभ्यर्हितं पूर्वमिति न्यायः सनातनः ।
तद्बभूवुः पुरा नार्यस्तत्क्रियाश्चाभिपूजिताः ॥ ८ ॥
हिन्दीवाग् राष्ट्रभाषात्वे श्रूयतां वच्मि कारणम् ।
कामं कर्णाटकेष्वत्र मातृवागलमस्ति वः ॥ ९ ॥
परमन्यत्र तद्बाह्ये देशग्रामादिमण्डले ।
न पर्याप्ता भवत्येषा व्यवहर्तुं हि देशजैः ॥ १० ॥
कथं हि प्रभवेल्लोकः संसर्गं रक्षितुं जनैः ।
सिंधुप्रयागदेशेषु समवाक्साधनं विना ॥ ११ ॥
आंग्लवाक् साधनं हि स्यादिति प्राहुर्जनाः क्वचित् ।
परंतु कोटयः सन्ति नराणां तदवेदिनाम् ॥ १२ ॥
आंग्लभाषा समभ्यस्ता सहस्रैरेव शिक्षितैः ।
न कोऽप्येकस्तु युष्मासु तुष्टः स्यादनयैकया ॥ १३ ॥
परः कोटिजनैः सार्धं मण्डलान्तरवासिभिः ।
सम्पर्कः श्रेयसे भूयाद्युष्माकमिति मे स्पृहा ॥ १४ ॥

हिन्दीं सुखतरोच्चारां सुबोधां चांग्लवाङ्मयात् ।
भाषन्ते बन्धवोऽस्माकं शतलक्षद्वयाधिकाः ॥ १५ ॥
न कदाप्यांग्लवाणीयं राष्ट्रभाषा भविष्यति ।
यद्यप्येतामपेक्षन्ते परं विद्याभिमानिनः ॥ १६ ॥
हिन्दीवाचा भवन्मातृभाषा न स्यादुपेक्षिता ।
हिंन्दीभाषा गिरः सर्वाः समुत्कर्षं हि नेष्यति ॥ १७ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां ग्रामसेवारम्भणो नामाष्टादशोऽध्यायः ।

नवदशोऽध्यायः ।

मुनिवह्निग्रहेन्द्वङ्कमितवत्सरसंभवान् ।
अनेकार्थकथालापान् वर्णयामि महात्मनः ॥ १ ॥
बेंग्लूरपुराच्छ्रीमान् गान्धिर्मेसूरभूपतेः ।
आमन्त्रणेन कोलारकार्तस्वरखनिं ययौ ॥ २ ॥
स तत्राकृत्रिमामृद्धिं सुवर्णस्य विलोकयन् ।
भृशं विस्मयमापेदे महिम्ना परमात्मनः ॥ ३ ॥
मन्यते स्म महात्मेदृक् सुवर्णाढ्येऽपि भारते ।
हन्त दारिद्र्यमस्तीति विधेः केयं विडम्बना ॥ ४ ॥
निलयांस्तु समालोक्य मेषबन्धालयोपमान् ।
पिण्डीभूय स्थितान्नृणां दयालुर्व्याकुलोऽभवत् ॥ ५ ॥

अथ कर्मकरान् सर्वानाकार्य समुदायशः ।
तत्सुखापादकान्मार्गान् कतिचित्समुपादिशत् ॥ ६ ॥
अथैकदा महात्मानं द्रष्टुकामश्चिरोत्सुकः ।
भूसुरः पण्डितः कश्चित्सेवाग्रामं समासदत् ॥ ७ ॥
सत्कृत्य द्विजमप्राक्षीद्गान्धिरार्या वदन्तु मे ।
अपि श्रीभगवद्गीताऽस्पृश्यतामभिमन्यते ॥ ८ ॥

पण्डित उवाच ।

असद् ध्यायति यश्चान्तरनार्यं भाषते च यः ।
असच्चरति यः कोऽपि सोऽस्पृश्यो गीतया मतः ॥ ९ ॥

महात्मा प्राह ।

सत्येवं हि वयं सर्वे भवामोऽस्पृश्यताङ्किताः ।
कोऽनघोऽस्तीह पश्यामो महाराजानघोऽसि किम् ॥ १० ॥
इति तुक्डीमहाराजो नाम कश्चिदपृच्छयत ।
अनघो नास्मि हन्तेति स च प्रत्युत्तरं ददौ ॥ ११ ॥
अब्दुल्गफारखानार्यस्तदानीमाश्रमे वसन् ।
पृष्टः प्राह न निर्दोषो महात्मन्नस्ति मानवः ॥ १२ ॥
अब्रवीद्गान्धिरस्पृश्यास्तर्हि सर्वे वयं स्थिताः ।
अन्येभ्यः स्वं लघीयांसं मन्तुमर्हति सज्जनः ॥ १३ ॥
अवरो नास्ति मत्तोऽन्यस्तथा दुष्टतरोऽपि वा ।
इति नित्यं जगौ सिद्धः सूरदासः शुचिव्रतः ॥ १४ ॥

जगाद पण्डितः शास्त्रप्रमाणं किन्त्वपेक्ष्यते ।
हेयोपादेयनिर्धारे न तु स्वेच्छा नियामिका ॥ १५ ॥
गान्धिः प्राह न शास्त्रं तत्प्रमाणं सत्यजीविनाम् ।
जन्मनः कारणाद्येनास्पृश्यता धिक्प्रसज्जिता ॥ १६ ॥
तथाविधानि शास्त्राणि नास्माकं शोधयन्त्यघम् ।
परन्तु पापभारस्य संवृद्धिं तन्वते भुवः ॥ १७ ॥
अथैकदाश्रमं कश्चित्प्राप्तो हरिजनाग्रणीः ।
श्रद्दधानो महात्मानं पप्रच्छ परमादरात् ॥ १८ ॥
भगवन्तमजानन्तो महात्मन् ब्रूहि तत्त्वतः ।
कुर्वीमहि कथं तस्य पामराः परिसेवनम् ॥ १९ ॥

गान्धिरुवाच ।

ईश्वरं न हि पश्यामः सृष्टिरस्य तु वीक्ष्यते ।
तत्सृष्टिसेवया सौम्य सेव्यते परमेश्वरः ॥ २० ॥
सेवेमहि कथं सृष्टिमशेषां परमात्मनः ।
इति भूयो विजिज्ञासुं महात्मा प्रत्यभाषत ॥ २१ ॥
उपकारो हि कर्तव्यः प्रतिवेशनिवासिनाम् ।
सोत्तमा भगवत्सेवा भगवत्प्रीतिदायिनी ॥ २२ ॥
निजाङ्गणविशुद्ध्यैव न संतुष्टो भवेन्नरः ।
पराङ्गणं च संशुद्धं यथा स्यात्तनुयात्तथा ॥ २३ ॥
स्वमिव स्वकुलं रक्षेद्ग्रामं रक्षेत्कुलं यथा ।
निजग्रामस्य रक्षायां पुरुषस्यास्ति पौरुषम् ॥ २४ ॥

लोकानुभवतः स्पष्टमस्माभिर्ज्ञायते किल ।
सेवाशक्तिर्यथा पुंसः परिच्छिन्नैव वर्तते ॥ २५ ॥
अत एव नरः स्वार्थं मन्येताल्पं परार्थतः ।
यथैव धेनुरात्मानं वत्सरक्षापरायणा ॥ २६ ॥
निजांगणात्प्रतिक्षेपः कचरस्य परांगणे ।
परं लज्जावहः पुंसां यद्यपि स्वार्थसाधकः ॥ २७ ॥
अथ भाद्रपदेऽभ्यागादेकदागन्तुकद्वयम् ।
पॉलाख्याऽऽमेरिकानारी चेनाख्यश्चीनयात्रिकः ॥ २८ ॥
ऊचतुश्च महात्मानमुभौ स्वागतवादिनम् ।
भवतो ज्ञातुमिच्छावः शंसनीयं मनोगतम् ॥ २९ ॥

महात्मा प्राह ।

जिज्ञासा यदि वामार्यौ राष्ट्रकार्यक्रमस्य नः ।
श्रीमान् राष्ट्रपतिर्नेहरुर्भवद्भ्यामवलोक्यताम् ॥ ३० ॥
राष्ट्रसंघान्निवृत्तोऽस्मि न प्रमाणं वचो हि मे ।
स्थितोऽस्मि पृष्ठतोऽस्याहं बहिष्ठः संजयो यथा ॥ ३१ ॥

चेनः प्राह ।

अपि संघान्निवृत्तोऽभूद्भवानपरितोषतः ।
उतान्यकार्यकर्तॄणामवकाशप्रदित्सया ॥ ३२ ॥
इति पृष्टोऽब्रवीद्गान्धिः सौम्य नेदं हि कारणम् ।
सत्यप्रचोदितो ग्रामे स्थिरीकृतपदोऽस्म्यहम् ॥ ३३ ॥

याज्ञिक उवाच ।

स्थितोऽसि देहमात्रेण ग्रामे न पुनरात्मना ।
आत्मा तु भवतो विश्वं विष्वग्भ्रमति सर्वदा ॥ ३४ ॥
राज्यतन्त्रपरिष्वंगी ममात्मा नान्यतो भ्रमेत् ।
दुर्लभो यः पुरा मेऽभूद् ग्रामवासोऽद्य भुज्यते ॥ ३५ ॥
उवाचामेरिकायोषिन्महात्मन् दुःखसागरे ।
निमग्नं जगदाश्वासमर्हतीदं भवादृशात् ॥ ३६ ॥
अतः प्रकाशयास्माकमात्मनो हृदयस्थितम् ।
निनीषे तव संदेशं लोकमोहप्रशान्तये ॥ ३७ ॥
इत्युक्तः शान्तमूर्तिस्तामब्रवीन्मौनमाश्रये ।
अत्रैव ग्रामकार्याणि पश्य मे वाचिकेन किम् ॥ ३८ ॥
दुःखार्णवाज्जनोद्धारः कथमित्यतिदुर्घटः ।
प्रश्नोऽयं प्रतिवाक्यं तु परेशोपासनादिति ॥ ३९ ॥
यादृगेकान्तिकी श्रद्धा यादृगध्यात्मदर्शनम् ।
भवदीयमिति श्रुत्वा देशं नेष्ये भवद्वचः ॥ ४० ॥
इत्युक्ते सोऽब्रवीद्रान्धिर्भद्रे तद्वाक्पथातिगम् ।
बाढमस्तु तथाप्यस्ति श्रद्धा ते वस्तुनि क्वचित् ॥ ४१ ॥
इत्युक्तः प्राह यद्ग्रामे कुर्वे सरलजीवनम् ।
ग्रामकार्यस्य संसिद्ध्या चरितार्थो भवाम्यहम् ॥ ४२ ॥
भारतीया हि ते वत्साः किमेषां भविता मुने ।
अत्रापि सन्न्यमी भद्रे सह तैर्निवसाम्यहम् ॥ ४३ ॥

अधिकं नगरावासात् किमु ग्रामे भवान् सुखी ।
सुखं नाम न कल्याणि बाह्योपाधिव्यपाश्रयम् ॥ ४४ ॥
चेनः श्रीमानथो मान्यः सानुगस्य मुनेः पुरः ।
अवर्णयत्स्वदेशस्य विस्तरेण परिस्थितिम् ॥ ४५ ॥
चीनभूरद्य निःशेषं शात्रवं प्रत्यवस्थिता ।
सहमाना विपज्जालमनपेक्ष्य पराश्रयम् ॥ ४६ ॥
नैरक्षर्यव्यपोहाय प्रजानां वर्णमालिकाम् ।
अत्यन्तविशदीकृत्य प्रवृत्ता लोकशिक्षणे ॥ ४७ ॥
देशारोग्यस्य रक्षायै जन्मभूमिरियं मम ।
प्रशस्तसंविधानानि रचयन्ती प्रयस्यति ॥ ४८ ॥
कृषीवलक्रियां मुख्यामुत्तेजयति साधनैः ।
कार्पासव्यवसायस्य संवृद्धिं तनुतेतराम् ॥ ४९ ॥
प्रजानागरिकत्वस्य पाटवाय दिवानिशम् ।
उपर्यधश्च संस्कारान् निर्मिमीते विवेकतः ॥ ५० ॥
जपानाख्यो महाशत्रुर्यथा नः क्षोभमातनोत् ।
तथैवास्य प्रतीकारश्चीनभूम्या करिष्यते ॥ ५१ ॥
पुरा सांग्रामिकीं शिक्षां वीरभूरिति विश्रुतात् ।
अयतामहि संप्राप्तुं रुसियादेशतो वयम् ॥ ५२ ॥
राज्यभारक्रमो यत्र दृश्यंते हि विलक्षणः ।
वैयक्तिकस्वतालोपाद् गृहक्षेत्रादिके धने ॥ ५३ ॥

नेत्रा सन्याटसेनेन रुसियासंगशङ्किना ।
बोधिता विजहुश्चीनास्तद्देशाद्योधशिक्षणम् ॥ ५४ ॥
युयुत्सा परदेशैर्नः सर्वथा नहि विद्यते ।
प्रविष्टशत्रुनिष्कासे वयमेकान्ततत्पराः ॥ ५५ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां यात्रिकसंवादो नाम नवदशोऽध्यायः ।

विंशोऽध्यायः ।

एकदा नापितः कश्चिदस्पृश्यत्वे कृतादरः ।
क्षुरकर्मकृते गान्धेराहूतोऽपि व्यलंबत ॥ १ ॥
ग्रामणीर्मां बहिष्कुर्यात्किङ्करस्य महात्मनः ।
क्षुरकर्म करिष्यामि कचिद्धरिजनस्य चेत् ॥ २ ॥
एकदा सायमागम्य ग्रामणीर्गान्धिमब्रवीत् ।
महात्मन् यस्त्वया भृत्यः पुत्रवत्परिपाल्यते ॥ ३ ॥
मुण्डनानन्तरं तस्य क्षुरकर्म करोतु मे ।
नापितस्तन्न दोषाय दोषस्त्वन्यत्र विद्यते ॥ ४ ॥
स हि मां स्वगृहे भोक्तुं निमन्त्रयति साग्रहम् ।
बहिर्गेहान्न भुक्तोऽहं कथं भुंजीय तद्गृहे ॥ ५ ॥
भवदागमनात्पूर्वं मतमस्पृश्यतां प्रति ।
मदीयमन्यदेवासीत्संप्रदायनिरूढितः ॥ ६ ॥

इदानीं भवतः संगान्मया त्यक्तो दुराग्रहः ।
अस्पृश्यस्पर्शनान्मन्ये न भवेत्कोऽपि दूषितः ॥ ७ ॥
कुतोऽयमाग्रही मुण्डी भोजनामन्त्रणे तव ।
इति श्रीगान्धिना पृष्टो जगाद ग्रामनायकः ॥ ८ ॥
स्वजातीयैर्बहिष्कारं शङ्कमानः स नापितः ।
मद्भोजनं गृहे स्वस्य प्रमाणीकर्तुमिच्छति ॥ ९ ॥
भवत्यस्पृश्यताभंगक्रमान्तःपाति किं मुने ।
उच्चानां नीचजातीयैर्भोजनप्रतिभोजनम् ॥ १० ॥
प्रत्युवाच महात्मैनं न तादृङ् नियमोऽस्ति नः ।
अस्पृश्योऽप्येष गोविंदः पाचकोऽस्ति मम प्रियः ॥ ११ ॥
अनुकुर्वन्तु मां सर्वे प्रीता हरिजने यदि ।
दुराग्रहान्निवृत्तिर्वः परं तुष्टिकरी मम ॥ १२ ॥
ग्रामाध्यक्षस्तदारभ्य विहायास्पृश्यताहठम् ।
गच्छति स्वाश्रमं नित्यमन्त्यजौदनिकाश्रितम् ॥ १३ ॥
अथ धर्मप्रतिष्ठावानांग्लः शेपर्डनामकः ।
समरप्रतिषेधाय यतते स्म निरन्तरम् ॥ १४ ॥
स्वमतस्थैरसौ धर्मे प्रचारमकरोत्तथा ।
स्वदेश्या बहवोऽभूवन् युद्धविद्वेषिणो यथा ॥ १५ ॥
अथ दिल्लीपुरे काचिद्राजकीयांग्लपत्रिका ।
निंनिंद नितरामेनमुपन्यस्य स्मृतेर्वचः ॥ १६ ॥

तथा हि लिखितं पत्रे श्रीकृष्णोऽर्जुनमब्रवीत् ।
यो रणे निर्भयद्वेषो विजयी स भवेदिति ॥ १७ ॥
तदेतद्गान्धिरालोक्य हसन् सोत्प्रासमब्रवीत् ।
अहो परमपाण्डित्यं संपादकशिरोमणेः ॥ १८ ॥
घातुकोऽप्यनया सूक्त्या स्थगयेत्पापमात्मनः ।
भगवद्वचनस्यार्थमन्यथा परिकल्पयन् ॥ १९ ॥
प्रत्यहं भगवद्गीतां परिशीलयतो मम ।
प्रतीतिस्तु तदन्येव प्रादुर्भवति निश्चिता ॥ २० ॥
अर्जुनो हि न युद्धस्य प्रतिकूलोऽभवद्यथा ।
पाश्चात्याः सांप्रतं केचिद्भवन्ति प्रतिरोधकाः ॥ २१ ॥
अर्जुनो युद्धविश्वासी कौरवैर्युयुधे स्वयम् ।
कृष्णस्तु भगवानासीत्प्रार्थितस्तस्य सारथिः ॥ २२ ॥
प्रतिपक्षमुखे दृष्ट्वा पित्राचार्यादिबान्धवान् ।
अनिच्छन् हन्तुमेतान्स निस्सत्त्वोऽभूत्तदार्जुनः ॥ २३ ॥
तं प्रेक्ष्य त्यक्तगाण्डीवमश्रुपूर्णाकुलेक्षणम् ।
उवाच भगवान्वाक्यं यथोक्तं समयोचितम् ॥ २४ ॥
काव्यरत्नखनौ गीता भारतस्योज्ज्वलो मणिः ।
येनाकल्पस्थिरां कीर्तिं व्यासः प्राप कवीश्वरः ॥ २५ ॥
यत्र हिंसाप्रधानस्य युद्धस्यैकान्तमोघता ।
विजयाडंबरैः शून्यैर्जगते तेन दर्शिता ॥ २६ ॥

न हि काव्यमिदं युद्धमहत्त्वस्य निदर्शकम् ।
अज्ञानमोहमूलत्वं व्यनक्त्यस्य तु केवलम् ॥ २७ ॥
धर्माधर्मपरीमर्दश्चित्तविक्षोभको नृणाम् ।
विस्तरेण प्रबन्धेऽस्मिन्नृषिवर्येण वर्णितः ॥ २८ ॥
धर्म एव सदा जिष्णुर्भवत्यत्र न संशयः ।
अधर्मः किंतु बलवान् बाधते धार्मिकीं धियम् ॥ २९ ॥
पुरातनः कवीन्द्रोऽयं कथारत्नसहस्रकैः ।
न सत्यादपरः पन्थाः सुखायेति न्यदर्शयत् ॥ ३० ॥
अथैकदा बहिर्गान्धेः कुटीराद्बहवोऽर्भकाः ।
वृन्दीभूय स्थिता हृष्टाः सामिनम्रमलीमसाः ॥ ३१ ॥
आसीत्काचकुपी तत्र लेखनाधारपीठके ।
अन्तर्निवेशितव्याला भृशकौतुकदायिनी ॥ ३२ ॥
बद्धदृष्टीन् बहून् सर्पे वीक्ष्य गान्धिरुपादिशत् ।
बटवः श्रूयतां सर्वे सावधानमिदं वचः ॥ ३३ ॥
व्यालान् दृष्ट्वैव हिंसन्ति ग्रामिका निर्विवेचनाः ।
सविषा निर्विषाश्चापि विद्यन्ते हि सरीसृपाः ॥ ३४ ॥
तद्विशेषमविज्ञाय हननं नोपपद्यते ।
सृष्टिर्जन्तोर्न कस्यापि ब्रह्मणा हि वृथा कृता ॥ ३५ ॥
भूयिष्ठा निर्विषाः सर्पाः कृषिकस्यापकारकाः ।
मूषकक्रिमिकीटादीन् निहत्य क्षेत्रशोधनात् ॥ ३६ ॥

तन्वन्ति सस्यवृद्धिं च कृत्वा भूमिं निरीतिकाम् ।
न कदापि दृशन्त्यैते जन्तवो ह्यनुपद्रुताः ॥ ३७ ॥
अतोऽत्र स्थापयाम्येतान् जीवतश्च मृतानपि ।
प्रदर्शनाय लोकानां भुजंगविषशङ्कितान् ॥ ३८ ॥
उपक्रान्तं मया लब्धुं सर्पविज्ञानशिक्षणम् ।
सर्पतत्त्वमिहत्येभ्यो निवेदयितुमिच्छता ॥ ३९ ॥
भवन्ति प्राणिनः सर्वे समा एव परस्परम् ।
सज्जने दुर्जने चापि सर्वदा सममाचरेत् ॥ ४० ॥
तथा हि भगवानेतद् गीतायामुपदिष्टवान् ।
विप्रे शुनि श्वपाके च समदृष्टिर्भवेदिति ॥ ४१ ॥
किं च सर्पा भवन्त्यस्मत्क्षेत्रपालाः शिवङ्कराः ।
न तावद्भीतसर्पेभ्यो नराणां विद्यते भयम् ॥ ४२ ॥
अथ जातु दुराचारो जुगुप्स्यः कोऽपि पावने ।
आश्रमे श्रुतिमायातः श्रीगान्धेः पूतचेतसः ॥ ४३ ॥
तत्प्रसंगादुपादिक्षद्धिदूनः सहवासिनः ।
सेवा हरिजनस्याथ दीनानाथजनस्य च ॥ ४४ ॥
शुद्धचारित्रसंपन्नामात्मशुद्धिमपेक्षते ।
न धत्ते शुभसंकारे तत्तुलामितरो गुणः ॥ ४५ ॥
प्रेरितोऽहमिदं वक्तुं निशम्यं सहकृत्वनोः ।
द्वयोरिह दुराचारं सदाचारप्रतीतयोः ॥ ४६ ॥

तयोर्हृदन्तरे लीनः स्थितः कामभुजङ्गमः ।
येन प्रसह्य संदष्टौ पापकुण्डे निपेततुः ॥ ४७ ॥
अहमेतौ सुचारित्रौ सदामंसि प्रसन्नधीः ।
अतीव गहनं नृणां हृदयं वेत्ति को जनः ॥ ४८ ॥
अतः परमिमौ सेवासंघे न स्थातुमर्हतः ।
निष्कासनमिदं दण्डः पर्याप्तो नास्ति यद्यपि ॥ ४९ ॥
यदा हि पतितः पापी विशुद्धः पुनरुत्थितः ।
तदा सेवेत सर्वत्र भूत्वा समधिकं पटुः ॥ ५० ॥
शुद्धिरप्यस्य लोकानां भविष्यत्युपकारिणी ।
पङ्किलो वीतपङ्कश्चेन्निषेव्यः स्याज्जलाशयः ॥ ५१ ॥
शुद्धस्य जनसेवायै समाजे पुनरागमः ।
अन्तरा जनविश्वासं न शक्यः स्यान्मनागपि ॥ ५२ ॥
लोकस्य हि स्वभावोऽयं कार्यदक्षः प्रशस्यते ।
वाच्यमप्यस्य चारित्रं पृष्ठतः क्रियते जनैः ॥ ५३ ॥
इदं लोकमतं नैव स्पृहणीयं मम क्वचित् ।
गतानुगतिको नाहं तदंगीकरणं कुतः ॥ ५४ ॥
न लेशतोऽपि मे शंका यच्चारित्रविशुद्धता ।
सेवायै मूककोटीनामाद्यमेकान्तसाधनम् ॥ ५५ ॥
अथ प्राहैकदा गान्धिरन्त्यजानां सुहृन्मणिः ।
यदि स्वकर्मनिष्णातो वर्तते मलशोधकः ॥ ५६ ॥

तदा द्विजसमानः स्याद्विशिष्येत ततोऽपि वा ।
अविद्वानशुचिर्विप्रो भुवि भारो हि केवलम् ॥ ५७ ॥
विनैव ब्राह्मणं जीवेत्सुखेन मलशोधकः ।
ब्राह्मणो न सुखं जीवेद्विना तु मलशोधकम् ॥ ५८ ॥
लोकानामुपकाराय ध्रियते मलशोधकः ।
तत्करोति नृणां कृत्यं यन्माता कुरुते शिशोः ॥ ५९ ॥
बालमारोग्यरक्षायै प्रक्षालयति सान्वहम् ।
दीनः सोऽपि समाजस्यारोग्यं रक्षति शोधनात् ॥ ६० ॥
विप्रस्य खलु धर्मोऽयमात्मशुद्धेरवेक्षणम् ।
मलशोधकधर्मस्तु देहशुद्ध्यनुपालनम् ॥ ६१ ॥
मूलमेष समस्तानां योगक्षेमस्य सेवकः ।
तथाप्यस्माभिरस्पृश्य इति हन्त कलङ्कितः ॥ ६२ ॥
अहो तं कुर्महे शप्यं दण्ड्यमुच्छिष्टभोजिनम् ।
मलपिण्डमिवोत्सार्य दूरतश्च बहिष्कृतम् ॥ ६३ ॥
तस्य नामाप्यवज्ञानाच्छापोक्तिं मन्महे वयम् ।
अतो वयं तिरस्कार्या भवामो जगतः किल ॥ ६४ ॥
विप्रचाण्डालयोर्यावद्भेदधीर्जन्मकारणात् ।
तावद्भारतभूर्न स्यादारोग्यशमसौख्यभाक् ॥ ६५ ॥
भवेत्स्वकर्मनिष्णातः सर्वथा मलशोधकः ।
आरोग्यशास्त्रविज्ञानं तत्कृते समपेक्ष्यते ॥ ६६ ॥

सुशिक्षितसमाजेन द्रष्टव्यो मलशोधकः ।
साभिमानं ससत्कारमेष धर्मो मनीषिणः ॥ ६७ ॥
स मनीषी विजानीयादारोग्यनियमान् स्वयम् ।
ततश्च शिक्षयेदेतान् तन्निवासविशोधनम् ॥ ६८ ॥
तदालया हि दृश्यन्ते गर्हिता मलकुण्डवत् ।
जीवन्त्यमी वराकाश्च कृपणं क्रिमिकीटवत् ॥ ६९ ॥
अयं मानुषसेवायां महत्त्वमभिकाङ्क्षिणाम् ।
परिश्रमः सुपर्याप्तः स्वात्मनः प्रीतिदायकः ॥ ७० ॥
अथ पूज्यो निमग्नोऽभूत्सेवाग्रामनिवासिषु ।
तन्त्रीसंदेशलोहाध्वसौकर्यादतिदूरतः ॥ ७१ ॥
व्यचिन्तयदसौ ग्रामे जनोऽस्मिन्नवगण्यते ।
नीचत्वेन समाजस्थैरत्र वासो गुणाय मे ॥ ७२ ॥
अहिंसाबलमत्रैव परिक्षिष्ये प्रयोगतः ।
दर्शयामि च लोकाय साधकत्वमनुत्तमम् ॥ ७३ ॥
शिक्षणीया इमे मार्गं येनाल्पादपि वस्तुतः ।
अर्थमर्जयितुं शक्ता भवेयुः स्वस्वकर्मभिः ॥ ७४ ॥
येन चारोग्यरक्षायै शुद्धक्षीरगुडादिकम् ।
संपादयितुमीशः स्युः साक्षरत्वं च शिक्षया ॥ ७५ ॥
ईदृगभ्युदयो ग्रामे प्रतिभायात्सुदुष्करः ।
अशक्य एव जायेत मादृशस्य जनस्य वा ॥ ७६ ॥

यस्य त्वेकान्ततः श्रद्धा सत्याहिंसा परात्मनि ।
स काले प्रभवेत्कर्तुमशक्यं यद्धि सांप्रतम् ॥ ७७ ॥
अथात्रास्पृश्यतोच्छित्त्यै प्रयत्नोऽस्य महात्मनः ।
लोकेषु बहुलीभूय फलन्ति स्म शनैः शनैः ॥ ७८ ॥
अनन्तशयने राजा साटोपमुदघोषयत् ।
अनुज्ञामन्त्यजातिभ्यः प्रवेशाय सुरालये ॥ ७९ ॥
देवालयेषु यद्भागे मिलन्ति स्म द्विजादयः ।
शेकुर्हरिजनास्तत्र संनिधातुं यदृच्छया ॥ ८० ॥
गर्भागारं विनान्यत्र चरन्तः सर्वतोऽप्यमी ।
संभूयागन्तुकैरन्यैरकुर्वन् देवतार्चनम् ॥ ८१ ॥
पवित्रोदककुण्डेषु मन्दिराभ्यर्णवर्तिषु ।
अवतीर्यात्मशोधाय वितेनुर्मार्जनादिकम् ॥ ८२ ॥
ये पुरा दर्शनं तेषां परिजह्रुर्जुगुप्सया ।
तेऽधुना प्राप्य संसर्गं व्यवजह्रुर्द्विजादयः ॥ ८३ ॥
दाक्षिणात्यप्रदेशेषु समुद्धाट्य सुरालयान् ।
अन्येऽपि समसौकर्यमन्त्यजानामकल्पयन् ॥ ८४ ॥
महात्मा च श्रुतोदन्तः पूजयामास हर्षुलः ।
अभिनन्दनमालाभिस्तत्तज्जनपदेश्वरान् ॥ ८५ ॥
अथो हरिजनार्थाय चिकीर्षुर्धनसञ्चयम् ।
गुर्जरान् गन्तुकामोऽपि वारितोऽभूद्रुजार्दितः ॥ ८६ ॥

तदर्थं ठाकरस्रातः सह सर्दारवल्लभैः ।
गत्वा त्रिंशत्सहस्राणि रूप्यकाणां समग्रहीत् ॥ ८७ ॥
व्याधिना व्याकुलीभूते शयितेऽथ महात्मनि ।
आग्लयौ मुरियल्नाम्नी लेस्टराख्यकुलोद्भवा ॥ ८८ ॥
भ्रान्तपश्चिमभूखण्डचीनजापानमण्डला ।
चीनजापानयोषिद्भ्यामुपेता दर्शनार्थिनी ॥ ८९ ॥
जातापि धनिनां गेहे सुखावासं विहाय सा ।
जग्राह वसतिं दीनैर्लण्डने दीनवत्सला ॥ ९० ॥
साम्राज्यदर्पदमनी शमनी जनतारुजः ।
भ्रमन्ती देशदेशेषु सा हि लोकानुपादिशत् ॥ ९१ ॥
नीचानाथजनैः सख्यं चकार समवर्तिनी ।
दीनहिंसकवित्ताढ्यपापनिष्कृतिमिच्छती ॥ ९२ ॥
जापानदेशजा सख्यं तया सार्धमुपागमत् ।
चीनान् प्रति स्वदेश्यानां दुःखिता घोरकर्मभिः ॥ ९३ ॥
अथ चीनी तृतीयासीत्तियन्नाम्नी नृपात्मजा ।
शांगाईपुरवास्तव्या राजभोगपराङ्मुखी ॥ ९४ ॥
दीनलोकैः सहोवास पत्यौ लोकान्तरं गते ।
अन्वगात्सापि जापानसखीं गान्धेर्दिदृक्षया ॥ ९५ ॥
तिसृणामथ जापानी स्वदेशस्य महात्मने ।
दुर्दशां वक्तुमारेभे जनविप्लवकारिणीम् ॥ ९६ ॥

६ सत्या०

जगाद च श्रुतोदन्तं विनयेन कृताञ्जलिः ।
विश्रुतो हि भवानेको जगतः क्षेमचिन्तकः ॥ ९७ ॥
बान्धवानुपदेष्टुं मे देशमागन्तुमर्हसि ।
समाश्वासकरोऽस्माकं कालेऽस्मिन् भवदागमः ९८ ॥
यथा संतप्तजीवानामनावृष्टौ घनोदयः ।
उत्तेजनं भवद्वाचा लभतामखिलो जनः ॥ ९९ ॥
महात्मोवाच देशे वः किं मम स्यात्प्रयोजनम् ।
जानामि चीनभूरद्य लोभोपहतचेतसा ॥ १०० ॥
जापानद्वीपराज्येन हठादाक्रम्य पीड्यते ।
आक्रम्यते च तेनैव भारतं तद्वणिज्यया ॥ १०१ ॥

जापानी प्रत्युवाच ।

देशे हि जनसामान्यं युद्धमेतन्न वाञ्छति ।
प्राज्ञाश्च बहवः सन्ति युद्धस्य परिपन्थिनः ॥ १०२ ॥
विप्रकारैर्युयुत्सूनां कृतैश्चीनभुवं प्रति ।
लज्जिताः किल भूयांसो वयमेनां निरागसम् ॥ १०३ ॥
संक्षोभतमसा ग्रस्ता नेक्षन्ते नाशमात्मनः ।
युध्यमानाः प्रबोध्यास्ते प्रशमाय भवादृशैः ॥ १०४ ॥
भारतं शाक्यसिंहस्य जन्मभूमिः प्रियं हि नः ।
साऽऽध्यात्मज्ञानदाऽस्माकं भौतिकज्ञानदा वयम् ॥ १०५ ॥

अलमद्य जपानस्य समृद्धा भारभूतया ।
भवक्लेशाम्बुधौ मग्ना जीवामो ध्येयवर्जिताः ॥ १०६ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां विदेशस्त्रीसंवादो नाम विंशोऽध्यायः ।

एकविंशोऽध्यायः ।

अथ माधवदेसाई नाम मन्त्री महात्मनः ।
राणी परागदेशस्य वेलचीनगरं ययौ ॥ १ ॥
तत्र कार्यक्रमं ग्रामशिल्पादिव्यवसायिनाम् ।
समालोक्याभवद्भूरिविस्मितो मुदितश्च सः ॥ २ ॥
कवीन्द्रस्तुलसीदासः पुरा यत्र सदाकरोत् ।
लोकपापौघविध्वंसं रामनामशिलीमुखैः ॥ ३ ॥
तत्कवीन्द्रसमप्रख्यं महात्मानममंसत ।
यत्र ग्रामजनाः सर्वे ततो वापि महत्तरम् ॥ ४ ॥
आसन्निरक्षरास्तेऽमी बहिर्ग्रामान्न निर्ययुः ।
तथापि तन्तुचक्रस्य प्रेमशुद्धो महात्मनः ॥ ५ ॥
अचिरान्नवसंदेशस्तेषां कर्णपथेऽपतत् ।
जीवितं च ततस्तेषां नवीकृतमिवाभवत् ॥ ६ ॥
ग्रामीणः सुस्थितः कश्चित्खादिवद्धादरश्चिरात् ।
आत्मानं पावितं मेने सुवचोभिर्महात्मनः ॥ ७ ॥

अथासौ प्रमयात्पूर्वं कुटीनां पञ्चकं ददौ ।
चतस्रः पाठशालार्थमेकां देवालयाय च ॥ ८ ॥
सार्धद्विमासपर्यन्तं वैद्यैः कृतचिकित्सनः ।
महात्मा भार्यया सार्धमम्दाबादपुरं ययौ ॥ ९ ॥
एकस्मिन् दिवसे प्रातस्तत्र पत्न्यां निजाश्रमम् ।
सबर्मतीतटे प्राप द्रष्टुकामो निवासिनः ॥ १० ॥
अथ गोत्रजमासाद्य बालिकाभिः सुगुम्फिताः ।
हस्तनिर्मितसूत्राणां स्वीचकार सुमालिकाः ॥ ११ ॥
ततो हरिजनानां च शतशो मिलितान् जनान् ।
अब्रवीद्बोधयन् वाचा प्रेमविश्वासपूर्णया ॥ १२ ॥
सार्धमासद्वयं जोषं विश्रामाय स्थितस्य मे ।
निरन्तरमभूच्चिन्ता व्रतस्थाश्रमवासिनाम् ॥ १३ ॥
निर्गता बहवस्तेषां न जाने तत्र कारणम् ।
व्रतानां दोषतः किं वा व्रतिनां वेत्यनिश्चयात् ॥ १४ ॥
नास्ति दोषलवोऽप्येषां व्रतानां स्वस्वरूपतः ।
तत्पालनोपदेशो मे नानुतापो हि मे मनाक् ॥ १५ ॥
चिरादेव भवाम्येष गीतायाः पर्युपासकः ।
अवार्ये कर्मणः पाके श्रद्धा मे सुविनिश्चला ॥ १६ ॥
निष्कारणं न जायेत प्रमादोऽल्पतरोऽपि सन् ।
कायेन मनसा वाचा गीतार्थं परिशीलिनः ॥ १७ ॥

कथं मे धातुवैषम्यं संभवेद्रोगदायकम् ।
इति मे विस्मयो भूयान् हृदये परिवर्तते ॥ १८ ॥
भिषग्वर्यास्तु मन्यन्ते यदस्वास्थ्यमिमं मम ।
चिन्तयातिश्रमेणापि समजायत केवलम् ॥ १९ ॥
मतमेषां प्रमाणं चेद्ग्रस्तोऽहं चिन्तयाहिना ।
कामक्रोधादिभिश्चास्मि दोषैराक्रम्य वञ्चितः ॥ २० ॥
यदि मे मानसी शान्तिर्विनश्येत्कारणान्तरात् ।
नास्ति गीतार्थदोषोऽयं श्रद्धायां लघिमा तु मे ॥ २१ ॥
गीतोपदिष्टतत्त्वानि यथार्थानि हि सर्वदा ।
तद्बोधे चाप्यनुष्ठाने दोषः स्यान्मत्प्रमादतः ॥ २२ ॥
व्रतानि सत्यपूतानि पालने तु व्यतिक्रमः ।
सन्तीह व्रतिनः पूर्वे कर्तुं हरिजनप्रियम् ॥ २३ ॥
यद्यमी स्वयमाचर्य प्रेरयन्ति परानपि ।
तदा सुमहतीं सेवां कुर्युर्हरिजनस्य ते ॥ २४ ॥
धनप्रदानमात्रेण न भवेत्कृतकृत्यता ।
सेवायाः किल सारोऽयमुपकारस्तितिक्षया ॥ २५ ॥
तदेतदात्मनः शुद्ध्या सुकरं कार्यकारिणाम् ।
सेवा हरिजनार्थे या सा सत्यं हरितोषिणी ॥ २६ ॥

विद्यापीठे ततो गान्धिश्छात्रलोकानुपादिशत् ।
अयि भो युवकाः सर्वैरसत्यपथवर्जनात् ॥ २७ ॥

सत्याश्वश्रेयणीयो वस्तमो हित्वा यथा प्रभा ।
सत्यव्रततरोर्मूलमहिंसोदकसेचनैः ॥ २८ ॥
रक्षणीयं सदा नो चेत्सत्यवृक्षो न वर्धते ।
न च बध्नात्यमोघानि फलानि श्रेयसेऽपि वः ॥ २९ ॥
युवकान् नागरान् कर्तुं ग्रामसेवापटीयसः ।
विद्यापीठमिदं तावत्पूर्वमासीत्प्रतिष्ठितम् ॥ ३० ॥
यूयं हि ग्रामसंतानः स्वातन्त्र्याय कृतश्रमः ।
युष्माभिः शिक्षितं यद्यद्ग्रामार्थमुपयुज्यताम् ॥ ३१ ॥

वरदानगरं यास्यन्नथ मार्गे दिनद्वयम् ।
बार्दोलीनामनि ग्रामे मुनिर्वसतिमग्रहीत् ॥ ३२ ॥
ग्रामाद्ग्रामं जनस्तोमः सन्निपत्य सहस्रशः ।
दर्शनार्थी स्थलीः सर्वा ग्रामस्याक्रम्य विष्ठितः ॥ ३३ ॥
उत्सुकोऽपि जनश्चक्रे नोपरोधं महात्मनः ।
कुटीरे वसतः काष्ठतालपर्णविनिर्मिते ॥ ३४ ॥
आबालवनितावृद्धं ग्रामीणा भृशमुत्सुकाः ।
प्रार्थनावसरे तस्थुः प्रयता मौनमास्थिताः ॥ ३५ ॥
भगवत्प्रार्थनान्ते च श्रोतुकामानुपादिशत् ।
अयि भोः पालनीया वः साग्रहं नियमा इमे ॥ ३६ ॥
अहिंसा सत्यमस्तेयमभीतिरपरिग्रहः ।
ब्रह्मचर्यं तथास्वादलौल्यवर्जनमव्रते ॥ ३७ ॥

परधर्मेष्वविद्वेषः स्वदेशे चाभिमानिता ।
परस्परसमावृत्तिरित्येकादश रक्षत ॥ ३८ ॥
अस्तु सामाजिकः कामं संघे ग्रामोपसेवकः ।
राजतन्त्रप्रसंगेषु मा पुनः प्रविशत्वसौ ॥ ३९ ॥
ग्रामोद्यमसमाजश्च तन्तुचक्रीयमण्डलम् ।
संघेन निर्मितं चापि द्वयमेतद्बहिः स्थितम् ॥ ४० ॥
अदूष्यः सर्वकार्येषु स्थिरः संमोहवर्जितः ।
ग्राममेकः स्वयं रक्षेद्यथा लङ्कां बिभीषणः ॥ ४१ ॥
अत एव मया पूर्वमिदमुक्तं हि साग्रहम् ।
भारतस्य वरं नाशो न च रक्षाप्यसत्यतः ॥ ४२ ॥

अथैकदा महात्मायं क्वचिद्वृत्तान्तपत्रके ।
उर्दुवाणीमयेऽद्राक्षीदात्मनः खण्डनं यथा ॥ ४३ ॥
हिन्दुमुस्लिमयोरैक्यं प्रति गान्धिः प्रभाषते ।
वस्तुतो नापरोऽस्त्यस्मात्पक्षपातितरो जनः ॥ ४४ ॥
दृष्ट्वेदमलिखद्गान्धिः पत्रे हरिजनाभिधे ।
नेच्छाम्यस्मादधिक्षेपादात्मानमभिरक्षितुम् ॥ ४५ ॥
यद्यदाचरितं वृत्तं मयेयच्चिरजीविना ।
निःपक्षपातिताया मे तदेवास्तु निदर्शनम् ॥ ४६ ॥
पूर्वमुक्तं मयाभीक्ष्णं पुनरस्य ब्रवीम्यहम् ।
हिन्दुस्थान्युर्दुहिन्दीति व्यपदिष्टा किलोक्तिभिः ॥ ४७ ॥

एकभाषा भवत्येषा पारसीनागराक्षरा ।
अन्योन्यव्यवहाराय देशेषूत्तरभारते ॥ ४८ ॥
उर्दुशब्दप्रचारात्प्राग् हिन्दीवागेव सेविता ।
आसीदुभयजातीयैर्हिन्दुस्थानीति विश्रुता ॥ ४९ ॥
भूयिष्ठैर्वागुदिच्यैर्या देशजैरुपयुज्यते ।
तयैवोभयपक्षीयैर्व्यवहार्या जनैः सदा ॥ ५० ॥
हिन्दीं संस्कृतसंकीर्णां हिन्दवो हि प्रयुञ्जते ।
उर्दुं मुसलमानाश्च मिश्रितां पारसीगिरा ॥ ५१ ॥
हिन्दुमुस्लिमलोकानां यावदन्योन्यभिन्नता ।
अविश्वासश्च वर्तेत तावद्रीतिरियं ध्रुवा ॥ ५२ ॥
यदा हृदयमेकं स्यादुभयोरपि पक्षयोः ।
यदा सकलधर्माणां पश्यामश्चैकमूलताम् ॥ ५३ ॥
यदा तदुपदेशा नः स्यदन्ते सामरस्यतः ।
उच्चावचफलानीव द्रुमस्यैकस्य सर्वतः ॥ ५४ ॥
तदा ह्येकैव भाषापि सर्ववेद्या समाक्षरा ।
आसेतोरातुषाराद्रिं स्वनन्ती प्रचलिष्यति ॥ ५५ ॥

अथास्मिन् परमुज्ञाचे सेवाग्रामे सुखोषिते ।
अमेरिकाभुवोऽभ्यागात्कुमारः कश्चिदाश्रमम् ॥ ५६ ॥
आसीदेष विजिज्ञासुर्भारतस्य दरिद्रताम् ।
ग्रामोद्यमसमुद्धारमांग्लराज्यसमुन्नतिम् ॥ ५७ ॥

फलस्य शीघ्रनिष्पत्तिं कर्मणां येऽभिकाङ्क्षिणः ।
एतेषां ग्रामकर्माणि भान्ति मन्दफलानि हि ॥ ५८ ॥
इति मत्वाब्रवीदेनं श्रीमान्गान्धिः कुमारकम् ।
ग्रामकार्यक्रमोऽस्माकं निर्वोढुमतिदुर्घटः ॥ ५९ ॥
न तथा ग्रामलोकानां वर्णशिक्षा सुदुष्करा ।
यथैषां सुचिराभ्यस्तमनोवृत्तिविपर्ययः ॥ ६० ॥
कामं कार्यगतिर्मन्दा हिंसाया दूरवर्जनात् ।
तथा हि ध्रुवमेवैषा प्रसूते फलमीप्सितम् ॥ ६१ ॥
हठात्कारेण निर्वृत्ता भवेदाशुफलप्रदा ।
तत्फलं तु विजानीहि भविष्यत्येव नश्वरम् ॥ ६२ ॥
आगन्तुकोऽथ पप्रच्छ किमांग्लानामपक्रमे ।
अहिंसानियमोऽयं वः परेभ्यो रक्षितुं क्षमः ॥ ६३ ॥
अमी सार्धशताब्दीतो निरयास्यन्पुरैव चेत् ।
तदा किं भवतो देशः सुखमाप्स्यदितोऽधिकम् ॥ ६४ ॥
प्रत्युवाच महात्मैनमर्थेऽस्मिन्नात्र संशयः ।
किं वाधिकतरं श्रेयः स्वातन्त्र्यादपरं नृणाम् ॥ ६५ ॥
तदर्थमुचितारम्भः कर्तव्योऽभिनवः पुनः ।
भविष्यामो हि निर्मुक्ताः परदेशनियन्त्रणात् ॥ ६६ ॥
इदमभ्युपगच्छामो यदांग्लैः शिक्षणालयाः ।
स्थापिता लोहमार्गाश्च तत्र तत्र विनिर्मिताः ॥ ६७ ॥

एतेन परदेशानामासीदभ्युदयः परम् ।
भारते तु फलं तस्माद्विपरीतमजायत ॥ ६८ ॥
भारतीयं धनं देशादांग्लैर्नोपहृतं परम् ।
अपि बुद्धिप्रवाहो नः शोषणं गमितः किल ॥ ६९ ॥
इतो निर्गतमात्रेषु कचिदांग्लेषु भारतात् ।
भविष्यन्त्यद्भुता योगा इति जातु न मे मतिः ॥ ७० ॥
स्वेतिहासनवारम्भं करिष्यामः पुनस्तदा ।
भागधेयं स्वदेशस्य यदा हस्तगतं भवेत् ॥ ७१ ॥
काममांग्लास्तु तिष्ठन्तु भारते सहकारिणः ।
स्वयंसेवकवद्वापि न तु शासकदर्पतः ॥ ७२ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां राष्ट्रभाषाविमर्शो नामैकविंशोऽध्यायः ।

द्वाविंशोऽध्यायः ।

अथ शार्मण्यदेशीयः सेवाग्राममुपागमत् ।
स्टूंकाख्यो दैनिकोदन्तपत्रप्रतिनिधि र्युवा ॥ १ ॥
आसीदेकतमः सोऽयं हिट्लरस्योपजीविनाम् ।
प्रेषितः स्वामिना ज्ञातुं भारतस्य परिस्थितिम् ॥ २ ॥
स्वातन्त्र्यप्राप्तयेऽस्माकमुत्साहः स्यात् कियानिति ।
पृष्टवन्तं महात्मैनमुवाचागन्तुकं यथा ॥ ३ ॥

परैरनुपरुद्धं यज्जीवितं स्वेच्छया कृतम् ।
स्वातन्त्र्यमिति तद्ब्रूमः पारतन्त्र्यमतोऽन्यथा ॥ ४ ॥
विद्यतेऽत्र महासंघो जनानां स्थिरनिश्चयः ।
स्वपक्षन्यायसंसिद्ध्यै मन्यतेऽसूंस्तृणाय यः ॥ ५ ॥
हिंसन्तो न मरिष्यामो हन्यमानाः परैरपि ।
अहिंसैकपथालम्बा जयमाशास्महे वयम् ॥ ६ ॥
मानरक्षा मनुष्यस्य न शक्यैव बलं विना ।
इति हिट्लरवीरस्य मतं वेद न को जनः ॥ ७ ॥
विद्यन्ते बहवोऽस्मासु श्रद्दधानाश्चिराद्दृढम् ।
अहिंसायुधमात्रेण स्वातन्त्र्यस्य सुलभ्यताम् ॥ ८ ॥
रुधिरार्णवमुत्पाद्य जयमिच्छेम चेद्वयम् ।
भविता जगतोऽनिष्टं निखिलस्य भयावहम् ॥ ९ ॥
यदि शस्त्रास्त्रघातेन स्वातन्त्र्यमधिगम्यते ।
तदा प्रापञ्चिकी शान्तिर्हन्त दूरीभविष्यति ॥ १० ॥
प्राचीनचरिताख्यानं नित्ययुद्धमयं किल ।
वयं तु चरितं नव्यं निर्मातुं प्रयतामहे ॥ ११ ॥
ज्ञातराष्ट्रमनोभावः प्रातिनिध्येन घोषये ।
अहिंसाया बलीयस्त्वं मनोवाचामगोचरः ॥ १२ ॥
खड्गशक्तिरहस्यस्य गुणदोषविमर्शनम् ।
विधाय सूक्ष्मया दृष्ट्या तदियत्ता मयेक्षिता ॥ १३ ॥

हिंसाद्रुमं समुच्छिद्य तत्स्थाने प्रेमवल्लरीम् ।
आरोपयेत्ततः सापि प्रशान्तिफलदा भवेत् ॥ १४ ॥
चेतः सर्वजनाङ्गानां पाश्चात्यक्षितिमण्डले ।
स्वातन्त्र्यकामनावह्निज्वलितं परिचेष्टते ॥ १५ ॥
परान् स्वातन्त्र्यमस्माकं न वारयति कर्हिचित् ।
सहानुभूतिसंसर्गान्मनः पूर्वं स्वयंवृतात् ॥ १६ ॥
साम्राज्यलुब्धलोकैस्तु सहयोगो न युज्यते ।
लब्धमुक्तकपोतोऽपि श्येनस्तस्य भयावहः ॥ १७ ॥
पाश्चात्ययन्त्रभैषज्यनागरत्वादिकं प्रति ।
मतं गान्धेः स शार्मण्यः श्रोतुमैहत तन्मुखात् ॥ १८ ॥
यन्त्रैः सर्वार्थनिर्वाहो नास्माभिरभिलष्यते ।
ग्रामशिल्पसमुद्धारो विना यन्त्रैर्हि शक्यते ॥ १९ ॥
इत्युक्ते पुनरप्राक्षीदपि स्वातन्त्र्यलाभतः ।
पश्चाद् व्यत्ययमागच्छेन्महात्मन् तावकं मतम् ॥ २० ॥
तमुवाच ततो गान्धिरिदं मे शाश्वतं मतम् ।
न ततोऽस्त्यन्यथाभावः संकटेष्वपि कर्हिचित् ॥ २१ ॥
यन्त्रलोहपथादीनां विरुन्धानोऽप्यहं सदा ।
न निर्मूलनमेतेषां कर्तुमिच्छामि जातुचित् ॥ २२ ॥
यतो लोकहितायैते कल्पेरन् सुप्रयोगतः ।
अधुनेव न संग्रामविधये भूरिशः पुनः ॥ २३ ॥

पाश्चात्यारोग्यरक्षायास्तथा शल्यक्रियाविधेः ।
विषये किमभिप्रेतमिति पृष्टोऽब्रवीन्मुनिः ॥ २४ ॥
अत्र मे विमतिर्नास्ति ग्रामारोग्यविधीनहम् ।
पूरनाम्नो भिषग्वर्यादांग्लेयादवबुद्धवान् ॥ २५ ॥
अर्थास्तदुपदिष्टा ये त एवानुसृता मया ।
सति प्रयोगभेदेऽपि वैद्यतत्त्वं न भिद्यते ॥ २६ ॥
पाश्चात्यौषधमुद्दिश्य मया निन्दा कृता पुरा ।
कार्मणानां हि सारोऽयमिति तद्वर्णितं मया ॥ २७ ॥
मम सर्वेऽप्यभिप्राया अहिंसामूलमाश्रिताः ।
जीवतामङ्गविच्छेदान्ममात्मोद्विजते भृशम् ॥ २८ ॥
वैद्यकं पूर्वमध्येतुं मतिरासीन्मम स्वयम् ।
किंतु पश्चात्पितुर्वाक्याद्धर्मशास्त्रं गृहीतवान् ॥ २९ ॥
अथ भूयः प्रवृत्तोऽहं बहुकालादनन्तरम् ।
वैद्यकाध्ययनं कर्तुमाफ्रिकामण्डले वसन् ॥ ३० ॥
मया प्राण्यङ्गविच्छेदः कर्तव्यः शिक्षणक्रमे ।
इति श्रुतवतोऽनिष्टमन्तरात्मारुजद्भृशम् ॥ ३१ ॥
व्यचिन्तयं कथं नीचप्राणिषु क्रौर्यमाचरेत् ।
जनो यन्न कदाप्येवमाचरेत्स्वयमात्मनि ॥ ३२ ॥
न चिकित्साविधानानि पाश्चात्यान्यखिलान्यपि ।
निराकरोमि यत्तेभ्यो बोद्धव्यं बहु विद्यते ॥ ३३ ॥

यथा प्रसूतिकारक्षा रक्षा बालशिशोरपि ।
शिशवो ह्यत्र जायन्ते माता वेत्ति न रक्षणम् ॥ ३४ ॥
पाश्चात्या जीवनं नृणामायतीकर्तुमिच्छवः ।
रोगिणामुदराण्यान्तं पूरयन्त्यौषधैरहो ॥ ३५ ॥
विरुद्धं प्रतिभातीदृग् वृत्तं युद्धे विमर्दिनाम् ।
अनपेक्ष्य निजप्राणान्नित्यमेव सहस्रशः ॥ ३६ ॥
इच्छामि भवतो ज्ञातुं प्राणोत्सर्जनपाटवम् ।
उदारपक्षमुद्दिश्य स्वार्थलाभमचिन्तयन् ॥ ३७ ॥
पप्रच्छ गन्तुको भूयः सन्ति देशे सहस्रशः ।
तरुणा बुद्धिमन्तश्च निरुद्योगा निवासिनः ॥ ३८ ॥
कुतोऽमी न नियुज्यन्ते ग्रामकार्याय शिक्षिताः ।
श्रेयान्निरन्तरोद्योगस्ततो लाभस्ततः सुखम् ॥ ३९ ॥
प्रत्युवाच महात्मैनं कृतस्तावदुपक्रमः ।
तस्य तु प्रौढनिर्वाहः कञ्चित्कालमपेक्षते ॥ ४० ॥
यतोऽद्यापि न भूयांसो विद्यन्ते व्यवसायिनः ।
कतिचित्प्रौढविद्यास्तु मण्डिता अप्युपाधिभिः ॥ ४१ ॥
ग्रामोद्यमश्रमं वोढुं न क्षमन्ते मनागपि ।
बुद्धिकौशलमप्येषामुपयोज्यं न विद्यते ॥ ४२ ॥
एवं तद्बुद्धिदारिद्र्ये कारणं शिक्षणक्रमः ।
योऽपहृत्य नवोन्मेषं मान्द्यं वितनुते धियः ॥ ४३ ॥

यस्तथा लिपिकाराणां गणं निर्मोति केवलम् ।
तथाप्यस्माभिरारब्धो ग्रामोद्धारक्रमोऽधुना ॥ ४४ ॥
इत्यागन्तुकमाभाष्य पुनस्तं पर्यचाययत् ।
स्वाश्रमस्थायिशार्मण्यमेकं कालंबकाभिधम् ॥ ४५ ॥
एष भद्र सजीवस्ते पुरतो यहुदीजनः ।
मित्रमेष महायुद्धे शार्मण्यानामभूत्पुरा ॥ ४६ ॥
सोपहासमिति प्रोक्तः पान्थोऽपश्यत्सविस्मयः ।
आसीनं भुवि शार्मण्यमाबद्धस्वस्तिकासनम् ॥ ४७ ॥
खादिवासःपरिहितं नग्नं तन्तुक्रियापरम् ।
तं दृष्ट्वा सोऽब्रवीत्सन्ति यहुदीसुहृदो मम ॥ ४८ ॥
इति श्रुत्वा वचस्तस्य गान्धिः पप्रच्छ कौतुकात् ।
कस्मादमी भवद्देशे पीड्यन्ते यहुदीजनाः ॥ ४९ ॥
प्रत्युवाचाथ शार्मण्यः श्रूयतां कथयामि ते ।
अमी पुरा महायुद्धे चक्रुर्देशाय विक्रमम् ॥ ५० ॥
नास्माकं तदुपर्यासीत्प्रतिकूलं वचः क्वचित् ।
देशाभिमानमेतेषां दृष्ट्वान्योन्यं च मित्रताम् ॥ ५१ ॥
किंतु युद्धावसाने तैराक्रान्ता नः समस्तभूः ।
अधिकारादपास्यन्त देश्याः क्रिस्तानुयायिनः ॥ ५२ ॥
प्रसह्य कदनं चक्रुर्हिट्लरेण समुद्धताः ।
अत एव बभूवुस्ते शार्मण्यानामरातयः ॥ ५३ ॥

अतिप्रवृत्तिरस्माभिस्तदुपर्यवलंबिता ।
राज्यक्रान्तेः स्वभावोऽयं द्वेषस्य प्रसरो महान् ॥ ५४ ॥
दृश्यते हि पराकाष्ठा द्वेषस्य स्पेनमण्डले ।
यत्रास्ते घोरसंग्रामः क्रूरोऽन्यो नास्ति तत्समः ॥ ५५ ॥
इत्युक्ते गान्धिरप्राक्षीद्वाच्यः को वात्र कर्मणि ।
भाव्यं दैवनियोगेन सर्वान्तश्चारिणा ध्रुवम् ॥ ५६ ॥
यत्र लोकविनोदाय तादृग् घोरं प्रवर्तते ।
क्रुद्धानां वृषयुग्मानां संघट्टो रोमहर्षणः ॥ ५७ ॥
स देशः स्पेनसंज्ञोऽसौ प्राणिहिंसाफलं ध्रुवम् ।
विपत्सहस्ररूपेण स्वकाले भोक्तुमर्हति ॥ ५८ ॥
संस्कृतेः केन्द्रभूतानां नगराणां विनाशतः ।
दुष्फलं तेन देशेन भुक्तमेव स्वकर्मभिः ॥ ५९ ॥
गेर्निकाख्यप्रदेशे या घोरहत्यापरम्परा ।
सैव कर्मविपाकस्य प्रत्यक्षं हि निदर्शनम् ॥ ६० ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां शार्मण्यालापनो नाम द्वाविंशोऽध्यायः ।

त्रयोविंशोऽध्यायः ।

अथ हिन्दीप्रचाराय स्थापितेऽध्यापनालये ।
माण्डवीनगरे गान्धिश्चकार शुभभाषणम् ॥ १ ॥

अयि भो श्रूयतां किञ्चित् तत्त्वमत्र ब्रवीमि वः ।
साधनानां प्रचारस्य शीलं प्रथमसाधनम् ॥ २ ॥
अतः सुशीलसंपन्नैः सदा भाव्यं प्रचारकैः ।
शिक्षापाटवमप्यत्र साधनं भवति ध्रुवम् ॥ ३ ॥
परंतु शीलहीनश्चेत् कुशलोऽपि निरर्थकः ।
यथा रूपेण युक्तापि वन्ध्या भवति निष्फला ॥ ४ ॥
हिन्दी संस्कृतवाग्जालैः परिपूर्णा विराजते ।
पारसीकपदैरुर्दुर्दृश्यतेऽभ्युदयङ्गता ॥ ५ ॥
गीर्वाणपारसीवाण्योर्विज्ञानं समपेक्ष्यते ।
हिन्द्युर्दुभाषयोर्गाढं सौष्ठवं परिरक्षितुम् ॥ ६ ॥
स्विफ्टचासरकाव्यानां विनैव परिशीलनम् ।
आंग्लवाणीं वशीकर्तुं न कोऽपि क्षमते नरः ॥ ७ ॥
तथा चादिकवेः काव्यं कालिदासकृतीश्च यः ।
न तत्त्वतो विजानाति संस्कृतं तस्य दुर्लभम् ॥ ८ ॥
न्ययोजि राष्ट्रसंघेन भारतप्रान्तसप्तके ।

मद्रमोहमयीकालीघट्टमध्यमभूमिषु ॥ ९ ॥
तथा वायव्यसंयुक्तप्रान्तयोरुत्कलेषु च ।
मन्त्रिणामप्यमात्यानां मण्डलं हि पृथक् पृथक् ॥ १० ॥
विद्याधिकरणाध्यक्षा देशारोग्याभिरक्षकाः ।
धर्माधिकरणाध्यक्षा राष्ट्रकोशाधिकारिणः ॥ ११ ॥

अन्ये च कर्मसचिवाः प्रतिभागमवस्थिताः ।
विदधू राज्यनिर्वाहं सार्धसंवत्सरद्वयम् ॥ १२ ॥
मन्त्रिमण्डलमुद्दिश्य पत्रे हरिजनाभिधे ।
प्राकाश्यमानयद्गान्धिर्लेखनं बोधनात्मकम् ॥ १३ ॥
भारते राज्यमन्त्राय या कृता शासनावलिः ।
नालं स्वातन्त्र्यलाभायेत्यखिलैरवगम्यते ॥ १४ ॥
तद्धर्मशासनं नाम नापरं खड्गशासनात् ।
यद्बहूनां मतं भङ्क्तुं राजप्रतिनिधिः प्रभुः ॥ १५ ॥
अथ कोटित्रयस्यापि प्रजानां वरणेन किम् ।
न विघ्नो वञ्चनामेतामिति ध्यायन्ति शासकाः ॥ १६ ॥
वञ्चनोद्देशमीदृक्षं मोघीकर्तुं तु शक्यते ।
यदि प्रतिनिधीभूताः स्वात्मविश्वासधीजुषा ॥ १७ ॥
काले चेदुपयुञ्जीरन् स्वाधिकारं विवेकतः ।
निर्भयं विफलीकर्तुं शासकानां मनोरथम् ॥ १८ ॥
एतस्य सिद्धये कुर्युः कचिन्न्याय्यमतर्कितम् ।
विरमेयुः क्वचिन्न्याय्याच्छासकैः पूर्वचिन्तितात् ॥ १९ ॥
अमात्येन निषेद्धव्यः सद्यो मद्यस्य विक्रयः ।
शिक्षणीयोऽर्जनोपायो न तु मद्यावलंबनम् ॥ २० ॥
कार्या कारालया येऽद्य दण्ड्यबालाश्रमगृहाः ।
दीनानाथनिवासा वा देशकार्यालया अपि ॥ २१ ॥

शिक्षणायोपयुञ्जन्तामर्थतः स्वावलंबनाः ।
मा भवन्तु पुनः संस्था वृथा दण्डव्ययार्थकाः ॥ २२ ॥
लवणस्य करोऽद्यापि कृते सन्धावपि स्थितः ।
लवणं करवर्जं हि ग्राह्यं दीनस्य सर्वदा ॥ २३ ॥
राष्ट्रसंघाधिपत्ये तु निःशुल्कं तत्परिग्रहः ।
सुकरः शक्यते कर्तुं सुखायाखिलजीविनाम् ॥ २४ ॥
खद्दराम्बरमात्रस्य विपण्यां क्रयविक्रयौ ।
प्रवर्तेते यथा कुर्युः स्वप्रान्ते मन्त्रिणस्तथा ॥ २५ ॥
नगरापेक्षया ग्रामान् प्रति स्युरधिकारिणः ।
सावधानतराः शिक्षारोग्यशिक्षोद्यमादिषु ॥ २६ ॥
अनुशिष्टं मया सर्वमेतद्धर्म्यं हि वर्तते ।
तथापि तदनुष्ठाने यत्नः केनापि नास्थितः ॥ २७ ॥
मन्त्रिणां कीदृगाचारः स्वाधिकारप्रवर्तने ।
इति प्रश्नस्य दास्यामि श्रूयतां सरलोत्तरम् ॥ २८ ॥
संघस्याधिपतिर्मान्यः प्रयाणं कुरुते मुदा ।
धूमयानान्तरासीनो हीनवर्गे तृतीयके ॥ २९ ॥
धारयत्युत्तरासंगं रूक्षखद्दरनिर्मितम् ।
परिधत्तेऽन्तरीयं च ततो रूक्षतरं पुनः ॥ ३० ॥
सत्येवं प्रथमश्रेण्यां किं यियासन्ति मन्त्रिणः ।
आंग्लाननुचिकीर्षन्तो वेषे भूरिधनव्यये ॥ ३१ ॥

अभ्यस्तं हि सभासद्भिः कृच्छ्रं सरलजीवनम् ।
चिरादष्टादशाब्दानि सर्वक्लेशान् तितिक्षुभिः ॥ ३२ ॥
स्वस्वराज्यविभागेषु सारल्यं सर्वकर्मसु ।
प्रवर्तयितुमर्हन्ति मन्त्रिणो देशसेवकाः ॥ ३३ ॥
अदम्भसरला वृत्तिरीदृशी न त्रपाकरी ।
तथा राष्ट्राभिमानो हि ध्रुवं वृद्धिमुपेष्यति ॥ ३४ ॥
अयं दीनतमो देशो वर्ततेऽखिलभूतले ।
यत्र क्षुधार्तलोकानां जीवन्ति बहुकोटयः ॥ ३५ ॥
अतः स्वेषां वरीतृभ्यो भिन्नरीत्या न वर्तितुम् ।
युक्तं प्रतिनिधीभूतैर्मन्त्रिभिर्नित्यजीवने ॥ ३६ ॥
भारतं प्रविशन्नांग्ला जिगीषाध्मातमानसाः ।
वेषाहारविहारेषु चक्रुर्नः सुमहार्घताम् ॥ ३७ ॥
स्वप्रतिष्ठातिदर्पेण समपेक्ष्यार्थिकीं स्थितिम् ।
वशीकृतप्रजानामप्यर्धभुक्तार्धनग्नताम् ॥ ३८ ॥
मन्त्रिणो नानुकुर्वन्ति राज्ञः प्रतिनिधीन् यदि ।
तदा ततोऽपि वैशिष्ट्यं सर्वार्थेषु भजन्त्यमी ॥ ३९ ॥
न च संभाव्यतेऽस्माकं शासकैः सह संगतिः ।
न वामनबृहत्कायौ सहयोगं समर्हतः ॥ ४० ॥
परवेषपरित्यागात्पुरा सप्तदशाब्दतः ।
अयुक्तकारिणंमन्याः सन्ति सामाजिका यदि ॥ ४१ ॥

विमृशन्तु स्वयं तेऽमी उमराबूबुकारयोः ।
दृष्टान्तं सरलोदारचेतसोः सुप्रतीतयोः ॥ ४२ ॥
पुराणपुरुषावेतौ रामकृष्णाविवासताम् ।
नामनी कीर्तनीये स्तः प्रतापशिवयोस्तयोः ॥ ४३ ॥
इमौ लोकप्रियौ वीरौ परमोदारचेतसौ ।
जीवनं लोकसामान्यं चक्रतुः शुभ्रवाससौ ॥ ४४ ॥
उमराबूकरौ नित्यमधत्तां रूक्षमम्बरम् ।
पादमूलस्थितेऽप्येतन्निःशेषजगतीधने ॥ ४५ ॥
न चैतौ विषहेते स्म धारणं सूक्ष्मवाससः ।
मिष्टान्नप्राशनं चापि स्वनियुक्ताधिकारिभिः ॥ ४६ ॥
मितव्ययेन सारल्यजीवनेन च मन्त्रिणः ।
रक्षेयू रूप्यकान् दीनलोकार्थाय सहस्रशः ॥ ४७ ॥
न मलीमसपर्यायः प्रागुक्तं सरलं पदम् ।
कालचारुत्वयोर्बीजं सारल्ये परिनिष्ठितम् ॥ ४८ ॥
शौचसौभाग्यसम्मानरक्षा नार्थमपेक्षते ।
ग्राम्यत्वसमतां याति विभवाडम्बरः पुनः ॥ ४९ ॥
आशासे स्वविभागेषु दर्शयिष्यन्ति मन्त्रिणः ।
अभेदं पारसीक्रैस्तमुसुल्मीन्सीक्कहिन्दुषु ॥ ५० ॥
तथा च समतामुच्चनीचजातिषु नित्यशः ।
एकमातुरपत्यानि जन्मभूमेरमी किल ॥ ५१ ॥

वस्तुतो नास्ति तन्मध्ये कापि नीचोच्चताभिदा ।
समानमस्ति दारिद्र्यं सर्वेषां निर्विशेषतः ॥ ५२ ॥
आंग्लाश्चांग्लायमानाश्च देशजा भावयन्ति चेत् ।
राष्ट्रसंघमताभिन्नं तदा स्याद्विजयो ध्रुवः ॥ ५३ ॥
पूर्णस्वराज्यलाभश्च रक्तपातं विना भवेत् ।
अहिंसया जयो नाम सोऽयमेव मया मतः ॥ ५४ ॥
मदीयां तावदाशंसां मन्येत स्वाप्निकभ्रमम् ।
मूर्खताया विपाकं वा दुःशकं वाखिलो जनः ॥ ५५ ॥
तथापि भारतीयाश्च वैदेशिकजना अपि ।
विदाङ्कुर्वन्त्विति स्वैरं प्रकाश्योऽर्थः प्रकाशितः ॥ ५६ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां मन्त्रिमण्डलानुशासनो नाम त्रयोविंशोऽध्यायः ।

चतुर्विंशोऽध्यायः ।

अमात्यपदमातिष्ठन्मोहमय्यां महायशाः ।
बालगंगाधरः श्रीमान् खेरवंशसमुद्भवः ॥ १ ॥
निषिद्धौ प्रथमं तेन मद्यस्य क्रयविक्रयौ ।
हिन्दी निरूढिमानीता प्रतिशालं प्रसारणात् ॥ २
राष्ट्रसंघोपजीव्येषु प्रान्तेष्वपि च मन्त्रिभिः ।
प्रजाहितानि कार्याणि सुबहूनि प्रचक्रिरे ॥ ३ ॥

विद्याभ्यासपुरोवृद्ध्यै नियमा बहवः कृताः ।
अभिनन्द्यमिदं सर्वं शोच्यमेकं तु वर्तते ॥ ४ ॥
स्वयं सर्वस्वतन्त्रोऽपि देववाणीप्रियोऽपि सन् ।
पुनरुज्जीवनायास्या न यत्नमकरोदसौ ॥ ५ ॥

अथानेकानि पत्राणि लभते स्म पदे पदे ।
प्राणिनामनुकम्पिभ्योऽमेरिकादेशतो मुनिः ॥ ६ ॥
अमी विज्ञापयामासुर्महात्मानं सविस्तरम् ।
कपीनामङ्गविच्छेदवृत्तान्तान् मर्मभेदिनः ॥ ७ ॥
तथा च प्रेषयामासुः प्रसिद्धभिषजां मतम् ।
क्रौर्यं विगर्हमाणानामिदं निर्दोषजन्तुषु ॥ ८ ॥
कश्चित्फ्रान्सिस् महासाधोः प्रहिणोत्प्रतिरूपकम् ।
स साधुः सोदरान्मेने सदा हि मृगपक्षिणः ॥ ९ ॥
पत्रद्वाराथ सर्वेभ्यः प्रददौ गान्धिरुत्तरम् ।
अभिनन्दामि वः सर्वं करुणामयवाङ्मयम् ॥ १० ॥
स्वतन्त्रश्चेदहं देशात्प्रेषयेय न मर्कटम् ।
अङ्गच्छेदाय हन्तास्मिन्नधिकारस्तु नास्ति मे ॥ ११ ॥
राजप्रतिनिधेः पार्श्वे विज्ञप्तिः प्रेष्यतामतः ।
श्रोष्यत्यसौ न संदेहः प्रार्थनामखिलैः कृताम् ॥ १२ ॥
बलवत्प्रतिषेधो वा कर्तव्यो भारते जनैः ।
विक्रयस्य स्वदेशीयैर्हिंसकैर्धनलोलुपैः ॥ १३ ॥

प्रचलत्कपिवाणिज्यं न वेत्ति प्रायशो जनः ।
अर्थलाभकरीं वृत्तिं वारयेयमहं कथम् ॥ १४ ॥
आशासे क्रूरकर्माणो मा भूवन्मम देशजाः ।
न कुर्युर्वार्थलाभेऽपि विनिन्द्यमसुपीडनम् ॥ १५ ॥
अवरप्राणिलोकानां जीवन्मरणसंनिभम् ।
मानुषक्लेशनाशाय नैव कुर्वीत हिंसनम् ॥ १६ ॥
दुःखितेष्वनुकम्पापि लघूकृत्य क्षणाद् व्यथाम् ।
करिष्यति शनैः सह्यां रक्षणे तु कियत्सुखम् ॥ १७ ॥

जलविप्लवदुर्भिक्षमारिकाव्याधिसञ्चयः ।
मन्येऽस्मदीयखण्डस्य भारतस्य स्वभावतः ॥ १८ ॥
जायन्ते सर्वदेशेषु क्षामडामरविप्लवाः ।
भूरिसम्पन्नराष्ट्रेषु शक्यते तानपोहितुम् ॥ १९ ॥
जलविप्लवदुर्भिक्षपीडनं द्विगुणायते ।
यदा निराशनावस्थां स्पृशेद्देशदरिद्रता ॥ २० ॥
शोचनीयदशामेतां निशम्योत्कलमण्डले ।
महात्माऽन्वशिषद्भूयः कर्तव्यं राष्ट्रमन्त्रिणः ॥ २१ ॥
उत्कलास्तन्तुचक्रस्य वोढुकामाः श्रमं न चेत् ।
कार्यमन्यत्प्रकुर्वाणाः शिक्ष्यन्तां कर्मगौरवम् ॥ २२ ॥
अपनीयोत्तरासंगं श्रमं कुर्वन्तु मन्त्रिणः ।
स्वयं कर्मकरा भूत्वा सहान्यैरविशेषतः ॥ २३ ॥

जनयन्तु समुत्साहं कर्मशून्यजनेषु च ।
स्वयमेतैः प्रयस्यन्तस्तद्विधेयेषु कर्मसु ॥ २४ ॥

अन्जवानचरीस्वामी केरलेष्वभिपूजितः ।
विप्राग्रणीरिति ख्यातोऽलिखत्पत्रं महात्मने ॥ २५ ॥
यानंतशयनाधीशनिर्देशेन प्रवर्तिता ।
अस्पृश्यैर्देवतागारप्रवेशाय प्रघोषणा ॥ २६ ॥
सानतिक्रम्य शास्त्राणि सद्धर्ममुदजीवयत् ।
आचन्द्रार्कमियं वर्णोत्कर्षदा जयतूज्वला ॥ २७ ॥
वर्णाश्रमविचारेषु स्वामी केरलमण्डले ।
प्रमाणपदमाधत्ते नम्बुद्रीविप्रनायकः ॥ २८ ॥
उच्चैर्भजति सम्मानं केरलीयनृपेष्वसौ ।
यदेते निपतन्त्यस्य दण्डवत्पादपद्मयोः ॥ २९ ॥
प्राचीनवंशचरितादस्य विज्ञायते किल ।
पुरा परशुरामोऽत्रानिन्ये नम्बुद्रिभूसुरान् ॥ ३० ॥
इति विज्ञापकं पत्रं विदुषामग्रगामिनः ।
पठित्वा मुमुदे श्रीमान् गान्धिर्हरिजनप्रियः ॥ ३१ ॥

अस्वस्थोऽपि च कल्कत्तां ज्येष्ठमासे ययौ मुनिः ।
अशनत्यागिनो द्रष्टुं कारालयनिवासिनः ॥ ३२ ॥

सप्ताहमत्र सोऽनैषीदनादृत्य निजं सुखम् ।
कथालापं वितन्वानो बन्दीकाराधिकारिभिः ॥ ३३ ॥
परिणामः शुभोऽस्यासीद्बन्दीनां बन्धमोचनः ।
यतः सर्वविनिर्मोकमादिशन्मन्त्रिघोषणा ॥ ३४ ॥
प्रतिज्ञामकरोद्गान्धिरहिंसायोगशिक्षणात् ।
शमयिष्ये जनक्षोभं तत्त्वमस्याः प्रसारयन् ॥ ३५ ॥
त्रासकानुपसर्पामि वक्ष्ये सानुनयं वचः ।
तानहं वारयिष्यामि लोकसंत्रासनोद्यमात् ॥ ३६ ॥
अहिंसाधर्मदीपेन त्रासकान् विषमात्पथः ।
व्यपनीय करिष्यामि सन्मार्गपरिनिष्ठितान् ॥ ३७ ॥
प्रतिज्ञां मानयित्वैतां समाश्वस्ताः प्रशासकाः ।
सहस्राधिकबन्दीनां विमोचनमघोषयन् ॥ ३८ ॥

नवभारतसंज्ञाभृद्विद्यालयमहोत्सवे ।
आमन्त्रितो महात्मासौ जगाम वरदापुरम् ॥ ३९ ॥
आहूयन्त सदस्यस्मिन्नल्पे राष्ट्राभिमानिनः ।
सभाध्यक्षपदं गान्धिरङ्गीकृत्याब्रवीद्यथा ॥ ४० ॥
अयि प्राज्ञवराः शिक्षासरणिर्याधुनातनी ।
देशापेक्षितसेवार्थं न साधयति सर्वथा ॥ ४१ ॥
शिक्षणे प्रौढविद्यानां द्वारमांग्लवचः कृतम् ।
शिक्षिताशिक्षितानां तत्प्रतिबन्धः स्थिरोऽजनि ॥ ४२ ॥

आंग्लवाण्याः प्रदिष्टं यत्प्राधान्यं तेन शिक्षिताः ।
वृथा भारहरा भूत्वा बुद्धिवैकल्यमागताः ॥ ४३ ॥
तद्भाषया विकृष्टास्ते स्वजनानपि दूरतः ।
विहाय परिवल्गन्ते स्वयमागन्तुका इव ॥ ४४ ॥
उद्योगशिक्षणाभावादक्षमा फलदायिषु ।
व्यवसायेषु संजाताः शरीरेष्वपि निर्बलाः ॥ ४५ ॥
शिक्षा प्राथमिकी देया नियमेनाब्दसप्तकम् ।
सार्वलौकिकविज्ञानप्रतिपादनपूर्वकम् ॥ ४६ ॥
शिक्ष्या लाभकरोद्योगाः क्लृप्तकालानुसारतः ।
ऊर्णकार्पासकौशेयमयवस्तुविनिर्मितिः ॥ ४७ ॥
संग्रहः शोधनं बीजनिर्हृतिर्विशदीकृतिः ।
ग्रन्थनं कर्तनं वर्णैरञ्जनं परिमापनम् ॥ ४८ ॥
वयनं वेष्टनं वक्रीकरणं परिचित्रणम् ।
एतदादीनि कर्माणि साङ्गोपाङ्गानि शिक्षयेत् ॥ ४९ ॥
सूचिशिल्पं चित्रगुम्फश्छेदनं च प्रमाणतः ।
पत्रनिष्पादनं दारुतक्षणं ग्रन्थबन्धनम् ॥ ५० ॥
क्रीड़नीयकनिर्माणं गुडपाकादिनिर्मितिः ।
एते भवन्ति सूद्योगाः सुगमाश्च मितव्ययाः ॥ ५१ ॥
इयं प्राथमिकी शिक्षा तथा भवितुमर्हति ।
यथा बालाः समर्थाः स्युः स्ववृत्तिं समुपार्जितुम् ॥ ५२ ॥

स्वस्वशिक्षितविद्यानामनुरूपेषु कर्मसु ।
शिल्पिनस्तान् नियुञ्जीरन् यथार्हं राज्यवाहकाः ॥ ५३ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां मन्त्रिबोधनो
नाम चतुर्विंशोऽध्यायः ।

पञ्चविंशोऽध्यायः ।

वसुवह्निग्रहेन्द्वङ्कमितवत्सरसंभवान् ।
अनेकार्थकथालापान् वर्णयामि महात्मनः ॥ १ ॥
व्यतीतेष्वथ मासेषु वरदापुरमाययौ ।
दिदृक्षुर्लोदियन्नामा गान्धिमांग्लो महाजनः ॥ २ ॥
निवासाहारयोरर्थे मत्कृते मास्तु संभ्रमः ।
दुग्धापूपैरलं नाहं धूमपो न च मद्यपः ॥ ३ ॥
ग्रामवासप्रियोऽस्मीति कृतविज्ञापनः पुरः ।
आंग्लोऽयमनयद्ग्रामे सुखेन दिवसत्रयम् ॥ ४ ॥
सोऽयं हरिजनावासं लक्ष्मीनारायणालयम् ।
हिन्दीप्रचारशालां च गत्वा सर्वमलोकयत् ॥ ५ ॥
ततोऽसौ कौतुकाविष्टः समेत्य महिलाश्रमम् ।
बभाषे वनितास्तत्र भूरिप्रोत्साहनं वचः ॥ ६ ॥
भवत्यो निजदेशस्य सम्पदभ्युदयागमे ।
भवेयुः समभागिन्यो मद्देशीयाङ्गना यथा ॥ ७ ॥

विंशत्यब्दान्तरे प्राप्ताः श्रियोऽपूर्वां समुन्नतिम् ।
पाश्चात्या भारतीयाश्च दृश्यन्ते ह्यवितर्किताम् ॥ ८ ॥
ग्रामोद्योगकलापेन परं विस्मयमागतः ।
सार्धैकशतसौवर्णमुद्राश्च व्यतरन्मुदा ॥ ९ ॥

अथ माघेऽभवन्मासि राष्ट्रसंघाधिवेशनम् ।
ग्रामे हरिपुराभिख्ये गुर्जरावनिमण्डले ॥ १० ॥
पूर्वमेव महात्मात्र वल्लभार्यैरनीयत ।
देवनामप्रतीकेन ग्रामेण मुमुदेतराम् ॥ ११ ॥
विभावयन् शुभं नाम प्रोवाच सहकारिणः ।
इयं दिव्या पुरी नूनं वर्तते सिद्धिशंसिनी ॥ १२ ॥
तालपर्णपरिच्छन्नं खाद्यंबरवितानकम् ।
कुटीरं निर्मितं तस्य प्रीतयेऽभूद्विशेषतः ॥ १३ ॥
चक्षुषादाय चारुत्वं श्येनदृष्टिपटीयसा ।
अब्रवीत्किमहो सर्वा मदर्थेऽद्भुतकल्पना ॥ १४ ॥
सहसा नगरी रम्या बभूव विभवान्विता ।
नवकल्पितरथ्याभिः क्रोशद्वितयमागता ॥ १५ ॥
शोभमानाभितो मार्गे रोपितद्रुमपङ्क्तिभिः ।
उपेता पुष्पवाटीभिर्दीपजालैः समुज्ज्वला ॥ १६ ॥
रूपान्तरमिव प्राप्ता बभौ ग्रामटिका क्षणात् ।
सैव पश्चात्प्रसिद्धाभूदिन्द्रप्रस्थः पुरा यथा ॥ १७ ॥

श्रीमत्सुभाषचन्द्रोऽथ सभाधिष्ठातरि स्थिते ।
राष्ट्रसंघसभाकार्यं समारेभे यथाविधि ॥ १८ ॥
राष्ट्रसोदर्यकूटस्य स्वराज्यप्रतिकूलताम् ।
दर्शयन्निर्णयांश्चक्रे समकण्ठं सभाजनः ॥१९ ॥
द्वितीयो निर्णयश्चासीत्स्वीकार्यं मन्त्रिणः पदम् ।
दद्यादबाधकत्वस्य प्रतिज्ञां चेत्प्रशासकः ॥ २० ॥
निर्णयद्वितयेनैवं समाप्तिमगमत्सभा ।
इतरे विषयाः सर्वे निर्विवादमुरीकृताः ॥ २१ ॥

अथ फाल्गुनमासेऽभूत्प्रयागेऽतिभयङ्करः ।
हिन्दूमहम्मदीयानां विमर्दो दुर्निरोधनः ॥ २२ ॥
हस्ताहस्ति शिलाघातैस्तुमुलश्चातिदारुणः ।
क्षतानामर्धजीवानां शतैः कीर्णाभवद्धरा ॥ २३ ॥
क्षोभं सत्याग्रहोपायैः शमं नेतुं प्रयेतिरे ।
मन्त्रिणः किन्तु नो शेकुः संक्षोभस्य निवारणे ॥ २४ ॥
इतिकर्तव्यतामूढाः पर्यन्ते पुररक्षिणः ।
सैनिकांश्च समाहूय कदनं शान्तिमानयन् ॥ २५ ॥
वृत्तान्तमेतमाकर्ण्य महात्मा दुःखितोऽभवत् ।
अलिखद्वृत्तपत्रे च यदासीत्स्वमनोगतम् ॥ २६ ॥
साहाय्यकार्थमाह्वानान्मन्त्रिभिः पुररक्षिणाम् ।
व्यक्तीकृतं स्वदौर्बल्यं स्वाधिकारप्रवर्तने ॥ २७ ॥

आशासे बलवत्पूर्वं लेखस्यास्य प्रकाशनात् ।
संक्षोभः शमितो भूयात्प्रशान्तिश्च प्रतिष्ठिता ॥ २८ ॥
अवश्यमभ्युपेतव्यं राष्ट्रसंघो न हि क्षमः ।
आंग्लप्रभुत्वमादातुमिति स्पष्टं स्वकर्मणा ॥ २९ ॥
भारतस्याखिलस्यापि प्रातिनिध्यं वहत्यसौ ।
इति स्यात्कस्य विश्वासः पश्यतस्तस्य चेष्टितम् ॥ ३० ॥
न परं संघसभ्यानामपि तस्य विरोधिनाम् ।
तन्मर्दनक्षमानां च यावत्प्रतिनिधिर्भवेत् ॥ ३१ ॥
आंग्लप्राभवमाक्रष्टुं दक्षता वर्तते न वा ।
संघस्येति विचारोऽयमिदानीं कर्तुमिष्यते ॥ ३२ ॥
न कोऽपि सांघिकः कुर्याल्लेखतोऽप्यत्र संशयम् ।
चिरयेन्न स्वयं दक्षः पदमाक्रमितुं निजम् ॥ ३३ ॥
अस्य वार्षिकमेलस्य निर्विघ्नविजयं जनः ।
प्रमाणमात्मयोग्यत्वे न हि मन्येत सांघिकः ॥ ३४ ॥
कथं स्यादत्र विश्वासः पश्यतः क्षोभमीदृशम् ।
एवं परीक्षणीयं च राष्ट्रसंघबलाबलम् ॥ ३५ ॥
अहिंसायाः स्वरूपं च चिन्तनीयमिदं पुरः ।
अबलानाथलोकानां सबलोर्जस्विनामुत ॥ ३६ ॥
प्रथमं चेद्भवेदेतन्न सिद्धिं प्रापयिष्यति ।
अनर्हाश्च तदभ्यासः स्वराज्यस्य करोति नः ॥ ३७ ॥
सबलानामहिंसा तु हिंसैव हृदि गोपिताम् ।
आत्मनो व्यक्तये कालमनुकूलं प्रतीक्षते ॥ ३८ ॥

अहिंसामात्मनस्तस्मात्सूक्ष्मदृष्ट्या परामृशेत् ।
न चेत्सत्यबलाज्जाता तदा तां परिशोधयेत् ॥ ३९ ॥
अहिंसा षोडशाब्देभ्यः समभ्यस्ता सभाजनैः ।
तस्मादनेन कालेन सैन्यं भवितुमर्हति ॥ ४० ॥
अहिंसावीरयोधानां शतशश्च सहस्रशः ।
यत्स्यात्समानसामर्थ्यं पुररक्षैश्च सैनिकैः ॥ ४१ ॥
अहिंसाभटसेनेयं समं व्यवहरेत्सदा ।
संक्षोभावसरे वापि प्रशान्तसमयेऽपि वा ॥ ४२ ॥
ध्रुवमेतादृशं सैन्यं सङ्कटे प्रभवत्यलम् ।
सुग्रीवकपिसेनेव राक्षसानां बलीयसाम् ॥ ४३ ॥
शतानि वा सहस्राणि मरणानि शरीरिणाम् ।
निष्कलङ्कानि विक्षोभं शमयिष्यन्ति सत्वरम् ॥ ४४ ॥
वरं प्राणपरित्यागः सत्याग्रहिशतैरपि ।
अल्पानर्थकरत्वेन क्षुब्धोन्मादनिवारणे ॥ ४५ ॥
न पुनः शमनं शस्त्रैर्योधानां पुररक्षिणाम् ।
अस्त्रैर्मानसतत्त्वज्ञो ह्युन्मत्तान्न चिकित्सते ॥ ४६ ॥
केचिदाहुर्जनक्षोभः स्वातन्त्र्येण निवर्तते ।
इयमाशा हि निःसारा न कदाचित्फलिष्यति ॥ ४७ ॥
क्षोभस्य दमने राष्ट्रमन्त्रिणः पुररक्षिणाम् ।
साहाय्यं यद्यपेक्षन्ते तद्धि तेषां पराजयः ॥ ४८ ॥

तत्र गत्यन्तराभावो हेतुस्तेषामिति स्फुटम् ।
करस्थ वलयं द्रष्टुं दर्पणो न ह्यपेक्षते ॥ ४९ ॥
जगन्नाथपुरीमुख्यो महान्तोपाधिमण्डितः ।
गत्वा महात्मनः पार्श्वमब्रवीदात्मनिश्चितम् ॥ ५० ॥
महात्मन् वैष्णवानां त्वं वर्तसे परमोत्तमः ।
तथापि देवगेहेषु चण्डालान्न प्रवेशये ॥ ५१ ॥
इति श्रुत्वा महान्ताख्यं महात्मा प्रत्यभाषत ।
तुलामारोपिताः सर्वे धर्मा जगति विश्रुताः ॥ ५२ ॥
तत्र हिन्दुमतं हीनं परीक्षायां भवेद्यदि ।
ध्वंसतेऽसौ यथागारं मूलस्तम्भविवर्जितम् ॥ ५३ ॥
अनन्तशयने राजादेशादुद्घाटितेष्वपि ।
देवालयेषु देवानां प्रकोपो न समुत्थितः ॥ ५४ ॥
कश्चित्पुण्यपुरे विद्वान् मामुपेत्याब्रवीत्पुरा ।
हिन्दुभिः सञ्चितः पापराशिर्हरिजनात्ययात् ॥ ५५ ॥
अपमार्ष्टुं भवेच्छक्यः प्रत्येको यदि हिन्दुषु ।
चरेद्वर्षशतं तीव्रं तपः प्रयतचेतसा ॥ ५६ ॥
इत्युक्तो वैष्णवोऽवादीत्किमीदृक् तपसा भवेत् ।
भगवत्कृपया भुङ्क्ते सुखं हरिजनः सदा ॥ ५७ ॥
केचिद्धरिजनाः पूर्वमाययुर्देवमन्दिरम् ।
सत्कृतास्ते मया सर्वे मान्या अतिथयो यथा ॥ ५८ ॥

---

८ सत्या०

गान्धिरुवाच

मान्यश्चेदतिथिः सोऽयं मन्दिरान्तः प्रवेश्यते ।
तथोपवेश्यते प्रीत्या सत्कृत्य वरविष्टरे ॥ ५९ ॥
एते हरिजनास्तावन्निवेश्यन्ते गृहाद्बहिः ।
स्थातव्यं बत तैस्तत्र दीनैर्वर्षातपेष्वपि ॥ ६० ॥
हसन्नागन्तुकः प्राह मैवं देवेच्छया हि ते ।
चारुमारुतसेवार्थं स्थापिता मन्दिराद्बहिः ॥ ६१ ॥
न सुखं देवतागारमन्तःसंदूषितानिलम् ।
मा भूवन्नामयक्लिष्टा दीना हरिजना इति ॥ ६२ ॥
शनैः पन्थाः शनैः कन्था शनैः पर्वतलङ्घनम् ।
इत्यसौ शुष्कलोकोक्तिं सोपहासमुदाहरत् ॥ ६३ ॥

इति श्री॰ क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां हरिपुरीयसंमेलनो नाम पञ्चविंशोऽध्यायः ।

षड्विंशोऽध्यायः ।

अथ वैशाखमासेऽयं नितरां खिन्नमानसः ।
शश्वदात्मानुसंधानपरोऽभूद्दुःखशान्तये ॥ १ ॥
आगादत्रान्तरे कश्चिद्विस्लांविद्यालयाश्रितः ।
अध्यापको मुनिं द्रष्टुमपृच्छत्तं च सादरम् ॥ २ ॥
किं मां भगवदस्तित्वं प्रत्याययितुमीशिषे ।
नेति गान्धिरुवाचैनं स हि वाचामगोचरः ॥ ३ ॥

किं तर्हि मूढविश्वासाद्भगवानधिगम्यते ।
प्राह गान्धिर्मम स्थेम्ने सोऽयमावश्यकोऽभवत् ॥ ४ ॥
अप्यस्ति दिव्यदृष्टिस्ते महात्मन् भव्यशंसिनी ।
इत्येवमनुयुञ्जानं प्रत्युवाच मुनिस्तदा ॥ ५ ॥
न जाने मन्यते किं वा दिव्यदृष्टिपदाद्भवान् ।
शृणु स्वानुभवं वक्ष्ये तव प्रत्ययकारणम् ॥ ६ ॥
उपवासव्रतारंभे चिरयन्तं पुरैकदा ।
प्रबोध्य सुप्तमन्तर्वाक् प्राह मां कुरु लङ्घनम् ॥ ७ ॥
जिज्ञासुमवधिं भूयः सप्ताहत्रयमादिशत् ।
तत्प्रत्ययादुपोष्याहं व्रतात्काले विनिर्गतः ॥ ८ ॥
मम जीवितकालान्तर्यद्यदाचरितं मया ।
स्वधियाऽऽकलितं नैतत्परं दिव्याज्ञया सदा ॥ ९ ॥

अथोष्मसमये सेवाग्रामतो निर्ययौ मुनिः ।
जुहूग्रामं समुद्रस्य शीतमन्दानिलोत्सुकः ॥ १० ॥
स च मोहपुरीप्रान्ते सन्निविष्टोऽम्बुधेस्तटे ।
प्रयातॄणां सुखावासश्चकारापगतश्रमम् ॥ ११ ॥
तापेन क्लिश्यमानेषु सेवाग्रामनिवासिषु ।
एकाकिनो न मे युक्तं चिराय सुखमासितुम् ॥ १२ ॥
शीघ्रमेव निवर्त्स्यामि सहक्लेशोपभुक्तये ।
इति निश्चित्य भूयोऽपि स्वग्राममगमन्मुनिः ॥ १३ ॥

तत्रात्महृदयाकाशात् खेदनीलाम्बुदच्छविः ।
सहसास्तमगाद्भूयः सुखज्योतिरुदज्वलत् ॥ १४ ॥
शान्तिरन्विष्यते कैस्तैर्नित्यं भक्तिपरायणैः ।
शाश्वतस्य समुद्धारो येसुक्रिस्तस्य सेवनात् ॥ १५ ॥
न ते जानन्ति यद्गान्धिर्मनसः शान्तिमीप्सति ।
हिंसयन्नन्तरे लीनां रागद्वेषादिसंहतिम् ॥ १६ ॥
जिघ्रन् हिंसात्मतागन्धं स्ववातावरणेऽभितः ।
साक्षात्करोति तां हिंसां राष्ट्रसंघसभासदाम् ॥ १७ ॥
लेखने भाषणे चार्थदूषणे स्वार्थसाधने ।
चेतोवसादमाधत्ते सर्वमेतन्महात्मनः ॥ १८ ॥

अथ भाद्रपदे राष्ट्रसभासमितिकल्पने ।
सदस्यवरणे प्राप्ते संक्षोभः समजायत ॥ १९ ॥
निशम्यातिप्रवृत्तिं तां विषण्णो वृत्तपत्रके ।
महात्मा व्यलिखत्स्पष्टमनुशासनिकं वचः ॥ २० ॥
राष्ट्रमन्त्रिपदप्राप्त्या संघोऽपि बलवानभूत् ।
तथापि सांघिकैः शक्तिर्यथावन्नोपयुज्यते ॥ २१ ॥
राजकीयपदायादौ सर्वः स्पृहयते जनः ।
दृश्यते महती स्पर्धा प्रवेष्टुं समितिं बत ॥ २२ ॥
स्वराज्याधिगमायासौ न मार्गः खलु वर्तते ।
न च संघोद्यमानां वा साधने रीतिरुत्तमा ॥ २३ ॥

राजभारस्य निर्वाहे यो भागं वोढुमिच्छति ।
स भवेद्वर्जितस्वार्थः केवलं देशसेवकः ॥ २४ ॥
रूप्याणां पञ्चविंशत्या संतुष्टो यः पुराभवत् ।
स मन्त्रिपदमास्थाय नेच्छेत्सार्धशतद्वयम् ॥ २५ ॥
वङ्गेषु च महाराष्ट्रे सन्ति दक्षाः सहस्रशः ।
अल्पवेतनसन्तुष्टा देशायार्पितजीविताः ॥ २६ ॥
स्वक्षेत्रमपहातुं ते नेच्छन्ति पदलोभतः ।
स्वयंवृतादपाकष्टुमुद्यमात्ताश्च युज्यते ॥ २७ ॥
मन्त्रिणो न भवेयुश्चेत्कुशलाः स्वार्थवार्जिताः ।
अनुत्कोचहराश्चापि स्वराज्यं स्वाप्निकं धनम् ॥ २८ ॥
समिती राष्ट्रसंघस्य जीवनान्वेषणाङ्गणम् ।
कल्प्यते यदि नेदृक्षानिच्छामः संघदूषकान् ॥ २९ ॥
अबुद्धिपूर्वकं संघनियमान् बहवो जनाः ।
स्वीकुर्वन्ति विना श्रद्धामहिंसासत्ययोर्बले ॥ ३० ॥
किमसत्यपरो धर्ममनुष्ठातुमलं भवेत् ।
किं वा हिंसात्मकः शान्तिं प्रभवेल्लब्धुमात्मनः ॥ ३१ ॥
तथा च खादिवसनं न धत्ते नित्यमेव यः ।
स संघसमितौ स्थानं न सभ्यः प्राप्तुमर्हति ॥ ३२ ॥
आंग्लानामशुभं नेच्छेत्सांघिकः कार्यसिद्धये ।
अहिंसाबलमाश्रित्य जयं विंदेत कर्मसु ॥ ३३ ॥

अतः स्वशक्तिमास्थाय साग्रहं कथयाम्यहम् ।
श्रद्धालुः स्वप्रतिज्ञायां प्रविशेत्समितिं जनः ॥ ३४ ॥
आत्मानं च परीक्षेत कार्यस्वीकारतः पुरा ।
निवर्तेत न च ध्येयात्संकटेष्वपि सांघिकः ॥ ३५ ॥
संघो हि निजदौर्बल्यादधःपतनमाप्नुयात् ।
काले तमुद्धरेन्नो चेत्कृतमप्यकृतं भवेत् ॥ ३६ ॥
अथ चाब्धियुगे मासि पेशावरपुरेऽमिलत् ।
सर्वभारतराष्ट्रीयसंघस्य समितिः किल ॥ ३७ ॥
विमतालंबिनः केचिज्जनस्वातन्त्र्यनिर्णये ।
परित्यज्य सभास्थानं निर्ययुः क्रुद्धमानसाः ॥ ३८ ॥
तदाकर्ण्याप्यखिन्नोऽसौ वृत्तपत्रेऽलिखन्मुनिः ।
विमतापगमः संघाच्छुभमेव करिष्यति ॥ ३९ ॥
पुरैवैकमतालम्बी न संघः संप्रति स्थितः ।
इत्यात्मचेष्टितेनैव जनैरेतैर्निदर्शितम् ॥ ४० ॥
तथा च सन्ति संघेऽस्मिन् सभ्याः पक्षावलम्बिनः ।
संघलक्ष्ये न बिभ्राणाः श्रद्धामभ्युदयेऽस्य वा ॥ ४१ ॥
ईदृशे जाग्रति द्वैधे विमतस्वैरवर्तिनाम् ।
न चैकदेहन्यायेन योधनं सुकरं भवेत् ॥ ४२ ॥
अतश्च सांघिका ये स्युरविश्वासाद्विरोधिनः ।
तेषां निर्गमनं योग्यं संघादिति मतिर्मम ॥ ४३ ॥

अमी सम्यक्तरां कुर्युर्देशसेवां बहिःस्थिताः ।
संघमध्ये वृथा स्थित्वा मा क्लिशन् भिन्नमानसान् ॥ ४४ ॥
चिन्तनीयमिदं चान्यद्यदेते विघ्नकारिणः ।
दण्ड्याः स्युरितरैः शिष्टैः संघक्षोभनिवृत्तये ॥ ४५ ॥

प्रत्यासन्नमहायुद्धवार्तामथ पठन्मुनिः ।
पाश्चात्यवृत्तपत्रेषु स्वयं हरिजनेऽलिखत् ॥ ४६ ॥
अहिंसातत्त्वचिन्तां मे सफलां परिभावये ।
वशयेद्यदि तत्तत्त्वं पाश्चात्यजनमानसम् ॥ ४७ ॥
प्रत्याययेच्च पाश्चात्यान् हिंसैकशरणार्थिनः ।
अहिंसाया बलाधिक्यं हिंसाशतबलादपि ॥ ४८ ॥
जकोस्लावाख्यदेशस्य नायकेभ्यः समर्पये ।
महावीरोचितं शस्त्रं न पुनः कातरप्रियम् ॥ ४९ ॥
सार्वभौममहाशक्तिमपि मत्वा तृणाय सः ।
शिरो न नमयेद्वीरः स वीरो नेतरो जनः ॥ ५० ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां सभात्यागसाहसो नाम षड्विंशोऽध्यायः ।

सप्तविंशोऽध्यायः ।

खेचराग्निग्रहक्ष्माङ्कसंभवात्कैस्तवत्सरे ।
कतिचिद्वर्णयिष्यामि वृत्तान्तान् सत्यवादिनः ॥ १ ॥

अस्ति सौराष्ट्रदेशेषु राजदुर्गाभिधा पुरी ।
यत्र धर्मेन्द्रसिंहाख्यः शशास पृथिवीं नृपः ॥ २ ॥
वीरावल इति ख्यातस्तस्य मन्त्रिवरोऽभवत् ।
यः स्वयं कर्मवीरोऽपि निर्बलो दीनरक्षणे ॥ ३ ॥
राजा धर्मपरो नासीन्निजनामानुरोधतः ।
यतो दुर्मन्त्रिणो हस्ते पतितो विवशः स्थितः ॥ ४ ॥
अग्निकाष्ठादिवस्तूनामेकान्तपरिकल्पने ।
स्वतन्त्राश्चक्रिरे केचिद्ववृधे तेन तत्क्रयः ॥ ५ ॥
एवंविधानि कर्माणि दीनक्लेशकराणि सः ।
सविश्वासिजनस्यार्थे विदधे पक्षपाततः ॥ ६ ॥
अतो भृशमसंतुष्टा बभूव जनता पुरे ।
अदूरभाविनं क्षोभं सूचयन्ती प्रतिक्षणम् ॥ ७ ॥
प्रजापरिषदित्याख्यां बिभ्रती पौरमण्डली ।
शिलीन्ध्रोदयसाम्येन सहसाभूत्समुत्थिता ॥ ८ ॥
अनयाकारि सौराष्ट्रराज्यतन्त्रमहासभा ।
यत्राध्यक्षपदं श्रीमद्वल्लभार्यैरधिष्ठितम् ॥ ९ ॥
अभीष्टवक्ष्यमाणार्थान्मार्गति स्म सभाजनः ।
ऐकान्तिकाधिकारस्य सर्वतोऽपि व्यपोहनम् ॥ १० ॥
शते पञ्चदशन्यूनीकरणं भूकरस्य च ।
जनस्वाम्यप्रतिष्ठां च राज्यभारप्रवर्तने ॥ ११ ॥

एतदर्थे द्विराहूता निर्णायकसभा पुनः ।
अध्यक्षपदमास्थाय यत्र वीराबलः स्थितः ॥ १२ ॥
पर्यन्ते मिलिता भूयः परिषद्राजसंनिधौ ।
जगाद यत्र धर्मेन्द्रः प्रेरणावशगो यथा ॥ १३ ॥
मम चायं प्रजानां च संबद्धो विषयः किल ।
उभये च समालोच्य व्यवस्थास्यामहे स्वयम् ॥ १४ ॥
न विद्यते परापेक्षा बाह्यानां किं प्रवेशतः ।
तथापि वल्लभार्याणां प्रवेशं जन इच्छति ॥ १५ ॥
नास्ति किं मयि विश्वासो यदन्यः समपेक्ष्यते ।
कथं श्रद्धेयमस्माभिः परकीयस्य मन्त्रितम् ॥ १६ ॥
निशम्येदं विवादस्था न राज्ञे संमतिं ददुः ।
अपूर्वश्च जनक्षोभो राजदुर्गे समुत्थितः ॥ १७ ॥
शिल्पयन्त्रालयद्वारं बन्धितं क्षोभकारिभिः ।
येन कर्मकरा जाताः शतशो नष्टवृत्तयः ॥ १८ ॥
राजकीयधनागारं पर्यवस्कन्दितं ततः ।
धान्यागमनिरोधेन व्यवहारश्च नाशितः ॥ १९ ॥
अपकृत्यैश्च तैः पीडा जनस्यासीन्न भूपतेः ।
आतुरैरात्मनीनं हि साहसिक्याद्विनाश्यते ॥ २० ॥
एतावताप्यसन्तुष्टैः कृषिकाः क्षोभकारिभिः ।
प्रलोभेन न्यवार्यन्त क्षेत्रशुल्कप्रदानतः ॥ २१ ॥

प्रजाधिपत्यसंप्राप्तौ दास्यते क्षेत्रमुत्तमम् ।
अल्पीयसा करेणेति बोधयद्भिरनेकदा ॥ २२ ॥
सौराष्ट्रस्यान्यदेशेभ्यस्तथा मुम्बापुरादपि ।
अम्मदाबादनगरादाजग्मुः शतशो जनाः ॥ २३ ॥
राज्यभारगतिं रोद्धुममी क्षुब्धाः प्रयेतिरे ।
राष्ट्रकार्यालयादिभ्यो विद्युच्छक्तिवियोजनात् ॥ २४ ॥
वाणिज्यस्यान्यकेन्द्राणि प्रति व्यावर्तनादपि ।
तथा कर्मपरित्यागोत्साहनाच्च पुनः पुनः ॥ २५ ॥
शासकैश्च समादिष्टविक्रयाणां विरोधनात् ।
उद्योगिनां बहिष्कारादधिकारिविचालनात् ॥ २६ ॥
नगरस्य समालोक्य शोचनीयां परिस्थितिम् ।
वल्लभार्यैः सहाकार्षीद्धर्मेन्द्रो मन्त्रणं ततः ॥ २७ ॥
अनुमेने च निर्मातुं समितिं दशभिर्जनैः ।
वल्लभार्यैर्वृताः सप्त भवेयुः स्ववृतास्त्रयः ॥ २८ ॥
इत्येवं स प्रतिज्ञाय वृत्तपत्रेषु भूपतिः ।
प्राकाश्यं दश नामानि सदस्यानामनीनयत् ॥ २९ ॥
प्रतिश्रुत्यापि धर्मेन्द्रः सर्वक्लेशनिवारणम् ।
जहावन्वर्थनामत्वं वीराबलवशं गतः ॥ ३० ॥
पक्षपातपरित्यागस्तावदास्तां विदूरतः ।
आश्रित्य स्वयमन्याय्यमार्दयद् द्विगुणं प्रजाः ॥ ३१ ॥

इति कर्तव्यतामूढैः पर्यन्तेऽथ सभापतिः ।
वल्लभार्यः समाह्वायि व्यवस्थायै पुनर्जनैः ॥ ३२ ॥
कार्यसिद्धिदृढाशंसी स च प्राप्य पुरीं पुनः ।
जगाम भूभृतः पार्श्वं संधिकामो जनप्रियः ॥ ३३ ॥
तमादरेण सत्कृत्य धर्मेन्द्रः प्रतिशुश्रुवे ।
करिष्ये स्वप्रजाभीष्टमत्र चिन्ता विमुच्यताम् ॥ ३४ ॥
इति प्रत्यायितो राजा प्रजाक्षेमप्रवर्तने ।
मत्वा कृतार्थमात्मानं निरगाद्वल्लभः पुरात् ॥ ३५ ॥
शोचनीया यथापूर्वं पौराणां तु दशा स्थिता ।
वायदण्ड इवाकार्षीद्वल्लभश्च गतागतम् ॥ ३६ ॥
तथा हि प्राप्य धर्मेन्द्रं लेभे वाग्दानपत्रिकाम् ।
वल्लभार्योऽमुना दत्तां राजमुद्राङ्किताक्षराम् ॥ ३७ ॥
स्वतो विवेकशून्यस्य दुर्मन्त्रिवशमीयुषः ।
नाममात्रेण भूपस्य प्रतिज्ञालेखनेन किम् ॥ ३८ ॥
मासद्वये व्यतीतेऽपि न किञ्चित्परिवर्तनम् ।
चक्रे वाक्यानुरोधेन त्रपाहीनो नराधिपः ॥ ३९ ॥
शङ्कमानेन विक्षोभं नगर्यामाततायिभिः ।
आहूतो वल्लभार्येण श्रीगान्धिः समुपाययौ ॥ ४० ॥
अवेदीदचिराद्गान्धिर्जटिलोऽत्र प्रवर्तते ।
पुरे त्रैपक्षिको वादः समाधेय इति द्रुतम् ॥ ४१ ॥

एकत्रासीद्सन्मन्त्रः पूर्वोक्तो राजमन्त्रिणः ।
आंग्लाधिकारिणोऽन्यत्र गिब्सन्नाम्नश्च पैशुनम् ॥ ४२ ॥
असंतुष्टप्रजानां च निरन्तरविरोधनम् ।
इत्यन्योन्यप्रसक्तोऽभूच्चित्रस्त्रैकोणिकः कलिः ॥ ४३ ॥
नृपस्य पितरं गान्धिः पश्यति स्म स्वपुत्रवत् ।
अत एवाद्य धर्मेन्द्रं पौत्रवत्समवैक्ष्यत ॥ ४४ ॥
स तेन सत्कृतो राज्ञा सोपचारं निजालये ।
उपादिशद्वृद्धः प्रीत्या सत्यमार्गावलम्बनम् ॥ ४५ ॥
अवादीद्थ धर्मेन्द्रो महात्मन् विद्धि वस्तुतः ।
न दत्तं लेखनद्वारा प्रतिज्ञावचनं मया ॥ ४६ ॥
वर्तते सर्वतस्तुष्टा राजधान्यां मम प्रजा ।
वृथा क्षोभकराः केचिद्विचेष्टन्ते विरोधिनः ॥ ४७ ॥
भूकरो न प्रदातव्य इति प्रेर्य कृषीवलान् ।
अन्यांश्च नेतुमिच्छन्ति कापथं मूढचेतसः ॥ ४८ ॥
तथापि वितरिष्यामि जनैर्यद्भिलष्यते ।
प्रातिनिध्यं प्रजास्वाम्यं राज्यनायकमण्डले ॥ ४९ ॥
यथोक्तकरणं तस्य वचसः प्रतिपालयन् ।
उवास नगरे गान्धिरनीक्षितफलोदयः ॥ ५० ॥
अथ वीरावलेनासौ समालोच्य पुनः पुनः ।
अपश्यन् कार्यसाफल्यमात्मानमनुसंदधे ॥ ५१ ॥

एकदा ध्यायतो रात्रौ प्रकाशः सहसोद्भूत् ।
प्रशान्तहृदये तस्य दिव्यवाक् च तमब्रवीत् ॥ ५२ ॥
कार्यस्ते चरमो यज्ञो गतिर्नान्या हि विद्यते ।
इत्यसौ बोधितश्चक्रे निश्चयं प्रायमासितुम् ॥ ५३ ॥
उपवासव्रतारम्भात्पूर्वं राजोपजीविनः ।
नातिदूरं मुनेर्वासात्सन्निपेतुर्महाङ्गणे ॥ ५४ ॥
एनमादौ खलीकर्तुं पादरक्षस्रजा ततः ।
हिंसितुं प्रयतात्मानं शिलाघातैश्च निश्चिताः ॥ ५५ ॥
निर्गच्छ मन्दिराद्रान्धे कस्मादन्तर्निलीयसे ।
महाजनस्त्वां सत्कर्तुं हारहस्तः प्रतीक्षते ॥ ५६ ॥
तथेत्यनुवदन्वाचं शुश्रुवे च प्रतिध्वनिः ।
वज्रनिर्घोषसंत्रासी सानुगेन महात्मना ॥ ५७ ॥
जनोत्क्रोशानुरोधेन मुनिं निर्गन्तुमुद्यतम् ।
शङ्कितात्याहितोऽरुधान्माधवार्यः कृताञ्जलिः ॥ ५८ ॥
मा रुधो माधव स्नेहाद्गमने निश्चितोऽस्म्यहम् ।
आह्वयन्ते हि मां क्षुब्धाः कातर्यं स्यादनिर्गमे ॥ ५९ ॥
विसृज्य निरगादेव स्वपादपतितान् जनान् ।
न बिभ्यति महासत्त्वा मृत्योश्च समुपस्थितात् ॥ ६० ॥
अथावतीर्णमालोक्य यानादेककमेव तम् ।
सितोत्फुल्लमुखाम्भोजं निःशब्दोऽभूज्जनः क्षणात् ॥ ६१ ॥

सोऽयं बद्धाञ्जलिः सौम्यो वेष्टितः पुररक्षिभिः ।
जनताभिमुखे तिष्ठन्नुदारां गिरमब्रवीत् ॥ ६२ ॥
अयि भो बान्धवाः कास्ते हारः सत्कृतये मम ।
श्रमेण प्रथितः प्रेम्णा समर्पयत मा चिरम् ॥ ६३ ॥
स मुहूर्तमवस्थाय मौनिनः पुनरब्रवीत् ।
अयि मे सुहृदः सत्यं कथयामि निशम्यताम् ॥ ६४ ॥
आगतोऽस्मीह कर्तुं वः कल्याणं हितचिन्तकः ।
शत्रुं मां यदि मन्यध्वे शिलाघातैर्हतैव माम् ॥ ६५ ॥
इति शुद्धात्मना प्रोक्ते केचिद्द्रुतमपाद्रवन् ।
अन्ये महीरुहारूढा निलीय त्रपया स्थिताः ॥ ६६ ॥
जिघांसुरपि साधूनां दर्शनादेव मार्दवम् ।
समासाद्य ह्रिया नम्रः क्रूरकृत्याभिवर्तते ॥ ६७ ॥
अथ पद्भ्यां महात्मासौ गृहमागात् सुरक्षितः ।
प्रतीक्ष्यमाणः सोत्कण्ठं वत्सलैरनुयायिभिः ॥ ६८ ॥
प्रायोपवेशनोदन्तमाकर्ण्याथ सुगेहिनी ।
राजदुर्गं ययौ शीघ्रमुत्सुका कस्तुराम्बिका ॥ ६९ ॥
नगरीं प्राप्तमात्रैव जगृहे राजपूरुषैः ।
निचिक्षिपे च कारायामप्राप्तपतिदर्शना ॥ ७० ॥
विदन्नपि महात्मानं प्रजैकहितकारिणम् ।
अनेडमूकतां भेजे धर्मेन्द्रः प्रभुदर्पतः ॥ ७१ ॥

विफलेषु प्रयत्नेषु निश्चिकाय महामतिः ।
प्राणान्तिकोपवासाय गत्यन्तरमनाप्नुवन् ॥ ७२ ॥
निशम्यान्ब्रुवीन्द्राद्याः सुहृदस्तस्य निश्चयम् ।
संदेशान् प्रेषयामासुर्भीता निरशनव्रतात् ॥ ७३ ॥
भाविनि त्रिपुराग्रामे राष्ट्रसंघाधिवेशने ।
भवतः संनिधिः सर्वैः सोत्कण्ठमभिलष्यते ॥ ७४ ॥
अत्यन्तसाहसेनालमित्यमी तं ययाचिरे ।
न चासौ निश्चिताद्यज्ञाद् व्यचलत्सत्त्वसागरः ॥७५ ॥
प्रत्युवाच ततो गान्धिः कृतज्ञोऽस्मि हितैषिणाम् ।
यावत्प्राणाः शरीरे मे तावद्रक्ष्ये मनोगतम् ॥ ७६ ॥
यदाज्ञया प्रवृत्तोऽहमिदं साधयितुं व्रतम् ।
स दर्शयतु भूपेभ्यः शासकेभ्यश्च सत्पथम् ॥ ७७ ॥
त्रिपुरामेलनं गन्तुं महान् यत्नः कृतो मया ।
अन्यदेव तु हन्तासीद्दैवेन परिकल्पितम् ॥ ७८ ॥
यस्य यस्य भवेद्युक्ता राष्ट्रसंसदुपस्थितिः ।
अवश्यं त्रिपुरायात्रा कर्तव्या तेन तेन हि ॥ ७९ ॥
प्रार्थये श्रीसुभाषं च नोल्लंघ्यं भिषजां वचः ।
निवासनगरादेव सभाकार्यं करोत्वसौ ॥ ८० ॥
विधेयः परमो यत्नः संघेन परिशोधने ।
दृष्टान्तं सर्वदोषाणामचिरादपमार्जनैः ॥ ८१ ॥

प्रार्थयिष्ये जगन्नाथं यशो रक्षन्तु सांघिकाः ।
संघेनाहिंसया प्राप्तं शतार्धमितवत्सरैः ॥ ८२ ॥
त्रिपुरायां न सभ्यानां मनःपीडास्तु मत्कृते ।
सा हि मे प्रकृतिर्यत्तु लंघनं स्वविशुद्धये ॥ ८३ ॥
मत्प्राणरक्षणे चिन्ता यदि कार्यावसादिनी ।
तदा मे जीवितं रक्षां नार्हतीति विदन्तु ते ॥ ८४ ॥
इति सभ्यान् स संबोध्य सम्राट्प्रतिनिधिं मुनिः ।
कर्तुमिच्छन् गृहीतार्थं विस्तरेण व्यजिज्ञपत् ॥ ८५ ॥
प्रधानप्राड्विवाकेन हस्तिनापुरवर्तिना ।
निर्णेष्यते विवादोऽयमिति प्रत्युक्तिरागता ॥ ८६ ॥
उपवासव्रतं गान्धिरारेभे पूर्वनिश्चितम् ।
चिन्तामग्नहृदां तूष्णीं पश्यतामनुगामिनाम् ॥ ८७ ॥
भारतं तस्य निस्तारमिच्छति स्म समुत्सुकम् ।
स च मृत्युञ्जयध्यायी मृत्युमप्यजयत्स्वयम् ॥ ८८ ॥
पप्रच्छुरथ विस्तीर्णं परिच्छिद्रगवेषिणः ।
कस्त्वया व्रतभंगेन पुरुषार्थः प्रसाधितः ॥ ८९ ॥
अभीष्टानां तवार्थानां नैकोऽपि सफलीकृतः ।
मुक्तास्तु बन्धनात्केचिद्व्रतोद्दिष्टं न तत्तव ॥ ९० ॥
इत्याक्षेपकृतो गान्धिर्जनान्प्रत्यवदद्यथा ।
हन्ति वाक् चेतयत्यात्मा प्राहुरेवं मनीषिणः ॥ ९१ ॥

राजदुर्गविवादोऽयं स्पृशत्यखिलभारतम् ।
धर्मेन्द्रस्याद्य हि स्थाने सम्राट् प्रतिनिधिः स्थितः ॥ ९२ ॥
अस्ति मे वचने तस्य प्रत्ययो बलवत्तरः ।
न जातु विचलन्ते हि महान्तो निजभाषितात् ॥ ९३ ॥
दैवेनानुग्रहः कार्ये तर्कितादधिकः कृतः ।
कालेन व्यक्तिमायाति मदुक्तेः परमार्थता ॥ ९४ ॥
ततो हरिजने पत्रे महात्मा व्यलिखद्यथा ।
प्रार्थना जनकोटीनां मन्ये नूनं बलीयसी ॥ ९५ ॥
यत्प्रभावादयं दृष्टः परिणामः सुशोभनः ।
प्रायोपवेशनान्तेऽपि स्थितोऽस्मि यदपीडितः ॥ ९६ ॥
जानामि तत्त्वतो लोकान्सर्वदा मयि वत्सलान् ।
मदीयहृदयं तेषु वर्तते हि दिवानिशम् ॥ ९७ ॥
हृदयेषु हि लोकानां विद्यते जगदीश्वरः ।
तदहं दीनमूकानां स्मरामि प्रथमं सदा ॥ ९८ ॥
आराध्यः स हि मे देवः सत्यरूपेण यः स्थितः ।
उपासे सत्यमेवाहं यस्माद्देवोऽस्ति नापरः ॥ ९९ ॥
जानामि यदमी आंग्ला न विदन्ति मनागपि ।
राजकीयार्थमुद्दिश्य लंघनस्योपयोज्यताम् ॥ १०० ॥
भारतीयास्तथा केचिदुपवासस्य फल्गुताम् ।
प्रवदन्तो जुगुप्सन्ते नितरां तत्प्रयोगतः ॥ १०१ ॥

९ सत्या०

शतार्धवत्सराभ्यासादुपलब्धमिदं मया ।
प्रभवत्युपवासोऽपि सत्याग्रहपथेष्वपि ॥ १०२ ॥
सौराष्ट्रभूमिपाः सर्वे जानन्तु यदिहास्म्यहम् ।
आगतो मित्रभावेन परं संधिचिकीर्षया ॥ १०३ ॥
दृष्टमेतन्मया तत्र शासनोच्छेदकारिणः ।
बभूवुरप्रधृष्यास्ते चक्रुरत्याहितं तथा ॥ १०४ ॥
संभ्रमादतिपापिष्ठमकरिष्यन्नमी जनाः ।
यदि न प्रतिरुद्धाः स्युः स्वकर्मसु दिने दिने ॥ १०५ ॥
अन्योन्यमभविष्यच्च प्रजानां दारुणः कलिः ।
तथा चाखिलसौराष्ट्रे प्रजापालकविग्रहः ॥ १०६ ॥
मन्यन्ते बहवो लोका राज्ञा निष्कासनं विना ।
भारतं न भवेन्मुक्तमित्यपि ज्ञायते मया ॥ १०७ ॥
मम त्वत्र मतं भिन्नमेषामस्त्येव भारते ।
स्थानं परंपराप्राप्तं भ्रंशस्तस्मान्न युज्यते ॥ १०८ ॥
चरितैः स्वस्ववंश्यानां गुणदोषविमर्शनात् ।
शिक्षेरन्निजकर्तव्यमिति कामो महान्मम ॥ १०९ ॥
देशकालानुरोधेन वर्तितव्यं हि तैः सदा ।
न कार्या बालिशा बुद्धिर्भवेत्सा हि विडंबना ॥ ११० ॥
स्वाधिकारपरित्यागाद् रञ्जयन्तु निजाः प्रजाः ।
स्वाम्येन प्रभुशक्त्या च राज्यभारप्रवर्तने ॥ १११ ॥

गिराशीयाख्यसामन्तैर्निजक्लेशा निवेदिताः ।
सानुकम्पोऽस्मि तत्रैतैर्भाव्यं कालानुवर्तिभिः ॥ ११२ ॥
कर्तुमर्हन्त्यमी सेवामाचारपरिवर्तनम् ।
ततश्च भवितव्यं तैः प्रजासु हृदयालुभिः ॥ ११३ ॥
प्रतिजाने च मुस्लीमान् तदर्थो न ह्युपेक्ष्यते ।
न केवलमिहस्थाने किन्त्वन्यत्रापि भारते ॥ ११४ ॥
इहास्ते देहमात्रं मे त्रिपुरायां तु मे मनः ।
न गन्तुमधुना तत्र प्रभवामि सुनिर्बलः ॥ ११५ ॥
धीराश्च कर्मशीलाश्च परार्थैकपरायणाः ।
नायका बहवः सन्ति मत्तोऽपि गुणवत्तराः ॥ ११६ ॥
धर्मेन्द्रस्तस्य मन्त्री च तथाप्याक्षेपभाजनम् ।
कृतौ मया हि वात्सल्यान्न विरोधवशात् पुनः ॥ ११७ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां राजदुर्गसंक्षोभो नाम सप्तविंशोऽध्यायः ।

अष्टाविंशोऽध्यायः ।

प्रायोपवेशनत्वस्य व्याख्यानं नास्तिकान् प्रति ।
गान्धिर्हरिजने पत्रे लिलेख विशदं यथा ॥ १ ॥
प्रीतंदासवरः कश्चित्सूक्तिरत्नं पुराब्रवीत् ।
स सुखी यः पतत्यग्नौ द्रष्टा तु ज्वालयार्दितः ॥ २ ॥

प्रवर्तमानविक्षोभप्रशमायैकसाधनम् ।
हन्त दैवेन मे दत्तं श्रुत्वेदं मा हसीज्जनः ॥ ३ ॥
संकटे मे गतिर्नान्या विना भागवतीं कृपाम् ।
बहिर्यद्भाति दुर्बोधं तदात्मप्रेरणाफलम् ॥ ४ ॥
प्रमाणत्वेन गृह्णामि प्रेरणामन्तरात्मनः ।
शतार्धवत्सरैः साक्षात्कृतमेतन्मया स्वयम् ॥ ५ ॥
अप्राप्तयौवनस्यापि श्रद्धा मेऽत्र स्थिराभवत् ।
दैवैकशरणस्तस्मान्नित्यदाहमवस्थितः ॥ ६ ॥
न स्वैरमुपयोज्यं स्यादुपवासाख्यसाधनम् ।
हिंसामात्राय कल्पेत प्रयुक्तं चेदपाटवात् ॥ ७ ॥
धर्मेन्द्रं पौत्रवत्पश्यन् प्रयतेऽहं स्वपीडया ।
उद्बोधयितुमेतस्य हृदि सौजन्यमुत्तमम् ॥ ८ ॥
मया पूर्ववयस्येव शुद्धये लंघनं कृतम् ।
गच्छता तच्च कालेन शनैर्दीर्घीकृतं मया ॥ ९ ॥
एकदा मे सदोषस्य कृते पुत्रस्य लंघनम् ।
अन्यदा सुहृदः पुत्र्याः स्खलन्त्याः कृतवानहम् ॥ १० ॥
उभयत्राप्यसावासीदुपवासः फलेग्रहिः ।
उभावपि यतो वत्सौ प्रापितौ सत्पथं पुनः ॥ ११ ॥
कृतवानाफ्रिकादेशे प्रथमं लंघनव्रतम् ।
सत्याग्रहप्रवृत्तानां बान्धवानां कृते पुरा ॥ १२ ॥

उपवासेषु नैकोऽपि स्मरामि विफलोऽजनि ।
अन्वभूवं व्रतेनाहं हर्षशान्तिसुखं परम् ॥ १३ ॥
उपवासक्रिया व्यर्था भवेद्देवकृपां विना ।
सत्याग्रहोपवासौ स्तः साक्षात्त्यागसमुद्भवौ ॥ १४ ॥
उभावप्यवलंबेते फलनिष्पत्तये ध्रुवम् ।
सौमनस्यं हि लोकानां कटुत्वेनाकलङ्कितम् ॥ १५ ॥
फलाय न त्वरा कार्या लंघनव्रतवर्तिना ।
एकाह्नेन जितो नासीद्रामेणापि दशाननः ॥ १६ ॥
प्रायोपवेशने येन प्रेरितोऽस्मि परात्मना ।
तस्य निर्वाहसामर्थ्ये स एवानुग्रहीष्यति ॥ १७ ॥
जीविष्यामि ध्रुवं तावद्दैवमिच्छेत्तथा यदि ।
करिष्यामि च सोत्साहं लोकसेवां स्वयंवृताम् ॥ १८ ॥
धर्मेन्द्रस्य मृषावाचो मृदूकर्तुं मनो मया ।
उपवासः समारब्धो न तु निर्बन्धकामया ॥ १९ ॥
यावदेष प्रतिज्ञानं न कुर्यात्तावदन्यतः ।
न यास्यामीति निश्चित्य प्रस्थितोऽस्मि स्वगेहतः ॥ २० ॥

इति सौ. क्षमायाः कृतिपूत्तरसत्याग्रहगीतायां प्रायोपवेशनप्रयोजनो नामाष्टाविंशोऽध्यायः ।

नवविंशोऽध्यायः ।

कृतायां च व्यवस्थायामांग्लमुख्याधिकारिणा ।
राजदुर्गे महात्मासौ विररामोपवासतः ॥ १ ॥
राजदुर्गप्रवासोऽयं प्रासूत फलमुत्तमम् ।
तर्कितादपि भूयिष्ठं बहूपायैश्च दुर्लभम् ॥ २ ॥
शास्यशासकयोर्मानः सुदैवाद्रक्षितोऽभवत् ।
जनक्लेशकलापश्च न संजातो निरर्थकः ॥ ३ ॥
जगदीशप्रसादेन विना पर्यन्तशोभनः ।
परिणामो न शक्येत लब्धुमीदृङ् न संशयः ॥ ४ ॥
महात्मा प्रार्थयामास प्रत्येकं नागरं जनम् ।
सहकारं क्रियासिद्ध्यै यथामति यथाबलम् ॥ ५ ॥
नित्यमेकमनस्कत्वं हिन्दुमुस्लिमवर्गयोः ।
उच्चनीचत्वभेदस्य सर्वथैव निराकृतिम् ॥ ६ ॥
अहिंसासत्ययोरेव प्रमाणीकरणं सदा ।
तथा संभूयकारित्वे रुच्युत्साहनिषेवणम् ॥ ७ ॥
सूत्रनिर्माणमुख्येषु कर्मसु व्यवसायिताम् ।
धारणे खादिवस्त्राणां सर्वदा नियतं व्रतम् ॥ ८ ॥
निरक्षरजनानां च पाटवं लेखनं तथा ।
इति लोकमनोभूमौ कार्यबीजमरोपयत् ॥ ९ ॥

राजदुर्गात्ततो गान्धिः प्रययौ हस्तिनापुरम् ।
उद्घाटयितुमाहूतो लक्ष्मीनारायणालयम् ॥ १० ॥
तथा बुद्धविहारस्य गृहं नूतननिर्मितम् ।
धार्मिकैश्च वदान्यैश्च श्रीमद्बिर्लासहोदरैः ॥ ११ ॥
प्रगाढजनसंमर्दादासीद्देवालयांगणम् ।
भूषितं सुविशालं च दुष्प्रवेशं महात्मनः ॥ १२ ॥
भाषणोपक्रमं कर्तुमुत्थिते तु महात्मनि ।
नादाभिवर्धकं यन्त्रमभवद्भग्ननिष्क्रयम् ॥ १३ ॥
तस्माद्भाषणमश्राव्यं संजातमिति कारणात् ।
निजव्याख्यानसंक्षेपं वृत्तपत्रेष्ववेदयत् ॥ १४ ॥
आशासे नितरामेतद्देवस्थानं विवर्धयेत् ।
उपासकेषु सर्वेषु भूयसीं धार्मिकीं धियम् ॥ १५ ॥
अस्पृश्यताप्रसंगोऽपि नास्ति बौद्धालये क्वचित् ।
श्रीकृष्णमंदिरे चापि नास्ति नीचोच्चभावना ॥ १६ ॥
आर्यधर्मेष्वहं मन्ये नास्पदं विद्यते क्वचित् ।
अस्पृश्यताप्रवादाय नीचोच्चकलनाय वा ॥ १७ ॥
वर्णो हि वृत्तिमाख्याति कर्माणि च पृथक् पृथक् ।
नापकर्षं न चोत्कर्षं नराणां जन्मकारणात् ॥ १८ ॥
यस्य लौकिकसंपत्तिर्विज्ञानविभवस्तथा ।
स भवेल्लोकसेवायामधिकं विनयान्वितः ॥ १९ ॥

यदैवास्पृश्यताबुद्धिर्यदा नीचोच्चकल्पना ।
प्रसूताभूत्तदारेभे हिन्दुधर्मक्षयः शनैः ॥ २० ॥
सत्याहिंसास्थिराधारे हिन्दुधर्मः प्रतिष्ठितः ।
विश्वमेतद्यथा मेरौ सृष्टिमारभ्य वर्तते ॥ २१ ॥
जगति स्थितधर्माणां समुत्कर्षं दिने दिने ।
कामयन्तु जनाः सर्वे हिन्दुधर्मावलंबिनः ॥ २२ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां देवालयोद्घाटनो नाम नवविंशोऽध्यायः ।

त्रिंशोऽध्यायः ।

राजनैतिकचित्रस्य पटे भाति समुज्ज्वलम् ।
चम्पारण्यमिति क्षेत्रं विंशत्यब्दान्तरालके ॥ १ ॥
अतिमात्रप्रसिद्धोऽभूत्प्रान्तोऽयमतिपीडनात् ।
आंग्लैः कृषिकलोकानां क्षेत्रस्वाम्यजुषां चिरात् ॥ २ ॥
प्रत्यवस्थानमार्तानां कृषिकानामभूत्पुरा ।
तच्च प्रशमितं शीघ्रं लोकविस्मृतिमाययौ ॥ ३ ॥
आसन् षष्टिरभिद्रोहाः शताब्द्यामांगलोपरि ।
ते सर्वे प्रबलैरांग्लैः स्वार्थनिष्ठैरुपेक्षिताः ॥ ४ ॥
तत्रासीत्कर्षकः कश्चित्स्थविरः कर्मणि स्थिरः ।
येन ह्यनक्षरेणापि सत्याग्रहकथा श्रुता ॥ ५ ॥

उपेत्य स महात्मानं गिरा करुणयाब्रवीत् ।
शोच्यं स्वदेशवृत्तान्तमश्रुतं दूरवर्तिभिः ॥ ६ ॥
मर्मभेदकमाकर्ण्य वृत्तान्तं करुणानिधिः ।
विदर्भानगमच्छीघ्रं जनपीडानिवर्तकः ॥ ७ ॥
कृशान् कृषीवलान् पश्यन् जीर्णकच्चरवाससः ।
नताङ्गान्नवसन्नाक्षान् ज्ञातवान् दुर्दशां मुनिः ॥ ८ ॥
यथा रम्यवनाकीर्णं सुसमृद्धजलाशयम् ।
चम्पारण्यं समाक्रान्तमासीदुत्पातमृत्युना ॥ ९ ॥
सोऽब्रवीत्तानलं व्यर्थैरभिद्रोहपरिश्रमैः ।
आनीतं हि मया किंचिद्विशिष्टफलदायकम् ॥ १० ॥
आसीत्तदीयसांनिध्यं नेत्ररोगोऽधिकारिणाम् ।
विज्ञाततन्महत्त्वानां जनकल्याणवैरिणाम् ॥ ११ ॥
दूरात्प्रथममायातमाप्तं विपदि बान्धवम् ।
आज्ञापयन्नमी दर्पादलं तेऽत्र परिश्रमैः ॥ १२ ॥
तथाप्यसौ तदादेशमनादृत्य विनिर्भयः ।
जनानुद्बोधयामास बोधनैर्हृदयंगमैः ॥ १३ ॥
चम्पारण्यमिदं कुर्यात्स्वकार्यसमरं स्वयम् ।
न वाञ्छेदन्यसाहाय्यं धनाय च जनाय च ॥ १४ ॥
अथेदं श्रीमतो गान्धेः संक्षिप्तमनुशासनात् ।
आचकर्ष विदर्भाणां बहून्नेतॄन् विचक्षणान् ॥ १५ ॥

श्रीराजेन्द्रक्रिपालानीव्रज्किशोरादयो ययुः ।
क्लेशान्मोचयितुं चारुचम्पारण्यनिवासिनः ॥ १६ ॥
तत्र रात्रिंदिनं चक्रुर्लोकाद्विषयसंग्रहम् ।
पत्रमारोपयामासुर्वृत्तक्लेशसहस्रकम् ॥ १७ ॥
तं क्षेत्रस्वामिनो रुष्टा द्रष्टुं गान्धिमुपाययुः ।
शान्तवक्त्राम्बुजं वीक्ष्य व्रीडया च रुषं जहुः ॥ १८ ॥
प्रान्तप्रतिनिधिः श्रीमानेड्वर्डगेटिति विश्रुतः ।
प्रस्तुतार्थविचाराय सभामेकामकल्पयत् ॥ १९ ॥
फ्रांकस्लायाख्य एतस्य संघस्याधिपतिः कृतः ।
अयाचत महात्मानं सदस्योऽस्तु भवानिति ॥ २० ॥
शतसंवत्सरस्थायि निरोधः क्लेशदायकः ।
स चिरात्तेन संघेन निरस्तध्वंसितोऽभवत् ॥ २१ ॥
कृषीवला मुदा प्रोचुः श्वसिमो हन्त सांप्रतम् ।
नास्ति बाधा न संत्रासः कातर्यं च पलायितम् ॥ २२ ॥
आरब्धमूर्जितं कर्तुं न शशाक मुनिर्यतः ।
विदर्भेषु चिरावासः सुकरस्तस्य नाभवत् ॥ २३ ॥
यदा यदा पुनस्तत्र ययौ कार्यवशेन सः ।
बभूवुर्मिलिता लोका दर्शनाय सहस्रशः ॥ २४ ॥
तदानीं जनसम्मर्दो यानस्थाने महाद्भुतः ।
दृश्यते स्म प्रतोलीषु गृहाणां पटलेषु च ॥ २५ ॥

अहो कृतज्ञातमूला प्रीतिरेषा निसर्गजा ।
कालेन गच्छता तेषामवर्धत मुहुर्मुहुः ॥ २६ ॥
रूप्यकाणां सहस्राणि सञ्चिक्युः कर्मकारिणः ।
नूतनं ग्रामनिर्माणं चक्रिरे हरितैस्तृणैः ॥ २७ ॥
विद्भवनिताः पूर्वं या न जग्मुर्गृहाद्बहिः ।
विहाय रूढिमुत्खेलुर्लोकसेवापरायणाः ॥ २८ ॥

इति सौ. क्षमायाः कृतिपूत्तरसत्याग्रहगीतायां चम्पारण्यकृषिकोत्साहनो नाम त्रिंशोऽध्यायः ।

एकत्रिंशोऽध्यायः ।

अथ वैशाखमासेऽयं ययौ वृन्दावनं मुनिः ।
गान्धिसेवासमाजेन भाषणाय निमन्त्रितः ॥ १ ॥
अयि भो वक्तुमिच्छामि कर्मवैफल्यकारणम् ।
प्रयासेऽपि कृते वीराबलस्य परिवर्तने ॥ २ ॥
अहिंसा न श्रितास्माभिर्व्यवहारेऽमुना समम् ।
सत्याग्रहपथं हित्वा शापस्तस्मिन्निपातितः ॥ ३ ॥
नियन्तुमात्मनो वाचं शक्यमासीन्मम स्वयम् ।
स्तंभनं परजिह्वानां विधातुं न किलाशकम् ॥ ४ ॥
सम्राट्प्रतिनिधेस्तावन्मया साह्यं न याचितम् ।
मुख्याधिकारिणः पार्श्वं कार्याय गतवानहम् ॥ ५ ॥

राष्ट्रसंघस्य सभ्यानां दोषजातं दुनोति माम् ।
अहिंसासत्यदैवस्य संघः साक्षान्निकेतनम् ॥ ६ ॥
तत्र दूषणजं बालं निंद्योपस्थितिहेतुकम् ।
मषीव निर्मलादर्शे रुज्यत्यास्माकमानसम् ॥ ७ ॥
केचिद्युष्मासु गान्धेया इति नाम्नोदिताः कृताः ।
भवेदहिंसकाभिख्या युष्माकं गुणवत्तरा ॥ ८ ॥
गुणदोषबलाशक्तिर्हिंसाऽहिंसाविमिश्रितः ।
अस्त्ययं मानुषो गान्धिरहिंसा दिव्यपावनी ॥ ९ ॥
किमहिंसा स्वतःशुद्धा युष्माभिः परिशील्यते ।
अरेः किं शरसंपातं सहध्वं शान्तचेतसा ॥ १० ॥
स्वदोषान् पर्वतीकुर्युरहिंसाव्रतधारिणः ।
परकीयानणूकुर्युः पाप्मनः पर्वतोपमान् ॥ ११ ॥
अहिंसासत्यमाहात्म्ये श्रद्धालुर्विंशतिः सताम् ।
वरं विश्वासहीनानामसतां द्विशतादपि ॥ १२ ॥
विंशतिः किल साधूनां कदाचिद्द्विशती भवेत् ।
द्विशती चाप्यसाधूनां विनाशं नः करिष्यति ॥ १३ ॥
सदोषः किं न संघोऽयं सभ्यैः कपटवृत्तिभिः ।
अन्योन्यशङ्कया ग्रस्तैः स्वार्थमात्रपरायणैः ॥ १४ ॥
वहेत्सत्याग्रही श्रद्धां परमां परमात्मनि ।
बलमेकान्तविश्वासादपरं नास्य विद्यते ॥ १५ ॥

विनासावीदृशीं श्रद्धां कथं सत्याग्रहं चरेत् ।
याज्ञिको भवितुं नार्हः पुरोधा मन्त्रवर्जितः ॥ १६ ॥
अतो वक्ष्यामि न श्रद्धाबलं यस्य न विद्यते ।
तेन सत्याग्रहाख्यापि विस्मर्या संघनिर्गमात् ॥ १७ ॥
कियान्तस्तन्तुचक्रे वः श्रद्धां बिभ्रति वस्तुतः ।
चिह्नमेतदहिंसाया इति किं प्रत्ययोऽस्ति वः ॥ १८ ॥
दृढा स्याद्यदि युष्माकं प्रतीतिस्तत्र तादृशी ।
तदा विलक्षणां शक्तिं तन्तुचक्रं हि धारयेत् ॥ १९ ॥
तन्तुचक्रक्रिया न्यायभंगतोऽपि बलीयसी ।
द्वितीयं जनयेत्क्रोधं प्रथमं न मनागपि ॥ २० ॥
वर्षाणां विंशतेः पूर्वं स्वश्रद्धामुद्घोषयन् ।
तामेव पुनरत्रापि प्रोच्चकैः कथयाम्यहम् ॥ २१ ॥
बहूद्योगजनैः पूर्णे विदर्भविषयेऽत्र वः ।
मा भूदेकमपि स्थानं वसतेश्चक्रवर्जितम् ॥ २२ ॥
प्रभावं यदि जानीयुश्चक्रस्यात्र निवासिनः ।
ततो रूपान्तरं यायादखिलापि विदर्भभूः ॥ २३ ॥
यदैव तदहिंसाया वेत्ति चिह्नं जनः स्वतः ।
तदैव तत्प्रकल्पेत ज्योतिः सर्वार्थदर्शकम् ॥ २४ ॥
प्रवर्तयति तल्लोकानभीष्टे कर्मणि ध्रुवम् ।
न कालं जनताव्यर्थं नेतुमुत्सहते तदा ॥ २५ ॥

अविनीतकथालापाद्विरमन्ति स्वयं जनाः ।
मनसापि न कुर्वन्ति चिन्तनं फल्गुवस्तुनः ॥ २६ ॥
निर्जीवमपि तच्चक्रं चैतन्यमभिगच्छति ।
विशिष्टगुणसम्पत्त्या ह्यस्माभिरधिरोपितम् ॥ २७ ॥
रामायणमपि ग्रन्थः स्वयं चैतन्यवर्जितः ।
पवित्रभावनायोगात्कोटीनां दिव्यतां गतः ॥ २८ ॥
पापोऽपि भ्रमयेच्चक्रं ततश्चोत्पादयेद्धनम् ।
तेन स्वदेशसम्पत्तिं यथार्हमभिवर्धयेत् ॥ २९ ॥
ममाग्रे कथितं कैश्चिच्चक्रगीतिर्मनोहरा ।
शमं नीतवती स्वेषां कामक्रोधादिकश्मलम् ॥ ३० ॥
तन्तुचक्रं मया यस्मात्प्रभावेणाभियोजितम् ।
जातमावश्यकं तस्मान्मम सत्याग्रहाय तत् ॥ ३१ ॥
ईदृगव्याहतश्रद्धा यस्य चित्ते न वर्तते ।
सत्याग्रहमसौ क्वापि सर्वथा न प्रवर्तयेत् ॥ ३२ ॥
अहिंसासत्ययोस्तत्त्वं प्रसारमधिकं व्रजेत् ।
न तथा ग्रन्थबाहुल्याद्यथाभ्यस्य प्रदर्शनम् ॥ ३३ ॥
अहिंसाया यदि श्रद्धा भवेन्नः सत्यनिश्चला ।
कार्ये दैवप्रसादेन स्वयं शक्तिरुदेष्यति ॥ ३४ ॥
इयं निष्ठा विपक्षस्य मतं जिज्ञासवो वयम् ।
इति व्यनक्ति तद्यत्नः कार्यस्तदवबोधने ॥ ३५ ॥

अहिंसा नाम सा हिंसामुखे सा निर्भया गतिः ।
एवं तदर्थकारित्वं स्वयं प्रादुर्भविष्यति ॥ ३६ ॥
ईदृग् दृढानुसंधानं विना किं ग्रन्थशीलनैः ।
अन्तरा नियतां दीक्षां न यज्ञः फलदो भवेत् ॥ ३७ ॥
निषिद्धे वृत्तपत्रेऽपि बालभारतसंज्ञके ।
आंग्लाधिकारिभिः पूर्वं न खेदं कृतवानहम् ॥ ३८ ॥
तस्मिन् पत्रे विनष्टेऽपि सत्याग्रहविसारिणि ।
अभिनंद्यमिदं सत्याग्रहोऽयमनुजीवति ॥ ३९ ॥

महात्मनेऽथ पत्राणि व्यालिखत्पारसीजनः ।
मद्यक्रयविरोधेन नितरां क्रुद्धमानसः ॥ ४० ॥
अब्रवीत्कश्चिदाक्षेप्ता निषेधनियमः कृतः ।
हिन्दुभिः पारसीकानां विनाशाय समत्सरैः ॥ ४१ ॥
अन्यः कश्चित्प्रतिष्ठावान्महोपाधिधरोऽलिखत् ।
किं प्रलोभयसि त्वं नः पानाय न्यायभङ्गतः ॥ ४२ ॥
निषेधशासनेऽस्माकं संमतिर्न हि विद्यते ।
प्रतिबन्धादतः शीघ्रं मोचनं कामयामहे ॥ ४३ ॥
पानं सामाजिको धर्मः प्ररूढः सांप्रदायिकः ।
विद्यन्ते बहवोऽस्मासु प्रत्यहं तदपेक्षिणः ॥ ४४ ॥
खारेघाटाभिधेनापि प्रोक्तं पानविरोधिना ।
नाहं मद्यस्य विक्रेता मद्यपायी न चास्मि वा ॥ ४५ ॥

तथापि नचिरान्मद्यनिषेधोऽयं करिष्यति ।
विनाशनं सहस्राणामिति तत्स्मर्यतां वचः ॥ ४६ ॥
मिष्टापूपं सुमद्यं च दद्यादतिथये गृही ।
इत्यस्ति पारसीयानां नित्यधर्मानुशासनम् ॥ ४७ ॥
मद्यस्य प्रतिषेधेन मा कारि स्खलितं पुनः ।
अन्यथा भवितानर्थो राजदुर्गे यथा पुरा ॥ ४८ ॥
निषेधशासनं तस्मादचिरेण निरास्यताम् ।
तदा भवति संमानो मदीयः परिवर्धते ॥ ४९ ॥
उवाचोपाधिभागन्यः स्वतन्त्रः पानभोजने ।
सर्वोऽपि वर्तते यस्मात्तत्किं पाननिषेधतः ॥ ५० ॥
इत्येवं बहुलाक्षेपे गान्धिः प्रत्यब्रवीद्यथा ।
प्रसंगेऽस्मिन्न युष्माकं युक्तं मदुपसर्पणम् ॥ ५१ ॥
महान्किलावयोर्मध्ये मतभेदः सुदुस्तरः ।
यथा द्यावापृथिव्योर्हि वर्तते महदन्तरम् ॥ ५२ ॥
श्रीदादाभाइ नव्रोजी विशेषं मामदर्शयत् ।
मद्यस्य विक्रयाभावपानयोर्धीमतां वरः ॥ ५३ ॥
पञ्चत्रिंशद्भवंतीह प्रजानां किल कोटयः ।
एकलक्षमिता यूयं तारतम्यं विमृश्यताम् ॥ ५४ ॥
कीर्तिर्वः पारसीकानां न तद्देशनिमित्तजा ।
भारतीयत्वतः ख्यातिर्युष्माकं भुवि राजते ॥ ५५ ॥

अतो वः प्रार्थये मा भूत्क्षमामात्रस्य चिन्तनम् ।
विचिन्त्याः समभावेन बन्धूनां बहुकोटयः ॥ ५६ ॥
नाल्पीयसः समाजस्य भवदीयस्य केवलम् ।
अपि त्वखिलराष्ट्रस्य श्रेयस्तावद्विचिन्त्यताम् ॥ ५७ ॥
भाषां भारतमायाता यूयमत्यजत स्वकाम् ।
अगृह्णीत परां वाणीं वेषाचारविवर्तनैः ॥ ५८ ॥
सत्येवं किमिति व्यर्थैः पूर्वाचारे समादरः ।
भूयांश्चानादरोऽन्येषु भारतीयेषु बन्धुषु ॥ ५९ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां वृन्दावनप्रसंगो नामैकत्रिंशोऽध्यायः ।

द्वात्रिंशोऽध्यायः ।

राष्ट्रीयध्वजमुद्दिश्य वाङ्मयं गान्धिरब्रवीत् ।
कुतः प्रजामनःक्षोभं करोत्येष पुनः पुनः ॥ १ ॥
सत्याग्रहसमारम्भे प्राप्ते हि परमोन्नतिम् ।
पताका स्वीकृता सर्वैः समानैर्विमतं विना ॥ २ ॥
मुस्लीमहिन्दवश्चैनां गृहोपर्युदनामयन् ।
यात्रासु चावहन् हस्ते पुरश्चक्रुः सभासु च ॥ ३ ॥
अलीसहोदराभ्यां च बहुशोऽभूत्प्रशंसिता ।
भाषणावसरेषूच्चैः स्मराम्येषां पताकिनीम् ॥ ४ ॥

ध्वजः साम्राज्यदर्पस्य धर्षणोद्घोषणो मतः ।
अहिंसैकव्रतालंबैः स्वीकृतः शुभलक्षणः ॥ ५ ॥
तन्तुचक्रक्रियायोगं खादिवासोविधारणम् ।
समत्वभावनां चापि संस्मारयति केतनम् ॥ ६ ॥
राष्ट्रध्वजगता वर्णाः सूचयन्त्येकभावनाम् ।
राष्ट्रे सर्वसमाजानां सहयोगं च कर्मसु ॥ ७ ॥
द्वितीये मतभेदेऽपि नापरो युज्यते ध्वजः ।
अतः सार्वत्रिकं मानमेष लोके समर्हति ॥ ८ ॥
परमद्याभ्युपेतव्यं राष्ट्रकेतुरयं बत ।
पूर्ववन्नहि लोकेभ्यः समानमधिगच्छति ॥ ९ ॥
आर्जवैक्यविशुद्धीनां य आसीदुपलक्षकम् ।
सोऽधुना च्छद्मभिन्नत्वदोषाणामास्पदं स्थितः ॥ १० ॥
रक्तवर्णध्वजं केचिद्राष्ट्रसंघसभासदः ।
रोचयन्ति विशेषेण त्रिवर्णात्केतनादपि ॥ ११ ॥
अन्ये च लघुचेतस्काः संघे तस्य निपातुकाः ।
पताकामभिनिन्दन्तः सन्तीत्यपि मया श्रुतम् ॥ १२ ॥
तस्माद्वरमहं मन्ये ध्वजस्य परिवर्तनम् ।
सर्वमेळापकेष्वेव जनयात्रादिकेष्वपि ॥ १३ ॥
यावत्सर्वात्मना भूयो जनैरेषा न काम्यते ।
अद्वितीयपदं तावदुच्चकैर्माधिरोप्यताम् ॥ १४ ॥

यदा यदा हि वैमत्यं वर्तते केतनं प्रति ।
तदा तदा सभामध्ये न कार्यं तत्समुच्छ्रितम् ॥ १५ ॥
एवं तत्पाठशालासु विश्वविद्यालयेष्वपि ।
स्थाने सार्वजनीनेऽपि पौरशालास्वपि त्यजेत् ॥ १६ ॥
एकोऽपि बहुलोकेषु प्रतिकूलो भवेद्यदि ।
त्याज्य एव ध्वजो हि स्यात्स त्यागस्त्यागसंमितः ॥ १७ ॥
ईदृगर्थव्यवस्थायामहिंसोपायकल्पनम् ।
अत्यन्तफलकारि स्यादिति नास्त्यत्र संशयः ॥ १८ ॥
सत्याग्रहरणेऽत्यन्तसहकारात्मनि स्थिते ।
उल्लास ध्वजो जैत्रः स्थलेषु बहुषूच्चकैः ॥ १९ ॥
विपरीते तु कालेऽस्मिन्नन्यैवास्ते परिस्थितिः ।
यत्र यत्र हि वैमत्यं तत्र तत्रोदयः कलेः ॥ २० ॥
वन्दे मातरमित्याख्यराष्ट्रगीतेर्दशाप्यभूत् ।
तत्समा गीतिकर्तुश्च विचारोऽस्तु विदूरतः ॥ २१ ॥
विभाजनस्य वंगानां समये सा हि गीतिका ।
अभून्मुस्लिमहिन्दूनां सिंहनादो समुद्धरः ॥ २२ ॥
इयं साम्राज्यदर्पस्य धर्षणा रोमहर्षिणी ।
स्वातन्त्र्यज्ञापकं देशे प्रतिध्वनिमजीजनत् ॥ २३ ॥
बालकेन मया गीतेः कर्तुर्नामापि न श्रुतम् ।
पश्चाद्बंकिमचन्द्राख्या ममासीद्रोमहर्षिणी ॥ २४ ॥

अलङ्कृतापि गीर्वाणमनोहरपदैरियम् ।
हिन्दूनामेव सा गीतिरिति मे नास्फुरन्मतिः ॥ २५ ॥
यदासीत्कनकं पूर्वं विमलं च समुज्ज्वलम् ।
तदस्मिन् विषमे काले कालायसमिवाजनि ॥ २६ ॥
अतोऽधुना न विक्रेतुं विपण्यां हेम युज्यते ।
लोहपिण्डमिवार्घाय स्वल्पाय स्थूलबुद्धिभिः ॥ २७ ॥
राष्ट्रगीतिं समुद्दिश्य कलहश्चेत्समुद्भवेत् ।
अगीतं तद्वरं मन्ये सभायात्रादिमेलने ॥ २८ ॥
चेतःसिंहासने गीतिः सहस्राणां प्रतिष्ठिता ।
वंगानां बहिरन्तश्च देशभक्तिप्रबोधिनी ॥ २९ ॥
तदीयोत्तमपद्यानां माला वंगभुवार्पिता ।
प्रेम्णा निखिलराष्ट्राय सहान्यैः पारितोषिकैः ॥ ३० ॥
यावच्च ध्रियते राष्ट्रं भारतीयं क्षमातले ।
तावद्गीतिः पताका च प्रोच्चैरुल्लसतो ध्रुवम् ॥ ३१ ॥
प्रागेव संघसभ्यानां प्रवेशान्मन्त्रिमण्डले ।
आसीत्सुभाषचन्द्रोऽत्र प्रतिकूलमतिर्भृशम् ॥ ३२ ॥
अतः पाटलिपुत्रं स ज्येष्ठमासे यदा ययौ ।
मतस्थैस्तस्य सत्कारः सभायां विहितस्तदा ॥ ३३ ॥
सभ्यानां मन्त्रिमण्डल्यां प्रवेशस्यानुमोदकाः ।
सन्निधाय सभास्थाने मानहीनं समाचरन् ॥ ३४ ॥

कृष्णध्वजममी प्रोच्चैरुद्यम्योपलपादुकाः ।
प्रचिक्षिपुः सभामध्ये प्रतिपक्षजनोपरि ॥ ३५ ॥
शोचनीयां कथामेनां श्रुत्वा परमदुःखितः ।
लेखं हरिजने गान्धिः प्राकाशयत तद्यथा ॥ ३६ ॥
एतैः प्रदर्शितं स्वैरं हन्त विक्षोभकारिभिः ।
कुचेष्टितैस्त्रपाहीनैरत्ययोग्यममर्षणम् ॥ ३७ ॥
कार्यकारकसंघस्य विरोद्धुं निर्णयावलिम् ।
स्वता सुभाषचन्द्रस्य वर्तते हि निरङ्कुशा ॥ ३८ ॥
अतस्तदीयपक्षाणामपि सा वर्तते स्वता ।
सत्कर्तुं तं महाभागं यथा तेभ्योऽभिरोचते ॥ ३९ ॥
मतभेदनिमित्तेन कृष्णध्वजविसारणा ।
स्वातन्त्र्यकामिनां हानिं महतीमुदपादयत् ॥ ४० ॥
आशासे पाटलीपुत्रे यद्वृत्तं तत्समं पुनः ।
अयोग्यं संघसभ्यानां न पुनः संभवेदिति ॥ ४१ ॥
सुभाषस्योद्यमं रोद्धुमभिलष्यन्ति चेज्जनाः ।
कृष्णध्वजाधिरोपेण तत्कर्तुं नहि युज्यते ॥ ४२ ॥
कुर्वीरन् स्वसभामन्यां जनताबोधनाय ते ।
तदर्थं सर्वतो रक्ष्या प्रशान्तैव परिस्थितिः ॥ ४३ ॥
न हि कृष्णध्वजारोपैर्न च कण्ठीरवस्वनैः ।
न चाश्मपादुकावर्षैर्जनशिक्षा प्रसिध्यति ॥ ४४ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां राष्ट्रध्वजपूजनो नाम द्वात्रिंशोऽध्यायः ।

त्रयस्त्रिंशोऽध्यायः ।

अथ भाद्रपदे मासि संजज्ञे सममांगलैः ।
शार्मण्यानां तथान्यैश्च संपरायो भयङ्करः ॥ १ ॥
महायुद्धसमारंभात्पूर्वमेव निमन्त्रणम् ।
सम्राट्प्रतिनिधेः प्राप श्रीगान्धिर्मन्त्रकोविदः ॥ २ ॥
संघसामाजिकैः कैश्चिद्वारितोऽपि प्रयाणतः ।
अंगीकृत्य तदाह्वानं प्रतस्थे सिमलाचलम् ॥ ३ ॥
हस्तिनापुरलोहाध्वमंदिरे स व्यलोकत ।
स्थितं महाजनस्तोमं तन्वानं जयघोषणम् ॥ ४ ॥
तद्दिनं किल सप्ताहे समभून्मौनवासरम् ।
अतः स्मेराननस्तूष्णीं धूमयाने स्थितो मुनिः ॥ ५ ॥
राज्ञः प्रतिनिधेः पार्श्वं स प्राप्याभवदक्षमः ।
राष्ट्रप्रतिनिधेः कार्यं निर्वोढुं सत्यपालकः ॥ ६ ॥
संध्यादिव्यवहारस्य न कदापि भवेत्कथा ।
इत्यहिंसाव्रती श्रीमान् गान्धिरासीद्विनिश्चितः ॥ ७ ॥
संघशासकयोरेव व्यवस्था युज्यते मिथः ।
नान्यथा निर्णयः शक्य इत्यवेदीत्स निश्चितम् ॥ ८ ॥
शासकायाखिलं वृत्तं संनिवेद्य यथास्थितम् ।
भूतानुकम्पया पूर्णो महात्माकथयद्यथा ॥ ९ ॥

केवलं भूतवात्सल्यान्न तु पक्षावलंबनात् ।
आंग्लफ्रान्सभुवोरर्थे मच्चेतः परिदूयते ॥ १० ॥
या लण्डनपुरी लोकैरनिर्भेद्या प्रतीयते ।
ध्यायतस्तद्विनाशं मे बलवत्कम्पते मनः ॥ ११ ॥
इति ब्रुवन्कृपाविष्टो विवशो व्यरमत्क्षणम् ।
अथ नेत्रद्वयं मार्जन्पुनः प्राह सगद्गदम् ॥ १२ ॥
जगद्विपत्तिमाध्यायन् परं दैवमुपालभे ।
यदनेन क्षमेणापि जनपीडा न वार्यते ॥ १३ ॥
किमहिंसाव्रतं जातं निःसत्त्वमधुना प्रभो ।
इति मे शङ्कमानस्य स्फुरत्युत्तरमात्मनः ॥ १४ ॥
नाहिंसा न च वा दैवं सत्त्वहीनं मनागपि ।
मनुष्या एव निःसत्त्वा अहिंसादैवदूषकाः ॥ १५ ॥
अथागादबटाबादपुरं गान्धिर्हिमाचलात् ।
ततः श्रीहिट्लरायैकामलेखीत्पत्रिकां यथा ॥ १६ ॥
याचितोऽपि चिरान्मित्रैः पत्रिकां तत्र लेखितुम् ।
विलम्बं कृतवानस्मि धार्ष्ट्याधिक्षेपशङ्कितः ॥ १७ ॥
तथप्यद्य विधूयान्यां सर्वामपि विचारणाम् ।
लेखोऽयं लिख्यते सोऽपि त्वया मान्योऽर्थगौरवात् ॥ १८ ॥
नास्ति कोऽपि जगत्यस्मिन् भवदन्यो नरोत्तमः ।
यो निवारयितुं शक्तः समरं विश्वघस्मरम् ॥ १९ ॥

मनोरथफलं काममभीष्टं परमं भवेत् ।
तथापि सर्वनाशेन प्राप्तुमिच्छा न युज्यते ॥ २० ॥
श्रोतुमर्हसि मे वाक्यं त्यक्तसंग्रामपद्धतेः ।
यदि तस्य न शूश्रूषा जनोऽयं क्षम्यतां त्वया ॥ २१ ॥

ततो हरिजने गान्धिरलेखीत्स्वमतं यथा ।
अहो कथं नु शार्मण्या अपि चिन्तयितुं क्षमाः ॥ २२ ॥
लण्डनादिपुरीवासं विहायान्यत्र संभ्रमात् ।
पलायनमतिक्रूरं युद्धविध्वंसशङ्किनाम् ॥ २३ ॥
न तावद्भारतस्याद्य चिन्तयामि विमोचनम् ।
स्वातन्त्र्येणापि किं तेन परपीडनसाक्षिणा ॥ २४ ॥
परितोषाय नास्माकमांग्लफ्रान्सपराजयः ।
न च शार्मण्यविध्वंसाल्लब्धो वा विजयो मुदे ॥ २५ ॥
न दैवे वर्तते श्रद्धा हिट्लरस्य बलीयसः ।
बले तु भौतिके तस्य विश्वासस्तु निरङ्कुशः ॥ २६ ॥
महत्यभूतपूर्वेऽस्मिन् घोरसंग्रामनाटके ।
भारतेनापि वोढव्यः स्वयं भागः कियानपि ॥ २७ ॥
इदं च राष्ट्रसंघेन मिलित्वा प्रमुखैः परैः ।
पार्थक्येन समष्ट्या च निश्चेतव्या विवेकतः ॥ २८ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां पाश्चात्ययुद्धारंभणो नाम त्रयस्त्रिंशोऽध्यायः ।

चतुस्त्रिंशोऽध्यायः ।

लिमडीनामनि स्थाने सौराष्ट्रावनिमण्डले ।
बलवत्पीडिता राज्ञा प्रजाः कष्टानि भेजिरे ॥ १ ॥
यः पुरा नृपतेः कश्चिन्मित्रमासीन्महाजनः ।
सोऽभवत्संप्रति द्वेष्यः प्रजानां हितचिन्तकः ॥ २ ॥
कृषीवलानयं साधुर्मृतप्रायानजीवयत् ।
जन्मसिद्धप्रजास्वाम्यस्वाधिकारादिबोधनात् ॥ ३ ॥
अतो नृपतिना शप्तः प्रजाहितकरोऽपि सः ।
निपातनाय तच्छीर्षे प्रहाराः सज्जिताः स्थिताः ॥ ४ ॥
विधूय नीतिनियमान् विपण्यां वणिजां तथा ।
आलयाश्च धनाढ्यानां नृपादेशाद्विलुण्ठिताः ॥ ५ ॥
स्वैराज्ञैव नृपस्यासीद्राजनीत्यपराभिधा ।
साभून्नृणामनुल्लंघ्या यद्यपि त्रासकारिणी ॥ ६ ॥
अतिप्रवृत्तमेतस्य निशम्य क्रूरचेतसः ।
जनतामतिसंत्रस्तां गान्धिरित्थमबोधयत् ॥ ७ ॥
ये जनाः स्थातुमिच्छन्ति स्वार्थाय नृपतेर्वशे ।
नायकैर्बोधनीयास्ते भाव्यनर्थपरंपराम् ॥ ८ ॥
बहवः किल विद्यन्ते स्वार्थरक्षैकतत्पराः ।
न तेषां यशसि प्रीतिः प्रीतिर्वित्तकणे परम् ॥ ९ ॥
स्वातन्त्र्याय चलत्कार्येष्वमी किल निरर्थकाः ।
केवलं भारभूतास्ते तिष्ठन्ति लघुचेतसः ॥ १० ॥

सर्वत्यागपरा वीराः स्वातन्त्र्याकर्षणक्षमाः ।
स्वार्थं तृणाय मन्यन्ते तैरेव विजयो ध्रुवः ॥ ११ ॥
त्यागस्यावश्यकत्वं च तद्गुणांश्चापि ये विदुः ।
न ते सर्वविनाशेऽपि दूयन्ते सत्त्वशालिनः ॥ १२ ॥
तैरेभिः साधुकार्येषु वर्तितव्यं पुराद्रुहिः ।
भाविस्वातन्त्र्यसंप्राप्तौ श्रद्दधानैः सुयोगतः ॥ १३ ॥
धिक्कृत्यारिकृतां पीडामविनाम्य शिरः स्वकम् ।
ये स्थिताः क्षमया धीरास्ते पश्यन्ति शुभं दिनम् ॥ १४ ॥
कुदेशे वित्तवान् पापी निर्धनः पुण्यभाजनम् ।
इति प्राह पुरा कश्चित्थोरोनामकतत्त्ववित् ॥ १५ ॥
सूक्तिरत्नमिदं तस्य महार्हमजरामरम् ।
स्मर्यतां त्यागवीरैस्तैः सत्यार्थस्य प्रकाशकम् ॥ १६ ॥
न यथार्था भवेयुश्चेद्वृत्तान्ताः श्रुतिमागताः ।
प्रत्याख्यातुं तदा भूपः कारणैरुपपादकैः ॥ १७ ॥
तमेनं धार्मिकं भूपं प्रार्थये प्राञ्जलिः पुनः ।
सावधानं प्रजाक्लेशाः श्रोतव्या दैवभीरुणा ॥ १८ ॥
अनिष्टं परिहर्तव्यं समाधेयाश्च ताः पुनः ।
यदान्याय्यं भवेत्तस्य निरासः क्रियतां द्रुतम् ॥ १९ ॥
अथ याते द्विसप्ताहे महात्मा प्राप पत्रिकाम् ।
पटीयालापुरादेकां प्रजापीडनशंसिनीम् ॥ २० ॥

नियमः कश्चिदन्याय्यः शासकेन प्रकल्पितः ।
हिदायदभिधो लोकस्वताखण्डनभीकरः ॥ २१ ॥
समाजः कोऽपि तत्रासीत्प्रजामण्डलनामकः ।
शासनं तद्विरुन्धानः स सत्याग्रहमाश्रयत् ॥ २२ ॥
अथ तस्माद्विरेमुस्ते श्रीगान्धेरुपदेशतः ।
कुशासनं महीशोऽपि प्रतिजज्ञे व्यपोहितुम् ॥ २३ ॥
अवधिस्तद्व्यपोहाय मासस्तेनैव कल्पितः ।
परन्तु सा प्रतिज्ञाऽभूत्स्मृतिशेषैव केवलम् ॥ २४ ॥
यतोऽसौ कारयामास नृपतिर्नवघोषणाम् ।
हिदायन्नियमोऽस्माकं मासषट्कं प्रवर्तताम् ॥ २५ ॥
श्रूयतामियमाज्ञा मे तद्विरोधेन मण्डली ।
न किंचिदपि कुर्वीत राजद्रोहो हि तद्भवेत् ॥ २६ ॥
राजधानीमिमां प्रापुः पूर्वजाः खड्गवीर्यतः ।
तामेनां परिरक्षामि खड्गस्यैव बलादहम् ॥ २७ ॥
समाजं न सहिष्येऽहं प्रजापक्षावलंबिनम् ।
प्रजामण्डलवत्कार्यं करिष्यन्तं पुरे मया ॥ २८ ॥
राष्ट्रसंघस्य कार्याणि कर्तुमिच्छति चेज्जनः ।
निर्गत्य मम संस्थानाद्यथाकामं विचेष्टताम् ॥ २९ ॥
भीषयेदांग्लसाम्राज्यं राष्ट्रसंघसभाजनः ।
न पुनर्मम संस्थाने फलिष्यति बिभीषिका ॥ ३० ॥

सांस्थानिकध्वजादन्यां पताकां नैव मर्षये ।
लसन्तीं मम सीमान्तर्यावदस्मि किल प्रभुः ॥ ३१ ॥
अलं दुश्चेष्टितैस्तस्मादन्यथा पातयाम्यहम् ।
दण्डं घोरमविस्मर्यं तदीयैर्भाविवंशजैः ॥ ३२ ॥
मत्संमतप्रजामध्याद्विपक्षं प्रति गच्छतः ।
पश्यन् कतिपयान् लोकान् पीडितोऽस्मि हृदन्तरे ॥३३॥
प्रजामण्डलसंबन्धं त्यजन्तु निखिला जनाः ।
इदं तैर्नैव विस्मर्यं यदहं क्षत्रपुङ्गवः ॥ ३४ ॥
वाग् भवेत्कुण्ठिता कामं शस्त्रं तु निशितं मम ।
सर्वमेतत्समालोच्य प्रवर्तन्तां यथोचितम् ॥ ३५ ॥
श्रुत्वैतद्भूपतेः क्रूरं तर्जनं विस्मितो मुनिः ।
लेखं हरिजने पत्रे लेखयामास तद्यथा ॥ ३६ ॥
यथार्हा यदि वार्ता स्याद्या मया श्रूयतेऽधुना ।
अनर्थजटिला सेयं भविष्यति न संशयः ॥ ३७ ॥
बलिष्ठोऽपि नृपो लोकान्नैवं तर्जितुमर्हति ।
कुर्वन्नहितमेतेषां करोत्यहितमात्मनः ॥ ३८ ॥
तर्जनैर्वशमानेतुं जनानद्य न शक्यते ।
ते तु संप्रति वर्तन्ते प्रबुद्धाः सर्वभारते ॥ ३९ ॥
निरङ्कुशप्रभुत्वस्य गतः कालो महीतलात् ।
प्रजारञ्जनतो राजा जीवेदद्य न पीडनात् ॥ ४० ॥

कर्तुं न हस्तनिक्षेपं समक्षं वा परोक्षतः ।
संस्थानव्यवहारेषु राष्ट्रसंघोऽभिकाङ्क्षति ॥ ४१ ॥
परंतु वर्तते संघः प्रजानां मार्गदर्शकः ।
तथा संधुक्षकस्तासां बलोत्साहधियामपि ॥ ४२ ॥
तस्मादन्योन्यसंसर्गः संरक्ष्यः सर्वथा द्वयोः ।
तयोर्विघटना नूनं पितापुत्रवियोजनम् ॥ ४३ ॥
आंग्लराज्ये जनो मुक्त्यै राष्ट्रसंघमवेक्षते ।
सांस्थानिकजनश्चापि तत्साह्यमधिकाङ्क्षते ॥ ४४ ॥
आशासे यन्नृपाः सर्वे विहाय विमतं निजम् ।
प्रजानां मानयिष्यन्ति यत्नं स्वातन्त्र्यलब्धये ॥ ४५ ॥
यथा प्रयतनं तासां परमाभ्युदयं भजेत् ।
वितन्वन्तु न विद्वेषं प्रजामण्डलनेतृषु ॥ ४६ ॥
राष्ट्रसंघकृतश्रद्धास्तत्साहाय्यमवाप्य ते ।
प्रजाभिः कामितार्थानां सुव्यवस्थां प्रकुर्वताम् ॥ ४७ ॥
हिदायन्नियमत्यागं प्रतिज्ञायाधिकारिभिः ।
कृतो वचनविभ्रंश इत्यत्रापि न संशयः ॥ ४८ ॥
प्रतिज्ञोल्लंघनं तावद्राज्ञामतिविडंबना ।
अतोऽहं प्रार्थये राजा स्ववचः पालयत्विति ॥ ४९ ॥
अथ कैश्चिद्दिनैः प्राप्तमुत्तरं भूपतेर्यथा ।
भवदाक्षेपयोः सार्था श्रूयतां मे समीहितिः ॥ ५० ॥

प्रेरिता राष्ट्रसंघेन जनाः केचित्पुरे मम ।
तच्चेष्टामनुकुर्वन्तः शासनातिक्रमं व्यधुः ॥ ५१ ॥
तदनिष्टपरीणामानपवारयितुं कृतम् ।
आंग्लधर्मानुकारेण ह्विदायद्धर्मशासनम् ॥ ५२ ॥
तथाप्यन्यायमाश्रित्य विपर्यासकरा अमी ।
हिन्दुमुस्लीमलोकेषु विद्वेषमुदपादयन् ॥ ५३ ॥
संजातकदने कश्चिन्निहतो विक्षताः परे ।
कृतं गत्यन्तराभावात् षण्मासस्थायिशासनम् ॥ ५४ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां पटीयालाभूपसान्त्वनो नाम चतुस्त्रिंशोऽध्यायः ।

पञ्चत्रिंशोऽध्यायः ।

साम्राट्प्रतिनिधेरग्रे गान्धिना यत्प्रपञ्चितम् ।
तदाक्षेपकरा नैके पत्राणि विलिखुर्यथा ॥ १ ॥
आग्लनाशप्रसंगेन यद्यश्रूणि विमुञ्चसे ।
किन्न शार्मण्यविध्वंसो जनयत्यश्रुमोचनम् ॥ २ ॥
आंग्लफ्रान्सभुवोरर्थे सानुकम्पोऽसि सर्वदा ।
शार्मण्यजनतां तद्वत्किमर्थं नानुकम्पसे ॥ ३ ॥
लेखकेभ्यस्तदा गान्धिर्ददौ प्रत्युत्तरं यथा ।
नास्ति मत्तोऽधिकः कश्चिदांग्लदेशविरोधकः ॥ ४ ॥

निष्क्रियत्वं च मौनं च यथावसरमिच्छतः ।
तथा कर्म वचश्चापि योग्यकालव्यपेक्षिणी ॥ ॥ ५ ॥
सत्यग्रहवचःकोशे शत्रुशब्दो न विद्यते ।
सत्याग्रहव्रती शत्रुमपि पश्यति मित्रवत् ॥ ६ ॥
कामये हितमांग्लानामहिंसाव्रतधर्मतः ।
स्वातन्त्र्यमपि नेच्छामि शार्मण्यानां तु नाशतः ॥ ७ ॥
हिट्लरः परमो मानी नानुकम्पामपेक्षते ।
शार्मण्यानां यथांग्लानां नाशः क्लेशकरो मम ॥ ८ ॥
प्रमादादप्रमादाद्वा प्रतीतिर्मे बलीयसी ।
यदसौ हिट्लरस्तावदेकः संग्रामकारणम् ॥ ९ ॥
यदि दान्झिगशार्मण्या न वाञ्छन्ति स्वतन्त्रताम् ।
तदा तद्देशमाक्रम्य दासीकुर्यात्स हिट्लरः ॥ १० ॥
पोलण्डजनपदस्यापि स्वायत्तीकरणोद्यमः ।
तस्य धर्म्यः कचिद्भायात्स्वदेशोदयसंभ्रमे ॥ ११ ॥
तन्मनोरथसंसिद्धिर्बलमाख्याति पाशवम् ।
मानुषे व्यवहारेऽपि नितान्तबलवत्तमम् ॥ १२ ॥
निदर्शनमिदं साक्षान्नररूपं भजन्नपि ।
न जनः पाशवीं वृत्तिं चेतसा परिहास्यति ॥ १३ ॥
आंग्लफ्रेन्चजनक्लेशान् प्रति या दर्शिता घृणा ।
आकस्मिकविकारोत्था क्षणजन्या न साभवत् ॥ १४ ॥

शतार्धवत्सरैश्चीर्णव्रतेन हृदि पोषितात् ।
अहिंसास्रोतसोऽक्षय्यात्सेयमासीत्समुद्गता ॥ १५ ॥

अथ प्रवर्तमानेऽस्मिन्महायुद्धे भयङ्करे ।
महात्मा पत्रिकामेकां प्राप पोलण्डदेशतः ॥ १६ ॥
लेखकोऽस्य महावीरस्तद्राष्ट्राधिपतिः सुधीः ।
संगीतविदुषां श्रेष्ठः पाद्रुस्कीनामतः श्रुतः ॥ १७ ॥
देशभक्त्यैव संत्यज्य सर्वस्वं नरपुङ्गवः ।
जन्मभूमेर्विनाशेन व्यथितो व्यलिखद्यथा ॥ १८ ॥
दास्यबन्धनमुत्पाट्य स्वातन्त्र्यमभिरक्षितुम् ।
मदीया जन्मभूरास्ते प्रयस्यन्ती दिवानिशम् ॥ १९ ॥
धर्मे प्रमाणभूतोऽसि निःशेषजगतीतले ।
अतो हि प्राहिणोमि त्वां वर्णदूतमिमं मम ॥ २० ॥
जन्मभूमिः किलास्माकमनुकम्पामपेक्षते ।
प्रीतिं च भारतीयानां महात्मन् घोरसङ्करे ॥ २१ ॥
जन्मभूरस्मदीया हि प्रशान्तेर्धाम वर्तते ।
सहस्राब्दाधिकात्कालान्नीतिमार्गादविच्युता ॥ २२ ॥
प्रत्यहं युधि हन्यन्ते कोटिशो मम देशजाः ।
प्रमदाश्चार्भकाश्चापि दोषलेशविवर्जिताः ॥ २३ ॥
अस्मिन् घोरतमे काले दयासान्त्ववचस्तव ।
प्रत्येकं मम देश्यानां हृदयं सुखयिष्यति ॥ २४ ॥

गान्धिरुवाच ।

कृते त्वद्देशबन्धूनां मम द्रवति मानसम् ।
जाने स्वातन्त्र्यकामास्ते श्राम्यन्ति विषमे रणे ॥ २५ ॥
दूये न तादृशी शक्तिर्वचने मम विद्यते ।
निग्रहाय प्रमत्तानां युद्धपीडाविनोदिनाम् ॥ २६ ॥
स्वातन्त्र्यनाशमापन्नो मम देशोऽपि युध्यते ।
विमोचयितुमात्मानं दृप्तसाम्राज्यबन्धनात् ॥ २७ ॥
पुनः स्वातन्त्र्यलाभाय स्वीकृता तेन पद्धतिः ।
अहिंसाया अपूर्वेव नैव दृष्टचरा भुवि ॥ २८ ॥
किञ्चित्सिद्धिकरं दृष्टमिदं परमसाधनम् ।
दूरे तु वर्ततेऽद्यापि मनोरथफलागमः ॥ २९ ॥
वीरपोलण्डलोकानां श्रेयसे परमेश्वरम् ।
प्रार्थये तद्विपज्जालं शीघ्रमेव व्यपोहतु ॥ ३० ॥
धर्मो हि तैः श्रितः पक्षस्तद्देषां विजयो ध्रुवः ।
धर्मस्य हि समुद्धर्ता सर्वदा जगदीश्वरः ॥ ३१ ॥

इति सौ. क्षमायाः कृतिपूत्तरसत्याग्रहगीतायां पोलण्डनायकसान्त्वनो नाम पञ्चत्रिंशोऽध्यायः ।

षट्त्रिंशोऽध्यायः ।

अथ भाद्रपदे राष्ट्रकार्यकारकमण्डलम् ।
पाश्चात्यसमरोदन्तविमर्शमुपचक्रमे ॥ १ ॥

राजनीतिः किलांग्लानां संघस्यासीदसंमता ।
अतोऽयमादिशत्सभ्यान्निर्गन्तुं न्यायमण्डलात् ॥ २ ॥

तत्र हेतुकलापोऽयं विस्तरेणाभिधीयते ।
साम्राज्यशासकैरस्मत्संमतिग्रहणं विना ॥ ३ ॥

भारतीयमिदं राष्ट्रं युद्धभूरित्युदीरितम् ।
निग्रहाय प्रजानां च निर्मितं क्रूरशासनम् ॥ ४ ॥

अधर्म्यैनियमैर्लोकप्रवृत्तिर्निर्बलीकृता ।
कुण्ठितं नियमैरन्यैर्बलं प्रान्तिकमन्त्रिणाम् ॥ ५ ॥

कृतमेतज्जनानुज्ञां विनैवांग्लप्रशासकैः ।
मतं धिकृत्य लोकानां संग्रामनिरपेक्षिणाम् ॥ ६ ॥

निरंकुशप्रभुत्वं च शार्मण्येतालिदेशयोः ।
तथा युद्धप्रशंसा च मानवोत्साहमर्दनम् ॥ ७ ॥

एतानि गर्हणीयानि सर्वकालेषु सर्वथा ।
प्रतिषिद्धा निवर्तन्ते राष्ट्रसंघेन साग्रहम् ॥ ८ ॥

अतः शार्मण्यदेशेन पोलण्डावन्यतिक्रमम् ।
अतिनिन्दति संघोऽयं दयते तद्विरोधिनः ॥ ९ ॥

समराय प्रवृत्तिर्वा निवृत्तिर्वा रणादपि ।
भारतेनैव निश्चेया न विदेशाधिकारिभिः ॥ १० ॥
तथा तन्निर्णयानां च बलादस्मासु योजना ।
स्वेच्छयार्थव्ययश्चापि भारतीयैर्विरुध्यते ॥ ११ ॥
सहकारं यदीच्छेयुर्युद्धेऽस्मिन्नधिकारिणः ।
न बलात्खलु लभ्योऽयं लभ्योऽयं सौमनस्यतः ॥ १२ ॥
सहोद्योगस्तु संभाव्यः समयोरेव पक्षयोः ।
मिथः संमतिपूर्वश्चेत्स्वीकृतोचितकर्मसु ॥ १३ ॥
विषह्य विषमक्लेशान् चिरं स्वातन्त्र्यलिप्सया ।
मुक्तहस्तैः कृतस्त्यागो भारतीयैः प्रमोदतः ॥ १४ ॥
लोकप्रयोजनायेति समरोऽयं प्रवर्तितः ।
कथं लोकाः स्वताभंगे भवेयुस्तत्सहायिनः ॥ १५ ॥
आंग्लाः किल पुरा प्राहुः प्रजास्वातन्त्र्यलब्धये ।
परैश्चाक्रमणं रोद्धुमस्माभिरिह युज्यते ॥ १६ ॥
पुरा पूर्वमहायुद्धप्रशान्त्यै यो हठात्कृतः ।
व्हेर्सायनगरे सन्धिः स बभूव निरर्थकः ॥ १७ ॥
तत्सन्धिनियमा भग्नाः संधिकर्तृभिरेव हि ।
तस्य चेदं फलं दृष्टं विश्वव्यापी महारणः ॥ १८ ॥
पुरा मञ्चूरीयादेशे जापानैः समभिद्रुते ।
आंग्ला उपेक्षया तस्थुर्द्विषामप्रतिरोधकाः ॥ १९ ॥

यदा प्रागितलीराज्यमबेसेनीभुवेऽद्रुहत् ।
तदांग्ला द्रोहिणां पक्षमंगीकृत्य मुदा स्थिताः ॥ २० ॥
यदि पाश्चात्यदेशीया इच्छेयुः परिरक्षितुम् ।
साम्राज्यप्राभवोत्कर्षं भारतं तद्विगर्हते ॥ २१ ॥
प्रजाधिपत्यरक्षायै यदि युद्धं प्रवर्तितम् ।
भारताय जनस्वाम्यं स्वतः सिद्धं भविष्यति ॥ २२ ॥
यतस्तदा विधेयानि स्वयं निर्णीय भारतम् ।
क्षमते राज्यसूत्राणि प्रचालयितुमञ्जसा ॥ २३ ॥
स्वतन्त्रभारतं पश्चाल्लोकाभ्युदयसिद्धये ।
स्वतन्त्रैरितरै राष्ट्रैः सहकारि भविष्यति ॥ २४ ॥
युद्धान्ते हि जगत्सर्वं परिवर्तनमेष्यति ।
परिणामः शुभाय स्यात्को जानात्यशुभाय वा ॥ २५ ॥
उभयोः पक्षयोर्मध्ये तदैव समता भवेत् ।
स्वार्थाय परराज्यानामाक्रान्तिस्त्यज्यते यदा ॥ २६ ॥
साम्राज्यप्रभुताकेन्द्रस्थानमेतद्धि भारतम् ।
विमुक्ते भारते तस्माज्जगन्मुक्तं भविष्यति ॥ २७ ॥
बहुसारो ह्ययं देशो विदेशोपकृतिक्षमः ।
जगन्नूत्नव्यवस्थायामग्रगामी भविष्यति ॥ २८ ॥
जनाङ्गे बन्धनान्मुक्ते शक्यमेतन्न चान्यथा ।
स्वातन्त्र्यमपरिच्छेद्यं विश्वभोज्यं हि वर्तते ॥ २९ ॥

रक्षितुं प्रतियत्नो हि दृप्तसाम्राज्यशासनम् ।
अनर्थानधिकान् भूयो जनयिष्यति भूतले ॥ ३० ॥
अथ पाश्चात्यदेशानां स्वातन्त्र्यमभिरक्षितुम ।
भारतीयैर्नृपैर्द्रव्यजनसाह्यं समर्प्यते ॥ ३१ ॥
तदेषां प्रथमो धर्मः प्रजास्वाम्याभिरक्षणम् ।
स्वस्वराज्येषु यत्राद्य व्यवहारो निरङ्कुशः ॥ ३२ ॥
तदादौ स्पष्टमाख्येयं युद्धकामैः प्रशासकैः ।
युद्धेन साधनीयोऽर्थः कश्च कश्चेति निश्चितः ॥ ३३ ॥
दृप्तचक्राधिपत्यस्य निवृत्तिर्यदि घोष्यते ।
तदा तदाखिलं विश्वमभिनंदिष्यति ध्रुवम् ॥ ३४ ॥
चीनस्पेनाबिसीनीयादेशेष्ववाग् रणानलः ।
नरप्राणाहुतिं प्राप्य ज्वलत्यद्यापि घस्मरः ॥ ३५ ॥
स्त्रीपुमर्भकवृन्दानामसंख्यानां निरागसाम् ।
कृतं निबर्हणं व्योम्नः शतघ्नीनां प्रयोगतः ॥ ३६ ॥
नगरं निर्गतानीकं समुद्घुष्य सुरक्षितम् ।
अतिमात्रं किलाधर्म्यं गगनात्संप्रमाथनम् ॥ ३७ ॥
एषा भयङ्करी वृत्तिः संवर्धयति हिंसनम् ।
या जगत्सर्वमाक्रम्य तमिस्रेव निगूहते ॥ ३८ ॥
साम्राज्यप्रभुतादर्पविषद्रुः क्लेशकारणम् ।
सोऽयं समूलमुत्पाट्यो नान्यथा भुवि शान्तता ॥ ३९ ॥

शार्मण्यैरुत जापानैरितरैर्वा जनैर्भुवि ।
मिथः कलहलेशोऽपि भारतस्य न विद्यते ॥ ४० ॥
सा किल द्विष्यतेऽस्मामी राज्यशासनपद्धतिः ।
ग्रसते या प्रजासत्तां त्रासहिंसावलम्बिनी ॥ ४१ ॥
यदा सम्राट्प्रतिष्ठाया निवृत्तिरुपलभ्यते ।
तदैव राष्ट्रसंघोऽयं सहयोगी भविष्यति ॥ ४२ ॥
सार्वत्रिकजनस्वाम्यविजयं कामयामहे ।
एकस्य न तु देशस्य जयं देशान्तरोपरि ॥ ४३ ॥
अतः प्रार्थयते सर्वान् राष्ट्रसंघः समादरात् ।
अन्तरो विग्रहस्तावत्सर्वथा परिवर्ज्यताम् ॥ ४४ ॥
मिलित्वा चैकचित्तेन सर्वैः शान्त्या प्रवर्त्यताम् ।
अखण्डभारतस्यापि स्वातन्त्र्यमधिगम्यताम् ॥ ४५ ॥

इति सौ. क्षमायाः कृतिपूत्तरसत्याग्रहगीतायां लक्ष्योत्तेजनो नाम षट्त्रिंशोऽध्यायः ।

सप्तत्रिंशोऽध्यायः ।

*बिन्दुवेदग्रहेन्द्वङ्कसंमिताब्दसमुद्भवाः ।
संक्षेपाद्वर्णयिष्यन्ते वृत्तान्ता बहुविस्तराः ॥ १ ॥
अथ गच्छत्सु मासेषु वर्धमानेऽपि संगरे ।
आंग्लानां कुटिलोन्मत्ता प्रवृत्तिर्नान्यथाभवत् ॥ २ ॥

---

* Year 1940.

यद्यदासुं रणारंभे राष्ट्रसंघेन याचितम् ।
शासकस्तद्ददादीति प्रत्याशा विलयं गता ॥ ३ ॥

यत्सम्राड्प्रभुतादर्पो न शैथिल्यमुपागतः ।
इत्यत्र संप्रवृत्तानि वस्तून्येव निदर्शनम् ॥ ४ ॥

शुल्कोपसंग्रहे यावानासीत्प्रान्तिकमन्त्रिणाम् ।
अधिकारः स संकोचं गमितो नवनिर्णयैः ॥ ५ ॥

राजप्रतिनिधेर्गान्धिं संनिधिं गन्तुमुद्यतम् ।
इच्छन् वारयितुं कश्चित्पत्रिकामलिखद्यथा ॥ ६ ॥

शासितुर्न मनोवृत्तेर्दृश्यते परिवर्तनम् ।
अथ प्रतिनिधेः पार्श्वे भवता गम्यते कुतः ॥ ७ ॥

संधिवार्ता हि सर्वत्र श्रूयते कारणं विना ।
निष्फला निर्जलाम्भोदगर्जने वातपागमे ॥ ८ ॥

न जातु विग्रहः काम्यस्तथाप्यस्य निवारणम् ।
न सदा शक्यते कर्तुं भयोत्पादविशङ्कया ॥ ९ ॥

अतो विचिन्त्यमेतावन्मानरक्षा कथं भवेत् ।
अपमानकरी वार्ता सर्वतः श्रूयते सदा ॥ १० ॥

विदेशे भारतेऽप्यत्र मन्यते निखिलो जनः ।
यद्वयं स्वीकरिष्यामो शासकैर्यन्नियम्यते ॥ ११ ॥

ईदृशी विवशा वृत्तिर्निहन्त्यस्मन्मनोबलम् ।
मानिनां हि क्षमाहेतुर्बलादन्यवशंगमः ॥ १२ ॥

प्रत्युवाच महात्मैनं वृत्तपत्रे यथामतम् ।
सत्यमाह भवान् किन्तु स्वधियां नातिविश्वसेत् ॥ १३ ॥
इदं तावन्न विस्मर्यं बलवान्निर्बलो भवेत् ।
बुद्धिमानपि मन्दात्मा भवेत्कालविपर्ययात् ॥ १४ ॥
राजप्रतिनिधेः स्थाने गमनं नानुशोच्यते ।
संलापस्तेन मे शक्तिमतिमात्रमवर्धयत् ॥ १५ ॥
यावदेतमृजुं मन्ये तावदेष्यामि तं मुहुः ।
निवर्तिष्ये च तत्पार्श्वात्संधुक्षितमनोबलः ॥ १६ ॥
फलाशासिद्धिलेशेऽपि निराशो न भवेन्नरः ।
सौमनस्यं विपक्षेषु जनयेच्च स्वकर्मभिः ॥ १७ ॥
तथा सत्याग्रही शत्रोर्हृदयं परिवर्तयेत् ।
यथापमानितस्तेन न स्यान्न च पराजितः ॥ १८ ॥
स्मट्ससेनापतेः पूर्वमनुगेषु गतागतम् ।
प्रत्याशालवहीनोऽपि साग्रहं कृतवानहम् ॥ १९ ॥
इत्थमेव हि कर्तव्यं सत्याग्रहपरैर्जनैः ।
न त्रपा सिद्धिकामानां परद्वारोपसर्पणे ॥ २० ॥
न धर्माद्विच्युतिः कार्या कैरपि स्वानुयायिभिः ।
रक्षेत्तैर्नित्यसंसर्गं कथालापैश्च नायकः ॥ २१ ॥
आंग्लभूमेर्बहिश्चान्तर्जनितोऽपि दुराग्रहः ।
न क्षोभाय यतः शीघ्रं सत्यस्याग्रे स नश्यति ॥ २२ ॥

चलत्यथ महायुद्धे गान्धिर्हरिजनेऽलिखत् ।
आंग्लनीतिं समुद्दिश्य लेखं बोधकरं यथा ॥ २३ ॥

अत्र भारतसाम्राज्यं शनैरांग्ला विनिर्ममुः ।
विद्यन्ते तस्य चत्वारो मूलस्तम्भा विधारकाः ॥ २४ ॥

स्वलाभः प्रथमस्तेषां द्वितीयः सैन्यसंग्रहः ।
तृतीयो नृपतिव्यूहश्चतुर्थो द्वैधसंविधिः ॥ २५ ॥

प्रामाणिका विदुः स्पष्टं विना स्तम्भविपाटनम् ।
सुप्रतिष्ठितसाम्राज्यं न त्यजन्ति प्रशासकाः ॥ २६ ॥

स्वातन्त्र्याधिगमात्पूर्वमिदं स्तम्भचतुष्टयम् ।
भारतीयैः समुत्पाट्यमिहांग्लाः प्रवदन्त्यमी ॥ २७ ॥

तदुत्पाटनकामास्तु भारतीयाः प्रचक्षते ।
स्वार्थहेतोरमी स्तम्भा युष्माभिरधिरोपिताः ॥ २८ ॥

तथा हि स्वात्मरक्षायै बृहत्सैन्यं निवेशितम् ।
युष्माभिरेव राजानः कृताश्चाप्यन्यथा कृताः ॥ २९ ॥

अभुक्तपूर्वसंपत्त्या भूयस्या च प्रतिष्ठया ।
केचित्सांस्थानिका भूपा युष्माभिः किल योजिताः ॥ ३० ॥

इत्थं भारतभूरेषा विभक्ता खण्डशः कृता ।
अतः सा किल नष्टैक्या विरोद्धुं न क्षमाऽस्ति वः ॥ ३१ ॥

अतिभेदाग्रहं दृष्ट्वा जनदौर्बल्यकारणम् ।
कृतं तदपि युष्माभिर्हन्त स्वार्थोपकारकम् ॥ ३२ ॥

शस्त्रापहरणादस्मत्पुंस्त्वमप्यपहारितम् ।
अहार्यमस्ति नस्तस्मादेकं सत्याग्रहायुधम् ॥ ३३ ॥
गतार्थं प्रति वो निन्दां न कुर्मः सत्त्वशालिनः ।
युष्माकमभिनंदामः शौर्यधैर्यमुखान् गुणान् ॥ ३४ ॥
प्रदातुं प्रतिपन्नाश्चेद्भारताय स्वतन्त्रताम् ।
अपनेयाः स्वयं तस्याः प्रतिबंधाः स्वकल्पिताः ॥ ३५ ॥
यदि स्याद्दुष्करं तत्र करिष्यामः सहायताम् ।
श्रद्धेया न्यायबुद्धिर्नः स्वबाहोर्न बलं पुनः ॥ ३६ ॥
झेटूण्डस्तत्रभवानार्यो राष्ट्रपक्ष्यान् किलाब्रवीत् ।
यच्चास्ति जितमस्माभिस्तन्न मुञ्चामहे वयम् ॥ ३७ ॥
यादृङ्मन्यामहे योग्यां तादृशीं वः स्वतन्त्रताम् ।
स्वेच्छया वितरिष्यामः कालानुक्रमतो वयम् ॥ ३८ ॥
साम्राज्यरक्षणायैव प्रवृत्ताः समरे वयम् ।
अतो नः समयान् बुद्ध्वा साहाय्यं कर्तुमर्हथ ॥ ३९ ॥
दीयते यदि साहाय्यं हिताय स्याद् द्वयोरपि ।
साहायकं विनाप्येतत्कार्यसिद्ध्यै क्षमामहे ॥ ४० ॥
दृष्टप्रयोजना ह्यांग्लराज्यस्य बहवो जनाः ।
सन्ति साहाय्यकर्तारस्ततः सिद्धो रणे जयः ॥ ४१ ॥
सदा वयं सुधीराः स्मो जनसत्ताभिरक्षणे ।
वयं यदि निरातङ्का निरातङ्कोऽनुगो जनः ॥ ४२ ॥

भारतं चेदमस्माभिः सुयोगेनाभिरक्षितम् ।
जनस्वातन्त्र्यदीक्षायां क्रमेणैव प्रवेश्यते ॥ ४३ ॥
एतदस्य समाख्यानमांग्लनीतिं वदेद्यदि ।
तदैव समरारम्भो मन्तव्यो भारतोपरि ॥ ४४ ॥
स्थिरीकरोति तस्योक्तिर्मूलस्तम्भचतुष्टयम् ।
निश्चलेऽवस्थिते स्तम्भे स्वातन्त्र्यस्य कुतः कथा ॥ ४५ ॥
यदीच्छन्ति दृढीकर्तुमस्माकं दास्यशृङ्खलाम् ।
कदापि विजयं तेषां नाहमिच्छामि सर्वथा ॥ ४६ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां मूलस्तम्भचतुष्टयो नाम सप्तत्रिंशोऽध्यायः ।

अष्टत्रिंशोऽध्यायः ।

कालेऽथ तदनुप्राप्ते गत्वा शान्तिनिकेतनम् ।
तदीयस्थितिमुद्दिश्य व्यलेखीत्स्वमतं मुनिः ॥ १ ॥
चिरात्पुण्यमिदं क्षेत्रमुपगन्तुमभीच्छतः ।
अद्य मे पूरितः कामः शान्तिधामावलोकनात् ॥ २ ॥
श्रीमान् रवीन्द्रनाथोऽत्र गुरुदेव इति श्रुतः ।
प्रवया अपि तारुण्यस्फुरन्मूर्तिर्विभासते ॥ ३ ॥
यावद्धारयति प्राणान् गुरुदेवः सुहृन्मणिः ।
तावदुन्नतिमाधत्ते तस्य शान्तिनिकेतनम् ॥ ४ ॥

अमुष्मिन् पूज्यताभावो निःशेषगृहवासिनाम् ।
हार्दिकस्तात्त्विकश्चासीदिति प्रमुदितोऽभवम् ॥ ५ ॥
गुरुदेव इति ख्यातिः शिष्यवर्गेण कल्पिता ।
गुणज्ञेन कृतज्ञेन सान्वर्थैवाऽऽभवत्कवौ ॥ ६ ॥
यद्विश्वभारतीनाम्ना विद्यापीठं विनिर्मितम् ।
तदेवास्य कवीन्द्रस्य प्राणास्तारुण्यदायिनः ॥ ७ ॥

कर्तुं शासनविच्छेदं व्यवस्यति कदा भवान् ।
इति संपृच्छकान् बन्धून्निजगाद महामतिः ॥ ८ ॥
न्यायभंगसमारम्भे प्रवृत्ता ये पुराभवन् ।
विलंबनिःसहाः सर्वे भवन्त्येते न संशयः ॥ ९ ॥
अयमुत्साहहेतुर्मे यदसंख्याः क्रियापराः ।
स्वार्थमुत्सृज्य वर्तन्ते स्वातन्त्र्यमधिकांक्षिणः ॥ १० ॥
प्रकृतिर्यद्यपि श्लाघ्या तेषामुत्साहवर्धिनी ।
तथाप्यसहनैरेतैर्न भाव्यमिति मे मतिः ॥ ११ ॥
निर्णये राष्ट्रसंघस्य न काप्यस्ति प्रचोदना ।
सद्यः शासनभंगाय विगणय्य परिस्थितिम् ॥ १२ ॥
संघान्तः परिदृश्यन्ते सभ्यानामविधेयता ।
स्वैरप्रवृत्तिशीलं च हिंसाकलुषितं मनः ॥ १३ ॥
सत्यैवं बहुलानर्थकारणं भविता ध्रुवम् ।
न्यायभंगोद्यमस्तावदात्मनाशाय कल्पते ॥ १४ ॥

अविमृश्य मदुक्तं चेत्प्रवर्तन्ते यथेच्छया ।
तदा निपतनं तेषां भविष्यति न संशयः ॥ १५ ॥
नाहिंसाशीलता संघे न च यावद्विधेयता ।
न तावन्न्यायविच्छेदसमारंभं करोम्यहम् ॥ १६ ॥
तन्तुक्रियां तथा खादीविक्रयं प्रति सांघिकाः ।
दधते नैव विश्वासमुदासीना भवन्ति च ॥ १७ ॥
अतः स्वातन्त्र्ययुद्धेऽस्मिन्नीदृशां सहयोगतः ।
जायते कार्यवैफल्यमनर्थशतसंकुलम् ॥ १८ ॥
अहिंसाशालिनः शिक्षापटवश्चानुयायिनः ।
सर्वथा न भवेयुश्चेत्त्याज्या मे नेतृता तदा ॥ १९ ॥
प्रमत्ताः किल मन्तव्याः सव्यपक्षावलंबिनः ।
मन्यन्ते यदि मां न्यायभंक्तारं प्रेरणावशात् ॥ २० ॥
सव्यापसव्यपक्षीयाः समाः सामाजिका मम ।
मतभेदेऽपि मित्राणि ममैते सहकारिणः ॥ २१ ॥
भारतं सकलं मत्तो विमतस्थं भवेदपि ।
करिष्ये युद्धमेकाकी ज्ञायतां मम निश्चयः ॥ २२ ॥
अहिंसाव्यतिरिक्तानां शस्त्राणामवलंबिनः ।
प्रायः सन्ति जनाः केचिदहं त्वेकावलंबनः ॥ २३ ॥
अतः प्रवर्तकः सोऽहमहिंसापथवर्तिनाम् ।
आन्तरप्रेरणां प्राप्य न्यायभंगं करोम्यहम् ॥ २४ ॥

यदग्रे भावि तत्पूर्वं न मे स्फुरति चेतसि ।
इदमेवास्त्यहिंसाया रहस्यं हि विलक्षणम् ॥ २५ ॥
आन्तरप्रेरणास्फूर्तिः स्वकाले स्वयमेष्यति ।
दिव्यादेश इति ख्यातिं नार्हत्येषावबोधना ॥ २६ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां शांतिनिकेतनागमो नामाष्टत्रिंशोऽध्यायः ।

नवत्रिंशोऽध्यायः ।

अथ पुण्यपुरे संघकार्यसंसदगोष्ठत ।
महायुद्धं समुद्दिश्य विधातुं निर्णयान् यथा ॥ १ ॥
स्वप्रभुत्वस्थिरीकारमिच्छन्तो भारतादिषु ।
आंग्लप्रशासका युद्धसमारम्भमघोषयन् ॥ २ ॥
भारतीयानपृष्ट्वापि युद्धारम्भप्रघोषणा ।
आंग्लैर्यांच कृता स्वैरं सास्मद्देशविमानना ॥ ३ ॥
अमी किल स्वतां राज्यविस्तारमभिकाङ्क्षिणः ।
भारतैश्वर्यहर्तारः स्वार्थमात्राभिचिन्तकाः ॥ ४ ॥
अत एव परोक्षं वा समक्षं वा सहायताम् ।
कर्तुं नोत्सहते राष्ट्रसंघोऽयं सांपरायिकीम् ॥ ५ ॥
अस्मत्साहाय्यमासाद्य हरन्तो राष्ट्रसम्पदः ।
रूढमूला भविष्यन्ति भारते प्रभविष्णवः ॥ ६ ॥

आंग्लदेशाय संग्रामं कर्तुमास्माकदेशतः ।
प्रेषणं वसुवस्तूनां योधानां च न युज्यते ॥ ७ ॥
राष्ट्रसंघो विदेशस्य स्वातन्त्र्यमभिरक्षितुम् ।
नेच्छति स्वजनध्वंसात्स्वयं परवशे स्थितः ॥ ८ ॥
पूर्णस्वराज्यतोऽल्पीयः स्वीकरोति न भारतम् ।
सालंबनस्वराज्यत्वं गौरवाय न कल्पते ॥ ९ ॥
स्वयं शक्ता हि वर्तन्ते भारतीया विमर्शने ।
निजराष्ट्रप्रमेयाणामन्यदेशनिबन्धिनाम् ॥ १० ॥
सांस्थानिकमहीशानामधिकारो न विद्यते ।
स्वातन्त्र्यं प्रतिबन्द्धुं नः सम्राडाश्रयदर्पतः ॥ ११ ॥
राष्ट्रस्य सार्वभौमत्वं जनतामवलम्बते ।
संस्थाने राजसत्ता च जनतावशवर्तिनी ॥ १२ ॥
स्वातन्त्र्यलाभतः पश्चाद्विरोधाभावसंभवे ।
मिथो विदेशसंबन्धं रक्षिताः स्मो वयं मुदा ॥ १३ ॥
त्यक्तं प्रान्तिकराज्येषु सहसा मन्त्रिभिः पदम् ।
युद्धप्रसंगिनां संगात्पृथग् भूत्वा प्रवर्तितुम् ॥ १४ ॥
एवं हि राष्ट्रसंघेन दास्यबंधाद्विमुक्तये ।
निर्णयं सुदृढीकर्तुं सर्वतो यत्न आदधे ॥ १५ ॥
इदं कार्यक्रमे पूर्वं मन्त्रिस्थानविसर्जनम् ।
द्वितीयं पदमस्माकं काले शासनभंजनम् ॥ १६ ॥

भिन्नवर्गेस्तथा भिन्नसमाजाश्चैकभावतः ।
कार्येऽस्मिन् संप्रवर्तेरन्नित्याशा राष्ट्रसंसदः ॥ १७ ॥
स्वार्थत्यागगुणोद्बोधो जनताया हृदन्तरे ।
मुख्यं शासनभंगस्य वर्तते हि प्रयोजनम् ॥ १८ ॥
राष्ट्रसंघेन संत्यक्तं मुहुः संधानचिन्तनम् ।
इति वैदेशिकाक्षेपं श्रीमान्गान्धिरपानुदत् ॥ १९ ॥
न राष्ट्रसभया संधेर्विहितं द्वारबन्धनम् ।
झेटूण्डार्येण तद् द्वारं पिहितं स्वैरवृत्तिना ॥ २० ॥
विदेशीयैः समाक्रम्य परतन्त्रीकृता क्षितिः ।
कथं प्रभवनैः साकमुपैतु सहयोगिता ॥ २१ ॥
इयं राष्ट्रसभा तावद्विश्रान्तिं नाधिगच्छति ।
आंग्लभूरिव यावन्नः स्वतन्त्रं भारतं भवेत् ॥ २२ ॥
अहिंसामेव नीतिं चेदनुवर्तेत भारतम् ।
तत्स्वातन्त्र्यं भवेदांग्लभूमेरप्यधिकं ध्रुवम् ॥ २३ ॥
अनेकशः किलांग्लास्ते प्राप्य स्वातन्त्र्यसंशयम् ।
नौकाबलप्रभावेण स्वातन्त्र्यमुपलेभिरे ॥ २४ ॥
अतः स्वातन्त्र्यलाभाय कदनं यदि जायते ।
अहिंसाशस्त्रवीर्येण शिक्षितैः कारयिष्यते ॥ २५ ॥
देशोऽयमस्तु सौराज्यमथवा बन्धनालयः ।
आंग्ल एवात्र निर्णेता न तु राष्ट्रसभाजनः ॥ २६ ॥

काङ्क्षन्ति बहवो वीराः कारायामपि जीवितुम् ।
देशदास्यं न ते द्रष्टुं सहन्ते विवशाः पुनः ॥ २७ ॥
अथ वत्सरमारभ्य चैत्रे सप्तदिनावधिः ।
चलति स्म महोत्साहात्सर्वराष्ट्रमहोत्सहः ॥ २८ ॥
न्यायभंगसमारम्भज्ञापकोऽयमिति प्रजाः ।
जानत्यो विविधैश्चक्रुर्नियमैः सांगवर्तिभिः ॥ २९ ॥
अहिंसाजीवितः सर्वः कलापः कर्मणामिति ।
लंघनैः प्रार्थनाभिश्च निनाय दिवसं जनः ॥ ३० ॥
मुस्लीमा हिन्दवश्चापि परस्परमुपाचरन् ।
एकसोदर्यभावेन नेदृग् दृष्टचरं किल ॥ ३१ ॥
स्वदेशस्यैव वस्तूनामुपयोगं विदध्महे ।
इति चक्रुः स्थिरां लोकाः प्रतिज्ञां च सहस्रशः ॥ ३२ ॥
स्मरन्ति स्म जनाश्चैत्रे पुरा भूरिभयङ्करः ।
प्रमाथो जलियन्वालानगरेऽभूदिति स्फुटम् ॥ ३३ ॥
तदा हि रक्तवाहिन्यः प्रसस्रुरतिभीषणाः ।
हिन्दुमुस्लिमसिक्खानां निहतानां निरागसाम् ॥ ३४ ॥
आत्मसंशुद्धिलाभाय सप्ताहोऽयमनुष्ठितः ।
ग्रामनिर्मितवस्तूनां महाविक्रयकारकः ॥ ३५ ॥

इति सौ. क्षमायाः कृतिभूतरसत्याग्रहगीतायां महायुद्धनिराकरणो नाम नवत्रिंशोऽध्यायः ।

चत्वारिंशोऽध्यायः ।

परितः सन्निविष्टानां ग्रामाणां केन्द्रवर्तिनि ।
सभा रामगढग्रामे वार्षिकी मिलिताऽभवत् ॥ १ ॥

ग्रामोद्यमसमुत्पन्नरम्यसद्वस्तुसंग्रहः ।
लोकबोधकरस्तत्र विस्तृतः संवृतस्थितः ॥ २ ॥

महात्मा यावदुद्घाट्य प्रदर्शयितुमिच्छति ।
तावद्वर्णाम्बुसंघातैः प्लावितं पृथिवीतलम् ॥ ३ ॥

जलं प्रदर्शनस्थाने जानुदघ्नमवस्थितम् ।
शिल्पिनां च चिराभ्यस्तो वृथा जातः परिश्रमः ॥ ४ ॥

भग्नाशा अपि वैकल्यमपहाय पुनर्व्यधुः ।
पूर्वतोऽपि विशेषेण संविधानं मनोरमम् ॥ ५ ॥

अस्य प्रदर्शनारम्भं गान्धौ कर्तुमुपस्थिते ।
प्रेक्षन्ते स्म सहस्राणि जनानां परमादरात् ॥ ६ ॥

दिनपञ्चकपर्यन्तं निरभ्रमभवन्नभः ।
सभारम्भे पुनर्ग्रामो मेघैरेकार्णवीकृतः ॥ ७ ॥

अहो अशुभता वृष्टेरिति कैश्चिदुदीरितम् ।
नेति प्रतिध्वनिश्चागादशुभोऽग्निस्तु घस्मरः ॥ ८ ॥

नूनं दैवविलासेन सान्त्वनं लभते नरः ।
प्रातिकूल्यं च भूतानां कल्पते हि सुखाय नः ॥ ९ ॥

सभाध्यक्षपदाध्यासी श्रीमौलानामहोदयः ।
राष्ट्रसंघसभाकार्यमारब्धुं सज्जितः स्थितः ॥ १० ॥
तस्य निश्चयमालोक्य नेरूप्रमुखनायकाः ।
आरम्भमन्वमोदन्त वृष्टिपाते महत्यपि ॥ ११ ॥
एकलक्षाधिको मेलो दीनानां धनिनामपि ।
तत्रासीद्धृतखादीनां तथाऽमूल्यसुवाससाम् ॥ १२ ॥
धारासारनिपातेऽपि क्षणं तूष्णीमवस्थिताः ।
उपवेशास्तैर्वृष्टेर्वारणाय प्रयेतिरे ॥ १३ ॥
जानुदघ्नमथालोक्य केचिद्वर्षोदकं जनाः ।
कथंचिज्जलमुत्तीर्य शिबिरं प्रापुरञ्जसा ॥ १४ ॥
काले चापरिहार्येऽस्मिन् वर्षार्द्रान् वनितार्भकान् ।
कौसुम्भवस्त्रधारिण्यः सेविका व्यपनिन्यिरे ॥ १५ ॥
स्खलन्तश्च पतन्तश्च स्थविराः शिशवस्तथा ।
स्वयंसेवकवृन्देन स्कन्धमारोप्य वाहिताः ॥ १६ ॥
नेरुराजेन्द्रमौलानाः पर्जन्याम्बुनिराकुलाः ।
उपक्रम्य सभाकार्यं प्रस्तुवन्ति स्म निर्णयान् ॥ १७ ॥
एवं धैर्यमवष्टभ्य स्थिते सामाजिके जने ।
महाभूतप्रकोपश्च शान्तिमाप शनैः शनैः ॥ १८ ॥
परेद्युश्च सभा प्रातः प्रसन्ने गगनाङ्गणे ।
लक्षार्धजनसंकीर्णा संमिमेल चतुष्पथे ॥ १९ ॥

अथ होरात्रयेऽध्यक्षः समुद्वीक्ष्य स्वनिर्णयान् ।
समाप्तिमनयत्कार्यमन्तरायं विना सुधीः ॥ २० ॥
प्रदर्शने समेतानां सहस्राणां पुरो मुनिः ।
अकिञ्चनधनाढ्यानामब्रवीत्सौम्यया गिरा ॥ २१ ॥
अयि मित्राणि युष्माभिर्वक्तव्या ग्रामवासिनः ।
यद्यादृक् शिल्पकौशल्यमस्ति तेषामनश्वरम् ॥ २२ ॥
आग्नेयगुलिकास्त्रैर्वा शत्रोराक्रमणेन वा ।
न वाऽन्यैरायुधैरेतदविनाश्यं वितिष्ठते ॥ २३ ॥
न विजानन्त्यमी हन्त यत्तेषां शिल्पसम्पदः ।
लुण्ठिताः परदेशीयैरत्यन्तक्षीणतां गताः ॥ २४ ॥
पुनरुज्जीवनं तासां विधातुं ग्रामसम्पदाम् ।
अज्ञानध्वान्तविध्वंसैः कुशलानां सुबोधनैः ॥ २५ ॥
शिक्षणं शिक्षणीयानामित्थं ग्रामनिवासिनाम् ।
शिल्पप्रदर्शनस्यास्य ज्ञेयं मुख्यप्रयोजनम् ॥ २६ ॥
तन्तुचक्रमयं गान्धिर्भारतं कर्तुमिच्छति ।
न राष्ट्रसंस्कृतिस्तस्य ध्येयतामवगाहते ॥ २७ ॥
इति कस्यचिदाक्षेपो मम श्रोत्रमुपागतः ।
तत्रेदं प्रतिवक्तव्यं समाधानं समासतः ॥ २८ ॥
तेनैतदवबोद्धव्यं वास्तवी राष्ट्रसंस्कृतिः ।
ग्रामेषु वर्तते शुद्धा नगरेषु न दृश्यते ॥ २९ ॥

कानिचिन्नगराण्यत्र विदेशानुकृतिप्रियैः ।
वैदेशिकोपभोगाय निर्मितानि भवन्ति हि ॥ ३० ॥
पुराणां कृत्रिमा शोभा न चिरस्थायिनी भवेत् ।
हस्तशिल्पाश्रया त्वेका कालेन नहि बाध्यते ॥ ३१ ॥
हस्तकौशलमात्रेण न रक्ष्यं शिल्पवैभवम् ।
बुद्धिकौशलमप्येतत्सुसंयुक्तमपेक्ष्यते ॥ ३२ ॥
मधुसूदनदासार्यः सोपहासं पुराब्रवीत् ।
वृषभैः सहयोगेन कृषिका वृषभायिताः ॥ ३३ ॥
इति वाक्यमिदं तस्य मन्ये सत्यार्थगर्भितम् ।
पशुस्वभावतस्तेऽमी समुद्धार्याः कथंचन ॥ ३४ ॥
न वेत्ति ग्रामिको यावत्स्वधिया कर्मनिर्मितिम् ।
निर्मातुं वेद नो यावन्नूतनं हस्तकौशलम् ॥ ३५ ॥
व्यवसायपरिक्लेशान्न यावदभिनन्दति ।
न तावदेनमुद्धर्तुं शक्यते जात्वधोगतेः ॥ ३६ ॥
राष्ट्रसंघप्रतिस्थाने वर्तते हि प्रदर्शनम् ।
धियं पुष्णाति लोकानां देहमन्नमिवाङ्गिनाम् ॥ ३७ ॥
यद्यद् विशेषतो दृष्टं प्रेक्षकैर्हि प्रदर्शने ।
तत्तद् ग्रामनिवासिभ्यो बोधनीयं सविस्तरम् ॥ ३८ ॥
अनेककोटिसंख्यानां जनानां न हि विद्यते ।
विद्यालयो महान् यत्र भवेत्सर्वसमागमः ॥ ३९ ॥

स्वल्पलक्षजनोपेतं प्रयागे कुम्भमेलनम् ।
पञ्चत्रिंशतिकोटीनामग्रे तु तदिदं कियत् ॥ ४० ॥
इह प्रदर्शनस्थानाच्छिल्पानां कतिचिद्यदि ।
नीयन्ते प्रेक्षकैर्ग्रामे तदा श्रेयोऽद्भुतं भवेत् ॥ ४१ ॥
वार्ता तु बहुलीभूता न्यायभङ्गप्रसङ्गिनी ।
तदनुष्ठानयोग्याः के वर्तन्ते खलु भारते ॥ ४२ ॥
न तावद्विमुखास्तन्तौ न खादीषु पराङ्मुखाः ।
न शिल्पेष्वकृतश्रद्धा न्यायभङ्गोद्यमे क्षमाः ॥ ४३ ॥
भङ्गमन्यममी स्वैरं कुर्वन्तु निजकल्पितम् ।
न पुनः शासनोच्छेदं चिरमङ्गीकृतं मया ॥ ४४ ॥
तन्तुचक्रक्रिया नृणां ददाति बलमद्भुतम् ।
चिकीर्षे तद्बलेनाहं न्यायभंगप्रवर्तनम् ॥ ४५ ॥
अतः प्रदर्शनं यूयं मद्दृशा यदि पश्यथ ।
तत्खादीतन्तुचक्रीया शिक्षा सुप्रसरा भवेत् ॥ ४६ ॥
ग्रामाद्ग्राममियं शिक्षा युष्माभिर्नीयते यदि ।
भवन्ति हस्तशिल्पानि स्थापितानि शनैः शनैः ॥ ४७ ॥
शिल्पसम्पत्प्रतिष्ठासौ यदि स्थिरतरा भवेत् ।
प्रतिजाने तदा न्यायभंगचिन्तापि नश्यति ॥ ४८ ॥
तन्तुचक्रप्रसारश्च प्रचारः खादिवाससाम् ।
न कृतौ चेदहं कारामधिवत्स्यामि शाश्वतम् ॥ ४९ ॥

यत्र भूभारभूतोऽहं वसन् देशहितक्षमः ।
यापयामि वृथा कालं जीवन्नपि मृतोपमः ॥ ५० ॥
इयं राष्ट्रसभानौका क्लेशपारं गमिष्यती ।
शिल्पखादीजवैन्यूना मध्यमार्गे निमंक्ष्यति ॥ ५१ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां रामगडप्रदर्शनो नाम चत्वारिंशोऽध्यायः ।

एकचत्वारिंशोऽध्यायः ।

अस्ति जिन्नाभिधः श्रीमान् प्रवयान् न्यायकोविदः ।
सर्वभारतमुस्लीमसंघस्य किल नायकः ॥ १ ॥
दीर्घकालप्रवासं यश्चक्रे लण्डन्महापुरे ।
तत्र न्यायमहास्थाने स्ववृत्तिमनुवर्तयन् ॥ २ ॥
उषित्वा पञ्चषानब्दान् स्वदेशं स न्यवर्तत ।
यदा हि निखिलं राष्ट्रं श्राम्यति स्म स्वमुक्तये ॥ ३ ॥
आसीदेष पुरा राष्ट्रसभासामाजिकश्चिरम् ।
प्राज्ञमानी ततः संघं वैमनस्याज्जहौ स्वयम् ॥ ४ ॥
मुग्धमुस्लीमलोकानामचिरान्नायको भवन् ।
आत्मानं ख्यापयामास सर्वमुस्लीमरक्षकम् ॥ ५ ॥
बभूवुः पूर्वजास्तस्य हिन्दुधर्मावलंबिनः ।
पश्चादिस्लाममाश्रित्य स्वं विभिन्नममंसत ॥ ६ ॥

शैशवे वाथ तारुण्ये यावनं धर्मशासनम् ।
न दृष्टं न श्रुतं नासीदनेनेति जना विदुः ॥ ७ ॥
प्रतिष्ठां महतीं पश्यन्महार्यां स महात्मनः ।
राष्ट्रसंघविपक्षोऽभूदिच्छन्नुन्नतिमात्मनः ॥ ८ ॥
अथ मुस्लीमसंघस्थान् विधातुं राष्ट्रखण्डनम् ।
त्यक्तुं चान्योन्यसंसर्गं हिन्दुभिः प्रोदसाहयत् ॥ ९ ॥
पाकिस्थानाभिधानं यत्पुरान्यैरभिसूचितम् ।
तद्विभागं स्वजातिभ्यः पृथक्कर्तुमियेष सः ॥ १० ॥
हिन्दुभ्यो यत्र संख्या स्यान्मुस्लीमानां सुभूयसी ।
स स देशो भवेत्पाकिस्थानांगमिति सोऽब्रवीत् ॥ ११ ॥
सोऽयं स्वैरमुपालब्धुं राष्ट्रसंघं प्रचक्रमे ।
शासकैः सह योगेच्छां दर्शयामास चेष्टितैः ॥ १२ ॥
अथ केचिन्महात्मानं पृच्छन्ति स्म जना यथा ।
मुस्लीमेभ्यः पृथग्भागे विरोधो भविता स्फुटम् ॥ १३ ॥
द्वयोः समाजयोरैक्यं विना न स्यात्स्वतन्त्रता ।
इति जोघुष्यमाणस्य भवद्वाक्यस्य का गतिः ॥ १४ ॥
इति पृष्टो महात्मैतान् जगाद स्वमतं यथा ।
जाने मुस्लीमसंघस्य निर्णयः क्रान्तिकारकः ॥ १५ ॥
परं नात्यन्तविघ्नोऽयं न्यायभंगोद्यमस्य नः ।
नहि सर्वेऽपि मुस्लीमा भवन्त्यस्मद्विरोधिनः ॥ १६ ॥

राष्ट्रसंघेऽल्पसंख्यत्वं गतेऽप्यस्य सभाजनैः ।
सर्वथा न्यायविच्छेदः श्रयणीयो विनिर्भयैः ॥ १७ ॥
अस्ति नः किल संमर्दः परकीयैः प्रशासकैः ।
न पुनर्भूरिसंख्याकैरितरैः संघनिंदकैः ॥ १८ ॥
फलं यदि प्रसूते नः प्रयासो दैवयोगतः ।
तदा तत्सर्वपक्ष्याणां समभोग्यं भविष्यति ॥ १९ ॥
न यावन्नियमाः प्रोक्ताः सभासद्भिरनुष्ठिताः ।
न्यायभंगोद्यमारंभो न हि तावत्करिष्यते ॥ २० ॥
भारतीयाः स्वयं राज्यं प्रशासत्विति घोषणाम् ।
न मुस्लीमसभा शक्ता न चान्येऽपि विरोधने ॥ २१ ॥
मुस्लीमा राज्यभारं चेद्वहेयुरनुघोषणाम् ।
तदा तदितरैस्तेषामनुरोध्यं प्रशासनम् ॥ २२ ॥
अन्यथा तद्विरोधेन विग्रहः स्यात्परस्परम् ।
स च देशपरिध्वंसे पर्यन्ते पर्यवस्यति ॥ २३ ॥
अहिंसासाधनं मुक्त्वा न जानाम्यन्यसाधनम् ।
येनाष्टकोटिसंख्याका मुस्लीमाः स्युर्वशीकृताः ॥ २४ ॥
तेषामस्ति यथान्येषां स्वयं निर्णययोग्यता ।
वयमेते च कालेऽस्मिन् स्थिता एककुटुम्बिनः ॥ २५ ॥
द्वयोरैक्यं विना लभ्यं स्वराज्यं न भविष्यति ।
इति यत्प्राक् मया प्रोक्तं तदेवाद्यापि मे मतम् ॥ २६ ॥

विधानं न्यायभंगस्य रूपान्तरमिवाश्रितम् ।
एकोऽपि क्षमते कर्तुं तदेतत्कुशलाग्रही ॥ २७ ॥
फले तु शोभने लब्धे भारतस्यैव तद्भवेत् ।
अशोभने पुनः प्राप्ते तदा कर्तैव दोषभाक् ॥ २८ ॥
विभागकरणं मन्ये मुस्लीमैरपि नेष्यते ।
न हिताय हि तत्तेषां न च तद्धर्मसंमतम् ॥ २९ ॥
हिन्दुमुस्लीमकूटोऽयं धत्ते भिन्नजनाङ्गताम् ।
इति नव्यप्रवादोऽयं मिथ्येति चरितस्फुटम् ॥ ३० ॥
ये हि मुस्लीमजातीया दृश्यन्ते किल भारते ।
हिन्दुधर्मं विहायैते यावनं धर्ममाश्रिताः ॥ ३१ ॥
पृथग् जनाङ्गता न स्यात्स्वधर्मपरिवर्तनात् ।
न हि हिन्दुर्भवेदांग्लः क्रैस्तधर्मावलम्बनात् ॥ ३२ ॥
वंगीयहिन्दुमुस्लीमा भाषाहारविहारतः ।
समाना एव वर्तन्ते जनाङ्गत्वभिदा कुतः ॥ ३३ ॥
यदा जिन्नामहाभागस्तत्पूर्वमवलोकितः ।
तदा भिन्नजनांगत्वं नासीन्मद्दृष्टिगोचरः ॥ ३४ ॥
श्रीविठ्ठलपटेलार्यो मया प्रथमदर्शने ।
तुरुष्कशीर्षको लंबकूर्चश्च यवनो मतः ॥ ३५ ॥
कचिन्मुस्लीमवृन्दानि पैतृकार्थविभाजने ।
नियमादनुवर्तन्ते हिन्दुन्यायानुशासनम् ॥ ३६ ॥

कविराडिक्बलाख्योऽपि विप्रवंशसमुद्भवः ।
साभिमानं ब्रवीति स्म वैशिष्ट्यं निजजन्मनः ॥ ३७ ॥
नामतोऽप्यस्ति सामान्यं हिन्दुमुस्लीमकूटयोः ।
इक्बालकिच्लुलाल्जीति वर्तते मूलदर्शनम् ॥ ३८ ॥
अतो मुस्लीमहिन्दूनां वंशतो नास्ति भिन्नता ।
दैवनिर्मितमेकत्वं न विभाजनमर्हति ॥ ३९ ॥
एतन्मूलविवादांशो जिन्नार्येण पुरस्कृतः ।
विलक्षणः प्रवादोऽपि कल्पितस्तेन तद्यथा ॥ ४० ॥
न जाने हिन्दवः कस्मादावयोर्मतयोर्द्वयोः ।
स्वरूपं तत्त्वतो ज्ञातुं न क्षमन्ते विमर्शनात् ॥ ४१ ॥
द्वे इमे नहि धर्मौ स्तः किन्तु सामाजिकस्थिती ।
व्यवहारव्यवस्थायाः पालनाय प्रकल्पिते ॥ ४२ ॥
द्वयोरेकजनाङ्गत्वकल्पना स्वप्रकल्पना ।
प्रमादोऽयं चिराभ्यासाद् रूढमूलो विजृम्भते ॥ ४३ ॥
अयं प्रामादिको भावो विपदां मूलकारणम् ।
सद्यश्चेदपरित्यक्तो भारतं नाशयिष्यति ॥ ४४ ॥
हिन्दुमुस्लीमलोकानामस्ति भेदो महान् किल ।
धर्मे सामाजिकाचारे तत्त्वज्ञाने च संस्कृतौ ॥ ४५ ॥
द्वयोर्विवाहसंबन्धो नास्ति वा भोजनं मिथः ।
विरुद्धभावनामूले भवतः संस्कृती तयोः ॥ ४६ ॥

भिद्यते वंशचरितं समुत्तेजनकारकम् ।
भिद्यते जीवने दृष्टिरुभयोरपि पक्षयोः ॥ ४७ ॥
इतिहासे च काव्ये च नायका भिन्नलक्षणाः ।
सत्येवं बहुधा भेदे द्वयोरैक्यं कथं भवेत् ॥ ४८ ॥
सर्वांशतो विभिन्नानां बलादेकत्र योजना ।
लोकस्यापरितोषाय विनाशाय च कल्पना ॥ ४९ ॥
स्वैरप्रलापमीदृक्षं निशम्यास्य सविस्मयम् ।
वृत्तपत्रेऽलिखद्गान्धिः संक्षेपेणोत्तरं यथा ॥ ५० ॥
प्राह जिन्नामहाभागो दुर्जनाः सन्ति हिन्दवः ।
न किंचिदस्ति सामान्यमस्माकं हिन्दुभिः सह ॥ ५१ ॥
इदं ब्रवीमि यत्सत्यं श्रीजिन्नसदृशा जनाः ।
साक्षान्मुस्लीमधर्मस्य हानिमेव प्रकुर्वते ॥ ५२ ॥
इस्लामधर्मशास्त्रस्य वाक्यान्यपवदन्त्यमी ।
तदर्थमन्यथा नीत्वा मोहयन्ति च पामरान् ॥ ५३ ॥
तद्देशनां मृषाभूतां खण्डयामि न चेदहम् ।
जायते धर्मलोपो मे वृथा मौनावलम्बनम् ॥ ५४ ॥
हिन्दुमुस्लीमयोरैक्यं संपादयितुमिच्छता ।
अद्यावधि कृता सेवा मया तेषामकृत्रिमा ॥ ५५ ॥
हेतुद्वयमिदं तस्माद्विचिन्त्य बहुधा मया ।
मुस्लीमानां हितायैव कृतपूर्वा प्रबोधना ॥ ५६ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां मुग्धप्रबोधनो नामैकचत्वारिंशोऽध्यायः ।

द्वाचत्वारिंशोऽध्यायः ।

इत्थमुच्चावचाकारैरुदन्तैर्जटिलाः समाः ।
चत्वारिंशद्ययुर्विंश्यां शताब्द्यामसुखावहाः ॥ १ ॥
वार्ता तदुत्तरे वर्षे नवा न श्रूयतेऽपरा ।
अन्यत्र युद्धसंमर्दान्मैत्रपक्षारिपक्षयोः ॥ २ ॥
देशान्निष्कासिता युद्धे पाश्चात्याश्च सहस्रशः ।
भारतं शरणं जग्मुर्दीनानाथनिकेतनम् ॥ ३ ॥
अत्रान्तरेऽथ जापाना आंग्लैरारब्धविग्रहाः ।
मलयद्वीपमास्कन्द्य जग्रहुः सिंहपत्तनम् ॥ ४ ॥
ततस्तैर्ब्रह्मदेशेऽपि समाक्रम्य विलुण्ठिते ।
पलायन्त ततो भीता भारतीयप्रवासिनः ॥ ५ ॥
इतो भारतवास्तव्या अप्यवस्कन्दशङ्किनः ।
नगराणि परित्यज्य ग्रामान्तरमुपाश्रयन् ॥ ६ ॥
न विहाय गृहान् भीत्या ग्रामान्तरमुपाश्रयेत् ।
इति नागरिकानूचे पलायनपरान् मुनिः ॥ ७ ॥

अथाश्विनपयोराशिग्रहेन्दुमितवत्सरे ।
प्राप्ते पौरस्त्यशत्रुभ्यो वंगानां भयमागतम् ॥ ८ ॥
प्रान्ते मणिपुरीं नाम नगरीमवरुध्यते ।
अभिषेणयितुं चक्रुर्महासैन्यस्य संग्रहम् ॥ ९ ॥

आंग्लमन्त्रिमहागोष्ठी तद्विचारसमाकुला ।
समरेऽभ्यलषत्प्राप्तुं भारतीयावलंबनम् ॥ १० ॥
स्टाफर्ड्क्रिप्साभिधो मन्त्री पूर्वमाभाष्य नायकान् ।
शासनक्रमसंदेशं प्राकाश्यमनयद्यथा ॥ ११ ॥
आदौ प्रतिनिधिद्वारा राज्यशासनसिद्धये ।
प्रातिनिध्यसभा कार्या सम्राट्प्रतिनिधेर्वशे ॥ १२ ॥
देशप्रभुरयं केन्द्रसभाया निर्णयावलिम् ।
प्रभवेदन्यथाकर्तुं स्वेच्छया सति संभवे ॥ १३ ॥
युद्धावसानपर्यन्तं सैन्यकोशव्यवस्थितिः ।
आंग्लहस्तगतैव स्यान्नियमेन निरन्तरम् ॥ १४ ॥
समाप्ते समरे कार्यः समष्टिवरणक्रमः ।
यत्र मुस्लीमलोकानां संख्या स्यादतिभूयसी ॥ १५ ॥
यथा पञ्चनदे सिन्धौ प्रान्तके पश्चिमोत्तरे ।
आसामविषये वंगे प्रत्येकवरणं भवेत् ॥ १६ ॥
शते सप्ततिरेतेषां पाकिस्थानं यदीच्छति ।
आप्नुवन्तु पृथग् राज्यं स्वतन्त्रं मुस्लिमा अमी ॥ १७ ॥
यः कोऽपि विषयं तेषां हातुमिच्छेद्यदि स्वयम् ।
संयुक्तराज्यसंबन्धात्स प्रकामं निवर्तताम् ॥ १८ ॥
संयुक्तराज्यमप्येतदिच्छेद्यदि निवर्तितुम् ।
आंग्लसाम्राज्यसंबन्धात् करोत्वेवं न हि क्षतिः ॥ १९ ॥

इमे आंग्ला वणिज्यायामावापोद्वापयोस्तथा ।
विशिष्टमधिकारित्वं प्राप्नुयुर्न मनागपि ॥ २० ॥

जगद्राष्ट्रमहामेले भारतं समतामियात् ।
अन्यैरांग्लादिभिर्देशैः स्वतन्त्रैरविशेषतः ॥ २१ ॥

इत्यसौ राज्यनिर्वाहसूत्राणामतिविस्तरम् ।
निवेद्याखिलनेतृभ्यश्चक्रे चर्चां पृथक् पृथक् ॥ २२ ॥

सचिवः कैश्चनाहोभिरवेदीन्नीतिकोविदः ।
कथालापप्रसंगोऽयं नाभूत्कस्यापि तुष्टये ॥ २३ ॥

राष्ट्रसंघस्य नेतारो न च मुस्लीमनायकाः ।
न चान्त्यजाग्रणीरंगीचक्रुः शासनपद्धतिम् ॥२४ ॥

तन्मतं विगणय्यासौ सचिवः समघोषयत् ।
आकाशवाक्प्रसारेण संदेशं चक्रवर्तिनः ॥ २५ ॥

निशम्य घोषणामेनामुदासीनोऽभवज्जनः ।
प्रत्याशां विजहौ सद्यः स्वातन्त्र्याधिगमे च सः ॥ २६ ॥

स्टाफर्डक्रिप्सः स्वदेशं च यथायातस्तथा गतः ।
विधाय भारतं सर्वमव्यवस्थितशासनम् ॥ २७ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां शासनोपहारनिराकृतिर्नाम द्वाचत्वारिंशोऽध्यायः ।

त्रिचत्वारिंशोऽध्यायः ।

अथांग्लाष्टममासस्य भास्करो दिवसेऽष्टमे ।
वात्यानिलचलन्मेघावृतव्योम्न्युदयं गतः ॥ १ ॥
भारताम्बरविस्तारे झंझावात इवोत्थितः ।
राष्ट्रविप्लवसंघातः सर्वाशाङ्कुरभंजकः ॥ २ ॥
जनचित्तेषु जज्वाल ज्वाला क्रोधमहार्चिषाम् ।
आंग्लेषु भारतश्रद्धां चक्रे भस्मावशेषिताम् ॥ ३ ॥
गोवालीयतडागस्य महाविस्तारमण्डले ।
अमिलद्राष्ट्रसंघस्य मोहमय्यां महासभा ॥ ४ ॥
स्त्रीपुमर्भकवृन्दानि सांघिका नायकास्तथा ॥
सर्वदिग्भ्यः समापेतुः सह मन्दसुवृष्टिभिः ॥ ५ ॥
मुञ्च भारतमित्यन्ते रूपमाप्ता सरस्वती ।
शतार्धवर्षवृत्तान्तं वक्ति सारं समासतः ॥ ६ ॥
इयमादौ कलालापविनयानुनया ततः ।
सत्याग्रहसुयोधाना सिंहनाद इवोत्थिता ॥ ७ ॥
अयं स्वातन्त्र्यलाभाय वर्तते विग्रहोऽन्तिमः ।
इति सर्वे विदाञ्चक्रुर्मुञ्चभारतघोषणाम् ॥ ८ ॥
अहिंसासमरस्यास्य गान्धिर्नेता नियोजितः ।
पाश्चात्यनेतृमुख्येभ्यः पत्राणि व्यलिखद्यथा ॥ ९ ॥

सात्राज्यदर्पपाशेन बद्धाः क्लिश्यामहे वयम् ।
अतो न शक्नुमो युद्धे भवितुं सहभागिनः ॥ १० ॥
अहिंसाविग्रहो यस्तु प्रवर्तयितुमीप्सितः ।
स भवत्पक्षपोषाय न तु बाधाय सर्वथा ॥ ११ ॥
सभाकार्येषु मध्याह्ने समाप्तेषु यथाविधि ।
रजन्याममिलद्राष्ट्रकार्यकारकमण्डली ॥ १२ ॥
अत्रान्तरे च देहल्यां सम्राट्प्रतिनिधिः किल ।
सचिवैः सह संमन्त्र्य स्वैरमेतदघोषयत् ॥ १३ ॥
अयि सभ्याः स कालो नः प्राप्तः पूर्वप्रतीक्षितः ।
नृपस्यातिथयः शीघ्रं यथाकामं भवन्तु ते ॥ १४ ॥
एतावदुक्तमात्रे तु क्षणादाज्ञा प्रवर्तिता ।
इति कर्तव्यताहेतोर्मोहमय्याधिकारिणे ॥ १५ ॥
निशीथात्पूर्वमेवात्र सर्वे विदितविस्तराः ।
स्वकार्ये सज्जितास्तस्थुः पुररक्षाधिकारिणः ॥ १६ ॥
अथ धूमशकट्येका निभृतस्थापिताभवत् ।
बोरिबंदरलोहाध्वनिवेशनसमीपतः ॥ १७ ॥
यथा समुदयन् भानुः केतुना ग्रस्यते हठात् ।
तथा भानूदये गान्धिरवरुद्धोऽधिकारिभिः ॥ १८ ॥
समकालमवष्टभ्य गृहीत्वा नायकाः परे ।
सदस्यप्रमुखाश्चापि शतशोऽपि सहस्रशः ॥ १९ ॥

धूमयानमथारोप्य महात्मानं सहानुगम् ।
निन्युः पुण्यपुरीं चान्यान् परग्रामान् पृथक् पृथक् ॥ २० ॥
स्वयंसेवकसंमेलः प्रसारस्य प्रकल्पितः ।
निष्कासितोऽभवद्दण्डैर्बलान्नगररक्षिभिः ॥ २१ ॥
रक्षिणः पुररथ्यासु कुर्वन्ति स्म गतागतम् ।
तस्थुश्च सैनिकाः सज्जाः सर्वतः शस्त्रपाणयः ॥ २२ ॥
कस्तुराम्बा च तत्सायं जनमेले पुराद्बहिः ।
वक्ष्यन्ती रक्षकै रुध्वा निन्ये पुण्यपुरीं ततः ॥ २३ ॥
आगाखानस्य हर्म्ये सा वासिताऽभून्नृपोचिते ।
यत्र पूर्वागता गान्धिर्माधवश्च सरोजिनी ॥ २४ ॥
सप्ताहान्माधवः प्रातर्बहिःकृतपरिक्रमः ।
औरसीं रुजमापन्नः क्षणात्कालवशं गतः ॥ २५ ॥
ततः प्रेतक्रियां गान्धिर्विदूनः कृतवान् स्वयम् ।
विधिनाकारयद्दाहं सौधस्य च महाङ्गणे ॥ २६ ॥
भस्म गेहान्तरानीय सबाष्पनयनो मुनिः ।
जगाद स्वानुगानन्यान् गेहिनीं च सगद्गदम् ॥ २७ ॥
अहो मे दक्षिणः पाणिर्विनष्ट इव भाति मे ।
मित्रं कलत्रमर्धाङ्गं ममासीत्प्रियमाधवः ॥ २८ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां मुम्बभारतनिर्णयघोषणो नाम त्रिचत्वारिंशोऽध्यायः ।

चतुश्चत्वारिंशोऽध्यायः ।

अथ यावन्महायुद्धं ब्रह्मदेशे प्रचक्रमे ।
आपतद्वंगदेशेषु दुर्भिक्षमतिभीषणम् ॥ १ ॥
निमित्तं युद्धमेवासीद्विपदोऽस्या विशेषतः ।
तन्निवारयितुं गान्धिश्चिराय प्रायसद्भृशम् ॥ २ ॥
सैनिकानां सहस्राणि पौरस्त्यप्रान्तभूमिषु ।
निवेशितानि युद्धाय कुर्वन्ति स्म बहुव्यथाम् ॥ ३ ॥
तेषामाहाररक्षार्थं शासकैर्धान्यराशयः ।
वंगीयग्रामवृन्देभ्यः प्रेष्यन्ते स्म निरन्तरम् ॥ ४ ॥
प्रजानामित्थमाहारो ह्रसति स्म दिने दिने ।
प्रान्तीयमन्त्रिणस्तत्र न शेकुर्धान्यसंग्रहे ॥ ५ ॥
ग्रामीणा वंगदेशस्य नौकाभिर्नगरान्तरे ।
विक्रीय धान्यमात्मीयमन्यवस्तूनि चिक्रियुः ॥ ६ ॥
जीविकासाधनं तेषामासीन्नौकैव केवलम् ।
शासकाः स्वोपयोगाय सर्वनावोऽप्यपाहरन् ॥ ७ ॥
वाणिज्यप्रसरे रुद्धे नौकानामपहारतः ।
प्रजानां जीवनक्लेशः प्रतिक्षणमवर्धत ॥ ८ ॥
किं चारिर्नातिदूरस्थो ध्रुवं कुर्यादभिद्रवम् ।
न चिरादिति संत्रस्ता भारतस्याधिकारिणः ॥ ९ ॥

संभ्रमाद्ग्रामसंदोहं पावकाय समर्पयन् ।
येन जापानजा धान्यं नाप्नुयुर्न नरानपि ॥ १० ॥
एवमादिनिमित्तानां युगपत्संभवाज्जनः ।
आसीदभूतपूर्वेण ग्रस्तो दुर्भिक्षमृत्युना ॥ ११ ॥
बुभुक्षितजनस्तोमः क्षुत्क्षामशिशुकार्दिताः ।
अन्विष्यन्तोऽन्नकवलं ग्रामतो ग्राममभ्रमन् ॥ १२ ॥
मूल्येऽष्टगुणमारूढे धान्यानि क्रेतुमक्षमाः ।
सर्वं मूल्यार्थलाभाय विक्रेतुं चक्रिरे मतिम् ॥ १३ ॥
गृहाणि केचिदारामानन्ये क्षेत्रं शिशूनपि ।
एकान्नग्रासलाभाय व्यक्रीणन्त बुभुक्षिताः ॥ १४ ॥
अभुक्तपरकीयान्ना अपि त्यक्त्वा स्वमन्दिरम् ।
कल्कत्तानगरं मन्दं प्रचेलुः कवलार्थिनः ॥ १५ ॥
कृषिकाः क्षेत्रसम्पन्नाः सात्त्विकाः श्रमजीविनः ।
शतशः पुरमापेतुर्नियत्या भिक्षुकीकृताः ॥ १६ ॥
असंख्याश्च समासेदुस्तरुणा नष्टपौरुषाः ।
क्षुधालुण्ठितलावण्यास्तरुण्यश्च सहस्रशः ॥ १७ ॥
लक्षोपलक्षसंख्याका बालकाः सास्थिपञ्जराः ।
रोदितुं चाक्षमा मार्गे शिश्यिरे मरणोन्मुखाः ॥ १८ ॥
दीर्घाध्वभ्रमणश्रान्तान् मृतप्रायकलेवरान् ।
विजहुः क्रोधविश्वासप्रत्याशाप्रमुखा गुणाः ॥ १९ ॥

विलुप्तसौष्ठवाकारा नष्टनैतिकबुद्धयः ।
क्षुद्भुजंगमनिर्दृष्टा बभूवुर्गतचेतनाः ॥ २० ॥
कर्षन्तः कृशगात्राणि निराशा एव बभ्रमुः ।
महासार्थः पिशाचानामिव मृत्युमरुत्स्थले ॥ २१ ॥
श्रेणीभूय प्रयातुं ते न शेकुर्नगरान्तरे ।
इच्छन्तोऽपि प्रसक्तानां यातनानां प्रतिक्रियाम् ॥ २२ ॥
न मुखाद्याचनावर्णौ निःससार मुमूर्षताम् ।
अमी भिक्षामयाचन्त केवलं नेत्रसंज्ञया ॥ २३ ॥
अग्रे भोजनगेहानां हर्म्याणां पुरतस्तथा ।
जिघ्रन्तः सस्पृहं दीना मिष्टपक्वान्नसौरभम् ॥ २४ ॥
दीयमानं तु भिक्षान्नं ग्रहीतुं भोजनालये ।
हस्तप्रसारणायापि न शेकुः स्तब्धपाणयः ॥ २५ ॥
निःसंख्यजनसंदोहाः प्रदीपे शलभा इव ।
रथ्यासु निधनं प्रापुः प्लुष्टानि क्षुधाग्निना ॥ २६ ॥
रोगैरुच्चावचैर्ग्रस्ता दुर्भिक्षमनुगामिभिः ।
उपार्धकोटिसंख्याका दीनाः पञ्चत्वमागताः ॥ २७ ॥
मृत्युनर्तनमालोक्य भयंकरमिदं जनाः ।
मुक्तहस्तं मुमूर्षुभ्यः प्रददुः पुष्कलं धनम् ॥ २८ ॥
राज्यसूत्रधरेष्वेतद्दुर्भिक्षमुदपादयत् ।
अतिमात्रं जनक्रोधं विद्वेषं चापि भारते ॥ २९ ॥

तथा कर्णाटकेष्वाराद् बिजापुरपुरीमधि ।
अनन्तशयनप्रान्ते मलयालावनिष्वपि ॥ ३० ॥
अदृष्टपूर्वसंवेगं दुर्भिक्षमुदभूत्परम् ।
येन मृत्युमुखे दीना न्यपात्यन्त सहस्रशः ॥ ३१ ॥
अत्रान्तरे महात्मासौ निशम्यैनां विपत्कथाम् ।
सञ्चारं मृत्युसैन्यानां प्रत्यक्षीकृतवानिव ॥ ३२ ॥
यदेव शंकितं पूर्वं तदेवाद्य समागतम् ।
इति ध्यायन्मुहुश्चित्ते यातनाविवशोऽभवत् ॥ ३३ ॥
सार्धैकवत्सरात्पूर्वं दूरदर्शी लिलेख सः ।
भाव्यं हरिजने पत्रे वक्ष्यमाणशुभाक्षरैः ॥ ३४ ॥
इदं हि प्रथमं कार्यं विधेयमविलंबतः ।
अन्नदानं क्षुधार्तानां वस्त्रदानमवाससाम् ॥ ३५ ॥
दृश्यते किल वैरल्यमिदानीं धान्यवस्त्रयोः ।
तत्पुनर्वर्धते नूनं जृम्भमाणे महारणे ॥ ३६ ॥
धान्यवस्त्राणि नायान्ति कुतोऽपि परदेशतः ।
नानेन धनिनां हानिः पीड्यन्ते किन्तु निर्धनाः ॥ ३७ ॥
इति भाव्यार्थमुद्दिश्य प्रागेव मुनिरब्रवीत् ।
तथापि विमुखास्तस्थुः शासका दीनरक्षणे ॥ ३८ ॥

इति सौ. क्षमायाः कृतिषूत्तरसत्याग्रहगीतायां वंगीयमहादुर्भिक्षवर्णनो नाम चतुश्चत्वारिंशोऽध्यायः ।

पञ्चचत्वारिंशोऽध्यायः ।

बन्धनस्थेषु सर्वेषु नायकेषु पृथक् पृथक् ।
षण्मासाभ्यन्तरेणैव प्रजाक्षोभो महानभूत् ॥ १ ॥
राष्ट्रस्य सर्वतो दिक्षु प्रजाक्रोधमहानलः ।
नानारूपाणि बिभ्राणः प्राज्वलीद्दनियन्त्रितः ॥ २ ॥
पत्रप्रेषणगेहानि लोहमार्गगृहाणि च ।
दग्धानि शतशो लोकैः क्रोधेन स्वैरचारिभिः ॥ ३ ॥
लोहमार्गशलाकाश्च विपर्यस्ताः क्वचित्कृताः ।
संदेशवाहितन्त्रीणां स्तम्भाश्च विनिपातिताः ॥ ४ ॥
आंग्लेयचूर्णराशीनामालयः पुण्यपत्तने ।
दीपितः सहसा रात्रौ भस्मशेषोऽभवत्क्षणात् ॥ ५ ॥
माझगामप्रदेशे च मोहमय्यां महद्गृहम् ।
पुरारक्षसभास्थानं पावकाय समर्पितम् ॥ ६ ॥
किं च वैद्युतयानेषु दग्धेषु पुररक्षिणः ।
निर्दोषान् यष्टिभिर्घ्नन्तो व्यदहन् दाहकानिलैः ॥ ७ ॥
सैनिकैरतिदुर्मत्तैश्चिमूराष्टिपुरद्वये ।
बलात्प्रधर्षणं स्त्रीणां कृतमासीत् त्रपाकरम् ॥ ८ ॥
दुराचारानिमान् पौराः प्रकाशयितुमिच्छवः ।
निरुद्धा रक्षकैरेतान्निजघ्नुः सैनिकानपि ॥ ९ ॥

तथा मोहमयीप्रान्ते थाणानगररक्षकः ।
कुर्वन्नतिप्रजापीडां जनैः क्रुद्धैर्निपातितः ॥ १० ॥
भागल्पुरस्य कारायां द्वारमुद्घाट्य युक्तितः ।
केचिज्जयप्रकाशाख्यं नेतृवर्यं व्यमोचयन् ॥ ११ ॥
अथ दिल्लीपुरे कश्चिदुपहासविलक्षणः ।
निनाय राजमार्गेण भूपितान् दश रासभान् ॥ १२ ॥
एकैकगर्दभे लग्ना पताका समदर्शयत् ।
एकैकसचिवस्याख्यां सम्राट्प्रतिनिधेः स्फुटम् ॥ १३ ॥
नेता रासभयात्रायाः स्वयमारुह्य गर्दभम् ।
पताकां वहति स्मोच्चैः सर्वेषामग्रतः सरन् ॥ १४ ॥
तत्र नामाक्षरश्रेणिम्र्याक्सवेलस्य निर्बभौ ।
सम्राट्प्रतिनिधेः कार्यनिर्वाहकसभापतेः ॥ १५ ॥
दशगर्दभयात्रैषा हस्तिनापुरवीथिषु ।
जनहासकरी स्वैरं प्रयाति स्म शनैः शनैः ॥ १६ ॥
राज्यभारं वहन्तोऽपि प्रजाक्षेमपराङ्मुखाः ।
सचिवास्तेऽनुकुर्वन्ति रासभान् भारवाहिनः ॥ १७ ॥
जमसेदपुरे कालायसयन्त्रमहालये ।
सर्वकर्मकराः कार्याद्विरेमुर्मासयुग्मकम् ॥ १८ ॥
इत्थमत्याहितैर्लोकैः क्रुद्धैराचरिते सति ।
शासकैरपराधोऽयं राष्ट्रसंघे निपातितः ॥ १९ ॥

टोटन्ह्यामाभिधः कश्चिदांगलेयो महत्तरः ।
एतद्विषयमुद्दिश्य ग्रन्थमेकमकल्पयत् ॥ २० ॥
तत्र राष्ट्रसभायाश्च नायकाः क्षोभहेतवः ।
आंग्लराज्यनिपाताय प्रवृत्ता इति सोऽलिखत् ॥ २१ ॥
किंच जापानपक्षीया इमे राष्ट्रसभाजनाः ।
तैरेव कारिताः सर्वेऽप्यनर्थाः प्राग् विचिन्तिताः ॥ २२ ॥
अमेरिकांग्लदेशेषु मृषोदन्तान् प्रकाश्य सः ।
विद्वेषो भारतीयेषु जनयामास सर्वतः ॥ २३ ॥
संघं मोचयितुं गान्धिरात्मानं चाभिशंसनात् ।
सम्राट्प्रतिनिधेः पत्रव्यवहारं व्यधाद्यथा ॥ २४ ॥
भारते बहवः सन्ति त्रासकाः स्वैरवृत्तयः ।
न तेषु गणनीयोऽयं राष्ट्रसंघसभाजनः ॥ २५ ॥
राष्ट्रसंघः किलामीषां दुराचारान् विगर्हते ।
यदहिंसाविरुद्धं स्यात्तन्मे दहति मानसम् ॥ २६ ॥
एकमेवोत्तरं देशप्रभोः पार्श्वादुपाययौ ।
तवैव पत्रमाख्याति स्पष्टं वः सापराधताम् ॥ २७ ॥
तथा हि वृत्तपत्रे वो यो लेखः संप्रकाशितः ।
तत्र हिंसैव युष्माभिः कार्यत्वेन प्रशंसिता ॥ २८ ॥
इत्याक्षेपवचः प्राप्य गान्धिरुत्तरमब्रवीत् ।
किशोरमश्रुवालस्तदलेखीदविवेकतः ॥ २९ ॥

बन्धनस्थाय मे लेखस्तदीयो न प्रदर्शितः ।
न चान्यनेतृमुख्येभ्यः पूर्वमस्य प्रकाशनात् ॥ ३० ॥
